ŚĀLAGRĀMA KOSHA

VOLUME 2

VIDYĀLANKĀRA
S. K. RAMACHANDRA RAO



S. K. Ramachandra Rao Complete Works

ŚĀLAGRĀMA KOSHA

VOLUME 2

VIDYĀLANKĀRA

S. K. RAMACHANDRA RAO

Suramā Prakāshana

S. K. Ramachandra Rao Memorial Trust®

Copyright © September 2018

Salagrama Kosha (2-volume set)

Published by Suramā Prakāshana
Publication wing of the S. K. Ramachandra Rao Memorial Trust
#305, 6th Cross, 1st Block, Jayanagar, Bangalore 650 011
Karnataka, India

Email: maitreya.jagalur@gmail.com
Website: www.profskr.com

Copyright © September 2018
All rights reserved

First edition: Bangalore, 1996
Second revised edition: Delhi, 2009
SKR Complete Works edition: Bangalore 2018

Price: Rs. 2000 (Set)
ISBN: 81-7030-904-2 (set)

Printed at Bhavish Printsolutions, Chennai

Preface to the New Edition

Salagramas are celebrated as visible symbols of the supreme god Vishnu, and are worshipped all over the country by devout Hindus. It is therefore rather strange that till now there has been no comprehensive publication on the subject either in English or in any of the Indian languages.

The Salagrama kosha has been written in two volumes. The first volume deals with the Salagrama lore in its entirety, while the second volume focuses attention on other details of formal worship like Bana-linga (for Siva), Sona-sila (for Ganesha), and Dhatu-patra and Yantra (for Devi). It also contains a detailed description of necessary accessories of worship like Ghanta (Bell), Sankha (Conch), Arati (waving of light), rosaries of Rudraksha and Tulasi, Pedestals (Pitha-asana), etc.

These publications made extensive use of manuscripts, most of which were in the personal library of the author. These books can be therefore be considered as original contributions to Indology, being based on material that has not yet been published or translated.

The family members of Prof S. K. Ramachandra Rao have formed a trust after his demise with the main intention of reprinting his works that are out of print. On behalf of the Prof. S. K. Ramachandra Rao Memorial Trust, I thank Shri Sunil Gupta of the Indian Books Centre for reprinting this book so well. Dr. (Smt) S. R. Leela, the Sanskrit scholar has kindly arranged for the proof reading of the texts, especially the Sanskrit portions. I thank her for her efforts.

Dr. S. R. Sudarshan

Bangalore

CONTENTS

Chapter One

Śālagrāma-Mūrti-Lakshana **1**

Chapter Two

Śamkha – The Sacred Conch-Shell **139**

Chapter Three

Bāṇa-Liṅgas from River Narmadā **168**

APPENDICES

I. Śālagrāma-Mūrti-Lakshaṇa-Samgraha **204**

II. Śālagrāma-Lakshaṇa **259**

III. Excerpt from Pāñcharātrāgama **307**

IV. Tulasyupanishad **309**

V. On Rudrāksha **311**

VI. Excerpt from Śrī-Vidyārṇava-Tantra **321**



SUDARŚHANA SALAGRAMA FROM KRISHNA MUTT, UDUPI

Courtesy : Crafts Council of Karnataka, Bangalore

INTRODUCTION

The first volume of Śālagrāma-kosha introduced the interesting subject of the sacred stones in their iconic aspects; utilizing some hitherto unpublished manuscripts, including the Śālagrāma section of **'Śri-tattva-nidhi'** compiled by the late Maharajah of Mysore, Krishnaraja Wodeyar III. Subsequently, I was fortunate in acquiring three more valuable manuscripts from Tanjore and Kerala by the kind assistance of my friend Shri M. Ramabhadran of Bangalore and my cousin Shri. K.R. Raghavendra Rao. They have been included in this volume: and I am grateful to these gentlemen for having made this possible.

Further, Vidwan Prof. Vyāsanakere Prabhañjanācharya of Bangalore has helped me with copies of some of the manuscripts on Śālagrāma that were in his possession. I acknowledge his kind cooperation. Some of the photographs in the section on Śamkhas have been reproduced with permission from the book *Temple Treasures,* Vol. I, issued by the Crafts Council of Karnataka; and the two photographs forming the frontispiece were due to the kind courtesy of Dr. (Smt.) Chūdāmaṇi Nandagopal, one of the authors of the book on *Temple Treasures* (Vol. I, Ritual Utensils, 1995).

Śālagrāmas are geologically nautilus (mollusc) ammonite fossils, evolutionary relics of more than sixty-five million years, and the remarkable thing about them is that they have not changed at all during this great passage of time. Having about three thousand species, the molluscs appeared to have all perished in the mass extinction that also wiped out dinosaurs. Despite this large scale extinction, a few specimens of this group of chambered nautilus continue to exist in the Indo-pacific waters, according to the palaeontologist W. Brucc Saunders.

In any case, the Śālagrāmas are not only sacred objects for the Hindus, but geological marvels. The spiral formations in them, and the arrangements of chambers follow mathematical precision even in their complexity and variety.

I trust these two volumes will open a new inquiry into the significance of Śālagrāma stones.

S.K. RAMACHANDRA RAO



CHAPTER ONE

ŚĀLAGRĀMA-MŪRTI-LAKSHAṆA

Introduction

The author mentions that he has consulted many books on the subject, and has heard details from many sources. Principally, he bases the works on the Purāṇic accounts of what Vishṇu told Garuḍa, and what Brahmā told Nārada. The varieties of śālagrāma, the worship-worthiness of some of them, physical details and differences according to iconic distinctions are described in detail.

श्रीगणेशाय नमः॥

श्रीसरस्वत्यै नमः॥

श्रीगुरुभ्यो नमः॥

सालग्रामलक्षणम्॥ आद्यवर्गः॥

श्रीकृष्णं गोपिकानाथं प्रणम्य जगतां प्रभुम्।
ग्रन्थान्बहून्समालोक्य श्रुत्वा चाहं क्वचित्क्वचित्॥

विष्णुना गरुडायोऽक्तं ब्रह्मणा नारदाय च।
सालग्रामशिलाभेदं ग्राह्याग्राह्यफलं तथा।
इत्यादि सर्वमूर्तीषु वक्ष्यामि बुधसंमतम्।।

On the northen bank of the river Gaṇḍaki and to the south of the Himālayan ranges is the tīrtha or sacred spot, twelve yojanas in extent and created by Brahmā himself, and called chakra-nāḍi. To the north of this river is a great mountain sacred to Vishṇu, and the stones in its shadow found in the river are branded with the sacred marks of vishṇu, especially the discus. These are the śālagrāma-stones representing different forms of Vishṇu, which must be worshipped for the obtainment of the fourfold values of life, namely dharma, artha, kāma and moksha. The expression 'Śālagrāma' is here explained as 'grāmatvāt śālarūpasya'.



गण्डक्याश्चोत्तरे तीरे गीरिराजस्य दक्षिणे।
क्षेत्रं तु विष्णुसान्निध्यं सर्वक्षेत्रोत्तमोत्तमम्।।

योजनद्वादशमितं बहुतीर्थसमाकुलम।
तत्र चक्रनदी नाम तीर्थं ब्रह्मादिनिर्मितिम्।।

तस्योत्तरे महाशृंगे मम प्रीतिकरं सदा।
तच्छायागर्भितस्तत्र पाषाणाश्च खगेश्वर।
मच्चिह्नचिह्निताश्चैव तरवो धरणीतले।।

नराणामपि पक्षीन्द्र किंचित्कालनिवासिनाम्।
सर्वेषां च भवेच्चक्रं मस्तके स्पष्टमेव च।।

एवं क्षेत्रस्य महात्म्यं मृगपक्ष्यादयस्तथा।
चक्रनद्युत्तरं तीरे लभते पुण्यमुत्तमम्॥

सालग्रामशिलास्तत्र नानामूर्तिसमन्विताः।
पूजनीयाः प्रयत्नेन चतुर्वर्गफलाप्तये॥

ग्रामत्वात्सालरूपस्य तदा प्रभृति तन्नगाः।
सालग्रामाभिधास्ताक्ष्र्य कीर्तिते भुवनत्रये॥

ये ये भवन्ति पाषाणाः ते सर्वेऽस्मिन्महीधरे।
सालग्रामाभिधा प्रोक्ताः भवन्ति पतगाधिप॥

Garuḍa asks Vishṇu as a sequel to the above narration for information about how the marks of discus came to be branded on these stones, and what the purpose of such branding is. And Vishṇu tells him that big rocks (gaṇḍa, meaning sthūlopala, as gaṇḍaśaila) were splintered from the holy mountain and they carried marks of discus on them. By splashing of water on them continuously (gaṇḍūsha), there were small stones and pebbles chipped off from the big rocks, and each of them carried the emblem of Vishṇu. Some of these smaller rocks represented Vishṇu, some Brahmā and some Śiva; some do not have characteristic forms at all.



श्रीगरुडः॥

ये पाषाणास्तु नगज कथं चक्रेण लाञ्छिताः।
तत्कारणं मम प्रभो कथयस्व रमापते॥

श्रृणु ताक्ष्र्य प्रवक्ष्यामि यत्त्वया साधु पृच्छ्यते।
गण्डानामावयोर्मध्ये सुमहच्चक्रलञ्छिता॥

तस्माद्गण्डूषसलिले सेचनात्तं नगाद्भवः।
सर्वे क्षुद्रांभसास्तेथ पाषाणाश्चक्रलाञ्छिताः॥

मम रुपधराः केचित् केचिद्ब्रह्मस्वरुपगाः।
रुद्रस्वरुपगाः केचित्केचित्किंश्चिदरुपगाः॥

The phlegm-like foam produced by the splashing of water was transformed into tiny creatures, which were called vajra-kiṭas, because they had teeth which were hard and admantine. They were tiny, elongated and thin, and were of different hues. The rock-stones developed forms of discus, either on their exterior or in their interior, as a result of these creatures burrowing into them. The nature and number of discus varied in accordance with the creatures responsible to them. Some of the stones have but a single mark of discus, some two (caused by one creature), some four (caused by two creatures), some six (three creatures), and some eight (four creatures). Aging of the marks of discus is also a significant detail. If the marking is recent it is regarded as most meritorious, and if in remote past it is least meritorious. If the marking is neither new nor old, it may be meritorious, or otherwise, likewise are markings which are extremely ancient.



गण्डूषान्तर्गतश्लेष्मबिंदुवः क्रीडतां ययुः।
ते कीटा वज्रकीटाख्या सूक्ष्मदीर्घाश्च पेशलाः॥

वज्रदन्तास्तीक्ष्णमुखा नानावर्णसमन्विताः।
तदद्रिजाताः पाषाणा बाह्याजा गर्भजाश्च ये॥

षष्टिर्वर्ष चक्ररूपं कुर्वत्यंतरतोऽश्मनाम्।
एककीटा द्विचक्रं स्याद्द्विकीटास्तु चतुष्टयं।।

कीटत्रया च षट् चक्रं चतुष्कीटाष्टचक्रकम्।
बाह्यतोऽन्तरतो वापि चक्राणामेवतेव हि।।

बालचक्रं महापुण्यं यौवनं च शुभाशुभम्।
वृद्धचक्रं चाल्पपुण्यं अतिवृद्धिं शुभाशुभम्।।



Now the first section begins. It deals with differences in śālagrāmas owing to colour. This section is taken from the dialogue between Brahmā and Nārada. Red stones or stones with reddish hue bring forth an empire to rule; tawny colour like honey in the stone makes for worldly prosperity as well as final liberation. White-coloured stone is suitable for the obtainment of emancipation; yellow-colour in the stone brings wealth; and pale-white contributes to increase of wealth. One must, however, avoid stones which are extremely red. Black-stones are extremely red. Black-stones are most beneficial, as they make for all worldly beneficial, as they make for all worldly prosperity and happiness.

आद्यवर्ग:।।

अथ वर्णभेदा उच्यन्ते।।

रक्ताभं रक्तवर्णं च राज्यं भवति नारद।
मधुपिङ्गलवर्णं च भोगमोक्षफलप्रदम्।।

शुक्लाभं मोक्षसिद्धयर्थं पीतवर्णं धनागमम्।
पाण्डुरं धनवृद्धिं च अतिरक्तं तथा त्यजेत्।
कृष्णवर्णं कृष्णमर्ति सर्वसौभाग्यवर्धनम्।।

The markings of discus are also various in accordance with maṭha 'padma' and other details (see Volume I). The best are those which are formed by the vajra-kīṭas. The śālagrāma icons are two-fold; produced in water, and produced on the banks of rivers. The former are soft, while the latter are hard (coarse). The soft stones are suitable for those desiring worldly prosperity; the hard ones are suitable for aspirants of emancipation. The stones also differ in the matter of colour: some are white, some blue-black, black, blue, yellow, golden, greenish, fair-coloured, copper-coloured, red, dark red, tawny (honey-hued), multi-coloured, ash-coloured, dirty-looking, highly coloured, or of uncertain colour. Śālagrāma-stones are thus of numerous varieties.



हिरण्यगर्भकीटेन निर्मितं चक्रमुत्तमं।
मठपद्मादिभेदेन चक्रं बहुविधं स्मृतम्।।

मूर्त्तयो द्विविधा ज्ञेया जलजास्तटजास्तथा।
जलस्था कोमला स्निग्धा तटस्था परुषा स्मृताः।।

श्वेतं श्यामं तथा कृष्णं नीलं च त्वतसीप्रभं।
हेमं पीतं हरिद्राभं गौराभं कांस्यपाण्डुरम।।

रक्तातिरक्तकपिला लोहिता मधुपिलगला।
कर्बुरा बहुवर्णं च कलका धूम्रवर्णिनी।।

अतिवर्णा विवर्णा च तथा संदिग्धवर्णिनी।
एवंविधैस्तथा वर्णैरिति नानाविधाः शिला:।।



Spiralled shell of Chambered Nautilus

II. SECTION TWO

The second section deals with the iconic specificity (kshetra, area, residence, provenance) in terms of colour. The Vāsudeva-śālagrāma is white in colour, the Śriman Nārāyaṇa-śālagrāma is blue-black and the Vishṇu-śālagrāma is dark in colour, the Dāmodara-śālagrāma is bluish in hue, and so is the Aniruddha-śālagrāma; the Mādhava-śālagrāma is honey-coloured and the Sankarshaṇa-śālagrāma is red. All the Narasimha-śālagrāmas are tawny in colour, while the Ananta-śālagrāma is multi-coloured, and the Vāmana-śālagrāma is of the colour of the atasi-flower. (Common flax, Linum usitatissimum)



Nautilus pompilius

द्वितीयवर्गः।

अथ क्षेत्रनिर्णयः॥

क्षेत्रं तु वासुदेवस्य श्वेतवर्णं प्रचक्षेत्रें।
श्रीमन्नारायणक्षेत्रें हरिद्राभं विदुर्बुधाः॥

हेमा हिरण्यगर्भा स्यात् श्रीधरं पीतमुच्चते।
श्यामं नारायणं ज्ञेयं कृष्णं विष्णुं तथैव च॥

दामोदरं तु नीलाभं अनिरुद्धं तथैव च।
मध्वाभं माधवं ज्ञेय रक्तं संकर्षणं स्मृतम॥

वर्णतःकपिलं सर्वं नारसिह्मं प्रकीर्त्तितम्।
बहुवर्णमनन्तः स्यात् वामनं त्वतसीप्रभम्।
क्षेत्रं कथितमित्येवं वर्णतो विनतासुत॥

III. SECTION THREE

This section deals with the benefits that are secured by the worship of śālagrāmas of different colours and also of different shapes and other physical details (such as smoothness, size, coolness of touch, roundness, elevation, the location of chakras, apertures and so on). Śālagrāma stones occur in several sizes from as small as a gooseberry (āmalaka) to as big as a ball that can just be covered by both palms. Large ones are said to be unsuitable for worship in households. It is mentioned that smaller the stone, the greater are the benefits. The benefits are mentioned to suggest the acceptability (grāhyatva) of the stones for worship. There is also an account of how the śālagrāma-stone is to be tested for its genuineness and suitability of worship (see Volume one).



Buddha – Chakra

तृतीय वर्गः॥

अथ वर्णफलानि॥

श्वेतं मोक्षप्रदं चैव नीला लक्ष्मीप्रदायिनी।
पुष्टिदा वृद्धिदा श्यामा कृष्णं कीर्तिकरं सदा॥

गौरा पीता धनकरी हेमवर्णं तथैव च।
पाण्डरा कीर्तिदा ज्ञेया रक्ता राज्यकरी तथा॥

बहुवर्णं श्रीकरं स्यात् विद्यादारप्रदायकम्।
क्षेत्राणां निर्णयं वक्ष्ये वर्णभेदानुसारतः॥

ग्राह्याः॥

स्निग्धं सूक्ष्मं शीतलांग वृत्तमुन्नतमस्तकं।
वामचक्रं मध्यचक्रं द्वारचक्रं सगह्वरम्॥

वानमालाधरा वृत्तं वदनं कमलादिमत्।
ये ते ग्राह्या विशेषेण पूजकस्य फलप्रदाः॥

स्निग्धां सिद्धिप्रदं नित्यं सूक्ष्मा दिव्यफलप्रदम्।
सन्तोषदं शीतलांग वृत्तं सद्धृत्तदायकं॥

सर्वत्र संपत्तिदं नित्यं पृथुमुन्नतमस्तकम्।
वामचक्रं मध्यचक्रं पुत्रपैत्रादिवृद्धिदम्॥

कीर्तिप्रदं चारुजं च मौकुन्दं स्यात्सगह्वरम।
वनमालायुता लक्ष्मी दारसौभाग्यदायकम्॥

वृत्तासनं भुक्तिकरं वांञ्छिताखिलदायकम्।
पद्मावियुक्तं सौभाग्यं धान्यं धेनुफलप्रदं॥

न स्थूलं न कृशं खिन्नं नातिघृष्टं न कर्कशम्।
अन्ते मोक्षो भवेत्तस्य पूजकस्य न संशयः॥

जंब्वामलकतुल्याया सूक्ष्मचक्रद्वयाविन्ता।
तस्यामेव सदा कालं श्रिया सह हरिः स्थितः॥

यथा यथा शिला सूक्ष्मा फलाधिक्यं तथा तथा।
क्षीरे वा तण्डुलैर्वापि सालग्रामं निवेशयत्॥

दृष्ट्वाधिक्यं तयोः किञ्चित् गृह्णीयात् बुद्धिमान्नरः।

IV. SECTION FOUR

This section deals with the śālagrāma-stones that are not suitable for worship (agrāḥya); the unpleasant and undesirable consequences of the worship of such stones are also recounted in great detail.



Pankti – Chakra

चतुर्वर्गः।।

अग्राह्या:।।

अथाग्राह्या प्रवक्ष्यामि सालग्रामशिलागतान्।
करालं विकरालं च तिर्यक्चक्रं विदिङ्मुखम्।।

पृथुचक्रं चोर्ध्वचक्रमधःपार्श्वशिरोमुखम्।
वक्रतुंण्डं बद्धचक्रं अचक्रं वक्रचक्रकम्।।

भग्नचक्रं भुग्नचक्रं तथा विषमचक्रकम।
अनुक्तबहुचक्रं च पक्तिचक्रं विवर्णकम्।।
धूम्राभं कपिलाभं च कलका मधुपिङ्गला।
संदिग्धवर्णं स्फुठितं भग्नोष्ठं बंधकं तथा।

अन्तः स्फुठितभग्नं च दर्दुरं निम्नमस्तकम्।
अतिस्थूलमातिह्रस्वमन्तःस्सलिलधारणम।।

त्रिकोणं बहुरेखाढ्यं चिह्नहीनं चलासनं।
अर्धमुन्नतमुष्णं च दग्धं च रक्षितम्।।

छिद्रासनं बहुच्छिद्रं स्फोटं चैहिकवांञ्छिभिः।
पूजायां वर्जनीया स्युः निष्कामाश्चेन्न दुष्यति।।



Bhagna – Chakra

करालं कुलनाशः स्यात् विकरालमरिष्टदम्।
कार्यविघ्नकरं तिर्यग्विदिग्वक्त्रं तु शोकदम्।।

अतुष्टिदं स्थूलचक्रं मूढमुच्चाटनं भवेत्।
अधोवक्त्रं पार्श्ववक्त्रं क्षयरोगविधायकम्॥

शिरेचक्रं पुत्रवृद्धिः प्रतिबद्धकमीरितम्।
दुःखप्रदं वक्रतुण्डं मित्रघ्नं बद्धचक्रकम्॥

अचक्रं सर्वशून्यं च वक्रचक्रं भयप्रदम्।
पापदं भग्नचक्रं च स्तेयदं भुग्नचक्रकम्॥

विषदं चक्रविषमं बहुचक्रं कुलक्षयम्।
पक्तिचक्रं पतिघ्नः स्यात् विवर्णा कुलनाशिनी॥

अधर्मदं मृण्मयं च अतिरिक्तं च रोगदम्।
कपिला पत्निहानिः स्यात् कलङ्का क्षयकारिणी॥

मधुवर्णो मध्यमा स्यात् हन्ति संदिग्धवर्णिनी।
स्फुटितं पुत्रनाशाय भग्नोष्ठं भुक्तिनाशिनी॥

आस्थानभयदं भग्नं दर्दुरं क्लेशदं स्मृतम्।
क्षयावहं निम्नशीर्षम् अतिस्थूलं धनापहम्॥

अति ह्रस्वमपूजार्हं त्रिकोणं बन्धुनाशनम्।
बहुरेखाकितं दद्यादसत्यं राजसन्निधौ॥

सुकृतघ्नमचिह्नं च स्थाननाशं चलासनम्।
कुलवृद्धिविनाशाय चार्धमुन्नतमीरितम्॥

चित्तदाहकमुष्णं च दग्धं मृत्युभयप्रदम्।
उद्वेगकारकं रुक्षं छिद्रपृष्ठं तु रोगदम्॥

पैशुन्यदं बहुच्छिद्रं स्फोटमायुष्यनाशनम्।
एते त्याज्यफला प्रोक्ता द्वारमानमथोऽच्यते॥



V. SECTION FIVE

This section deals preliminarily with the testing of the śālagrāma for its superior, inferior or midling merit by the method of tying a thread round the stone, and ascertaining the position of the 'entrance' or aperture (dvāra) (see Volume One). It mentions certain group characteristics. The major part of the section is devoted to the enumeration of deities represented in the śālagrāma-stones (forms of Vishṇu), determined by the colour, shape, characteristic marks, location of 'entrances' and other physical features. While it is said that it is impossible to exhaust the list of deities specific to the śālagrāmas (the deity specific śālagrāmas being innumerable), there is here a list of eighty-one iconic forms (ekāśiti) of Vishṇu, which include some forms of Brahmā and some forms of Śiva.



Ammonite

पंचमवर्गः।।

द्वारनिर्णयः।।

वृत्ते सूत्राष्टमे भागे उत्तमा मध्यमावुभौ।
भागत्रयं कनीयः स्यात् सालग्रामस्य लक्षणम्।।

क्षेत्रनिर्णयः।।

क्षेत्रं तु त्रिविधं प्रोक्तं क्षेत्रतो वर्णतस्तथा।
मिश्रलक्षणतश्चैव ज्ञातव्यं च विचक्षणैः।।

वामानानामच्युतं स्यात् श्रीधरणां च पावनम्।
क्षेत्रं वाराहमूर्तेस्तु श्रीधरम् अखिलप्रदम्।।

हयग्रीवस्य वाराहं लक्ष्मीक्षेत्रमथापि वा।
क्षेत्रं नारायणं ज्ञेयम् अन्येषां क्रमशः स्मृतम्।।

लक्षणान्तरयोगेन तत्तक्षेत्रमुदाहृतम्।
अनेकमूर्त्तिर्यस्यां तु तत्तल्लक्षणलक्षिताः।।

वैलक्षण्यं विशेषेण ज्ञातुं शक्यं न वै कलौ।
वर्णरुपाद्यवयवैः प्रमाणैर्भूरिलांञ्छनैः।।

द्वारदेशविभेदेन भेदं केषांश्चिदुच्यते।
मत्स्याद्याः केशवाद्याश्च हयाश्च कपिलास्तथा।।



Matsya–Mūrti

यज्ञदतो शिंशुमारो मुकुन्दो हंस एव च।
परं हंसश्च वैकुण्ठः पुण्डरीकाक्ष एव च।।

लक्ष्मीपतिर्देवदेवो वटपत्रशयस्तथा।
विश्वंभरो विश्वरूपो गरुडध्वज एव च॥

पीताम्बरघटश्चैव सत्यवीरश्रवास्तथा।
पुण्डरीकाक्ष अमृताहरणश्चैव चक्रं नारायणस्तथा॥

बहुरुपः पुंण्डरीकः पारिजातः सुदर्शनः।
जगद्योनिस्तथाऽनन्तः सेव्या या हरिमूर्त्तयः॥

त्रिमूर्त्तिः हरिपूर्वश्च हरिः शंङ्करपूर्वकः।
लक्ष्मीकान्तः स्वयंभुश्च परमेष्ठी चतुर्मखः॥

पितामहः स्वर्णगर्भो गरुडः शेष एव च।
बलरामः शीरपाणिः प्रलंबघ्नो नरस्तथा॥

शिवनाभिरघोरश्च सद्योजातस्तथैव च।
वामदेवस्तथेशानः तत्पुरुषः सूर्य एव च।
हैहयश्चेति वै भेदा एकाशीतिविधाः स्मृताः॥

मूर्त्तयो लक्षणं तासां दर्शयिष्ये पृथक् पृथक्।
मत्स्य कूर्मादि मूर्तीनां विज्ञेया प्रायशो मया॥

ग्रंथस्थः शक्यते तस्माच्छब्ददोषो न शक्यते।
चक्रवक्त्रशिलाशुद्धिः संयुक्ता योऽक्तलक्षणैः॥

कैश्चिन्न्यूनापि सा मूर्तिरुत्तमा सिद्धिदायिनी॥

VI. SECTION SIX

DAŚĀVATĀRA-MŪRTIS

The section deals with the varieties of the ten incarnatory forms (avatāra) of vishṇu, the twenty-four forms of Vishṇu (chaturvismśati-mūrti), and several minor forms (mūrtyantara or vibhūtis) like Kapila, Hayagriva, Ananta etc. The śālagrāma is identified by the discus-like marks (chakras) near an opening in the stone (called vadana or mouth, or śilā-dvāra or the gate through which the ammonite worm entered), lines, scratches or holes on the surface suggesting several emblems and weapons of Vishṇu in his various forms.



Matsya Mūrthi

षष्ठ:सर्ग:।

अथ मत्स्य:॥

The Matsya-śālagramas occur in five varietics: (1) Chitra-varṇa-matsya, (2) Śakti-matsya, (3) Śri-vatsa-matsya, (4) Sushirānkita-matsya.

मत्स्यमूर्त्तेः पंचभेदा:॥

नानावर्ण तु शक्तिकं श्रीवत्सकांस्यसुषिर:।
पंचभेदा: प्रकीर्तिता:॥



Matsya Mūrti

चित्रवर्णमत्स्य:॥

नानावर्णयुतोपेता कांस्यवर्णयुतापि वा।
दीर्घाकारयुता स्निग्धा द्वारमध्ये द्विचक्रयुक्॥

चक्रमेकं पुच्छभागे दक्षिणे शफराकृतिः।
वामे प्रदृश्यते रेखा मत्स्यमूर्त्तिः शुभप्रदः॥

शक्तिमत्स्यः॥

मत्स्याकारं महास्निग्धं बिन्दुना परिभूषितम्।
हृष्टीकं शक्तिलिंगं तु चक्रेषु विषमे स्थितं॥

श्रीवत्सकः॥

मत्स्याकृतिमुखाकारो मुखं दृश्यसुचक्रकम्।
श्रीवत्सवनमालाभिः मत्स्यमूर्त्तिः शुभं विदुः॥



Matsya Mūrti

कांस्यवर्णः॥

मत्स्यरुपं तदेवास्य दीर्घाकारं तु यद्भवेत्।
चक्रत्रयसमायुक्तं कांस्यवर्ण सुशोभनम्॥

सुषिराङ्कित्तः॥

मत्स्याकारं महास्निग्धं बिंन्दुनोपरिभूषितम्।
द्वारमध्ये द्विचक्रं स्यात् पृष्ठे तु सुषिरं भवेत्।
पुच्छभागैकचक्रं स्यान्मत्स्यमूर्तिः शुभप्रदा॥



Sarvakāmakūrma

(2) KŪRMA-MŪRTI

The Kūrma-śālagrāmas have ten varicties: (1) Manoratha-kūrma, (2) Kāma-kūrma, (3) Sarva-kūrma, (4) Putra-pautrābhi-vṛddhi-kūrma, (5) Mālā-kūrma, (6) Achakra-kūrma, (7) Kamaṭhākāra-kūrma. (8) Chitra-varṇa-kūrma, (9) Aṇḍa-dvaya-kūrma, and (10) Varāha-kūrma.

कूर्मः॥

दशभेदाश्च कूर्मः स्यान्मनोरथ कामदः।
सर्वकामः पुत्रपौत्रः श्रीमाला चक्रहीनतः।
कमठाकारचित्रं तु अण्डद्वयवराहकम्॥

मनोरथ कूर्मः॥

कूर्मः स्यादुन्नतः पृष्ठे श्वेताभो गोखुराविन्त।
विख्यातो दुर्लभः सर्व मनोरथफलप्रदः॥

कामकूर्मः॥

बिंन्दुत्रयाविन्ता वापि शंङ्खचक्रयुताऽपि वा।
दीर्घदक्षिणवामा स्यात् भानोर्वलयपंञ्चकैः।
पूजिता कूर्ममूर्त्तिः स्यात् दुर्लभा सर्वकामदा॥



Mālākūrma

सर्वकामकूर्मः॥

वृत्तायता कूर्ममूर्त्तिः कलङ्कछविसंयुता।
स्नुहिपुष्पाकृतिर्वापि चक्रस्योभयपार्श्वतः।
कूर्ममूर्त्तिः खगेशान सर्वकामफलप्रदा॥

पुत्रप्रदायककूर्मः॥

वर्तुला कमठाकारा दीर्घद्वारं तु वैखरा।
नाभिचक्रयुतो रम्या कूर्माकारं तु पार्श्वतः॥

स्थिरा स्थाणु चिता पृष्ठे उन्नता नीलोहिता।
कूर्ममूत्तिरिति ख्याता पुत्रपौत्राभिवृद्धिदा॥



Kamaṭha–Kūrma Mūrti

मालाकूर्मः॥

तुरङ्गमुकुराकारो वनमालङ्गचक्रवान्।
श्यामलो हेमबिंदुः श्रीमालाकूर्मस्तु दुर्लभः॥

अचक्रकूर्मः॥

बिंदुत्रयसमायुक्तं चक्रं वा शङ्खलाञ्छनम्।
सुदीर्घदक्षिणास्यं च तत्र चक्रेण लांञ्छितम्॥

वृत्तलक्षणसंयुक्तं भानोर्वलयपंञ्चकं।
कूर्ममूर्त्तिरचक्रं तु दुलर्भ भुवनत्रये॥

कमठाकारकूर्मः॥

दुर्लभं काठाकारं दीर्घद्वारं तु दक्षिणे।
नाभिचक्रं तु सल्लग्नं पार्श्वे कूर्माकृतिर्भवेत्॥

चित्रवर्णकूर्मः॥

स्थूलं च निबिडाकारं श्यामवर्ण सुचक्रकम्।
कर्बुरे वाऽथ कपिलं नीलं वा कूर्ममुच्यते॥



Varāha Mūrti

अण्डद्वयमूर्त्तिः॥

अण्डद्वयसमायुक्तं चक्रं लाञ्छितं शुभम्।
दीर्घदक्षिणवामा स्यादास्ये चक्रसमीपतः॥

तत्र लखणसंयुक्तं भानोर्वलयपंञ्चकैः।
कूर्ममूर्तिर्वराहं च दुर्लभं सर्वकामदम्॥



Aṇḍa – Dvaya (Lemniscate of Bernoulli)

(3) VARĀHA-MŪRTI

The varāha-śālagrāmas occur in twelve varieties: (1) Śyāmala-varāha (2) Śakti-varāha (Śānti-varāha), (3) Indra-nila-varāha, (4) Aṅkuśākāra-varāha (bhū-varāha) (5) Ūrvi-varāha, (6) Dhānya-varāha, (7) Amṛta-varāha, (8) Bhū-varāha, (9) Śveta-varāha, (10) Dharaṇi-varāha, (11) Moksha-varāha and (12) Lakshmī-varāha.



Bhū – Varāha Mūrti

वाराहा द्वादशभेदाः श्यामलं शांतिरुपधृक्।
इन्दनीलाङ्कुशाकारो उर्वि धान्यफलप्रदा॥

अमृतो भूवराहौ द्वौ श्वेताभै धरणीप्रभुः।
मोक्षवराह लक्ष्मीस्तु दक्षपार्श्वे द्विचक्रयुक॥

श्यामलवराहः॥

दीर्घास्यं श्यामलाकारं पृथ्वीवलयवेष्टितं।
द्वारदेशे लसच्चक्रं वाराहं परिचक्षते॥

शक्तिवराहः॥

वाराहं शक्तिलिंङ्गं तु चक्रेषु विषमे स्थिते॥

इन्द्रनीलवराहः॥

इन्द्रनीलनिभं स्थूलं त्रिरेखालांञ्छनं शुभं।
वाराहमिति विज्ञेयं सर्वकार्यफलप्रदम्॥

अङ्कुशाकारभूवराहः॥

अयश्चक्रांतिकलसदेकदंष्ट्रं च तादृशं।
अङ्कुशाकारवदनं वाराहं भूप्रदं शुभम्॥

उर्वीवराहः॥

वामचक्रं बृहन्नेत्रं पुष्कलं तिर्यगाकृतिः।
पातालागुलिकाछिद्रं रक्तनीलसमप्रभम्।
उर्वीवराहमित्याहुर्भूप्रदं कुलवर्धनम्॥

धान्यवराहः॥

अधोवक्त्रमतिस्निग्धमहोन्नतमदायिकम्।
वाराहं धान्यफलदं सर्वैराराधनीयकम्॥

Varāha–Mūrti

अमृतवराहः॥

सुमुखं सूक्ष्मचक्रं च उन्नतं मस्तकोपरि।
त्रिबिन्दुभिः परिवृतं वाराहममृतप्रदम्॥

भूवराहः॥

अतसीकुसुमप्रख्यं नीलोत्पलनिभं तु वा।
दीर्घाकारं स्थिरं तिर्यगुद्वरयुक्तं सजर्झरम्॥

पृष्ठोन्नतं च दीर्घास्यं वामतश्चक्रमुन्नतम्।
स्पष्टरेखासमायुक्तं वाराहाकृतिरेव वा॥

आस्यमात्रं तु वा तार्क्ष्यं पादलाङ्गुलकं तथा।

दृश्यते कौस्तुभाकारा रेखा पृष्ठे च पाश्वके॥

वराहमूर्तिरित्युक्तं राज्यलक्ष्मीप्रदा नृणाम्।
पुत्रपौत्राभिवृद्धिश्च भूप्रजाज्ञानवर्धनम्॥

श्वेतवराहः॥

दीर्घघोणसमायुक्तं एकदंष्ट्रं सुनिर्मलं।
वनमालायुतं रम्यं श्वेतं वाराहमुच्यते॥

धरणीवराहः॥

सुखासनं सुपीताभं सुक्ष्मदंष्ट्रं सुचक्रकम्।

सुदंष्ट्राभ्यां समोपेतं वाराहं धरणिप्रदम्॥

मोक्षवराहः॥

घोणरुपी वराहाख्या चतुर्लाञ्छनसंयुता।
सा दद्यात्मोक्षसिध्यर्थं ब्रह्मचारिभिरर्चिता॥

कृष्णपीतोन्नतः पृष्ठे वर्तुलावर्तपूजितम्।
दक्षपार्श्वे स्थिते चक्रे समलिङ्गे प्रदृश्यतः।
वनमालायुता लक्ष्मीवराहः परिकीर्तितः॥

(दक्षिणे कल्पवृक्षं च लक्षयेदूवराहकं।
वामपार्श्वे च तिष्ठाते द्वारपार्श्वस्थदंष्ट्रिके॥

वामपार्श्वस्थचक्रे वनमालाविभूषितम्।
भुग्नचिह्नकौस्तुभेन विराजितम्॥)



(4) NĀRASIMHA

There are twenty-four varieties of Narasimha-śālagrāma: (1) Lakshmī-narasimha (in 3 sub-varieties), Yogānanda-naṛasimha, (5) Bāla-narasimha, (6) Vidyujjihva-narasimha, (7) Vibhīshaṇa-narasimha (8) Adhomukha-narasimha, (9) Pātāla-narasimha, (11) Rākshasa-narasimha, (12) Vidāru (ra)ṇa narasimha, (13) Kukshi-narasimha, (14) Bhitti-narasimha, (15) Vijaya-narasimha, (16) Kāpila-narasimha, (17) Jvālā-narasimha, (20) Mahā-jvālā-narasimha, (21) Śuddha-narasimha, (22) Baddha-chakra-narasimha, (23) Damshṭri-karāla-narasimha, (24) Vakra-damshṭra (Eka-damshṭra) narasimha. It is usual for Nārasimha-śālagrāmas to have four chakras; sometimes there are only two chakras on the left side, or in the middle.



Narasimha

नरसिंहः॥

चतुर्विंशः प्रकारा नारसिंहस्य मूर्तयः।
तत्रापि त्रिविधा लक्ष्मीनृसिह्माख्यविदारुणः॥

चतुश्चक्रनृसिंहश्च केचिद्वामद्विचक्रयुक्।
केचिन्मध्ये द्विचक्रं स्यात् त्रिविधं कृष्णकापिलम्॥



Vibhīshaṇa – Narasimha

योगानन्दः॥

नारसिंह यं त्रिभिर्बिन्दुं कापिलं पंचबिन्दुकम्।
योगानृसिंहं विज्ञेयं भोगमोक्षं च विंदति॥

बालनारसिंहः॥

सूक्ष्मरंध्रं द्विचक्राद्यं वनमालाविभूषितम्।
तद्बालनारसिंहाख्यं नृणां संसारमोचनम्॥

विद्युज्जिह्वः॥

द्विचक्रं द्विमुखं स्थूलं दूर्वाभं चोन्नतं शिरः।
हारिद्राभदं पुंसां विद्युज्जिह्वनृसिंहकम्॥



Pātāla – Narasimha

विभिषणः॥

दीर्घाकारं दीर्घवक्त्रं झषकास्यं बृहत्तरम्।
विभिषणमिति ख्यातम् दीर्घदुः खफलप्रदम्॥

ब्रह्मचर्येण पूज्यते नान्यतः पूजितो भवेत्॥

अधोमुखः॥

पुरः पार्श्वे च पृष्ठे च चक्रैरप्युपशोभितं।
अधोमुखमिति ख्यातम् अर्चकानां विमुक्तिदम्॥

पातालः॥

बहुचक्रं बहुद्वारं बहुवर्णं बहूदरम्।
पातालनारसिंहाख्यं भिक्षूणाममृतप्रदम्॥



Jvālā – Nṛsimha

सर्वतोमुखः॥

सप्तचक्रं बहुमुखं समन्ताद्वर्णभूषितम्।
सर्वतोमुखमाख्यातं बभ्रुवर्णं तु मोक्षदम्॥

राक्षसः॥

बहुच्छिद्रं भिन्नवक्रं सुवर्णकनकांश्चितम्।
तच्छिद्रराक्षसं ज्ञेयं नृसिंहं गृहदाहकम्॥

विदारुणद्वयम्॥

कपिलो ग्रंथिमालाढ्यो रक्ताबिन्दुखुरन्वितम्।
विदारुणाभिधानाख्यो नृसिंहो दीर्घकेसरः॥

अन्तश्चक्रे बृहद्वारं दक्षिणोन्नतमस्तकम्।
विदारुणामिति ख्यातं दंष्ट्राभ्यामुपशोभितम्॥

कुक्षिनृसिंहः॥

अस्पष्टचक्रं अल्पास्यं अल्पभारं महोदरं।
तत्कुक्षिनारसिंहाख्यं वनवासी भवेच्चिरम्॥

ब्रह्मचर्यविहीनेन नारसिंहोऽर्चितो यदि।
व्याधिपीडाभयं तस्य वह्निना दह्यते गृहम्॥

भित्तिनृसिहः॥

विवृत्तास्यं वामचक्रं वर्तुलं कपिलप्रभम्।
नारसिंहं गृहस्थानां भीतिदं बिन्दुभिर्वृतम्॥

विजयनारसिंहः॥

स्थूलचक्रं द्वयं मध्ये गुंजालाक्षदिवर्णकं।
स्फुटितं विषमं चक्रं नारसिंहं तु कापिलम्।
संपूज्य मुक्तिमाप्नोति सङ्गमे विजयी भवेत्॥

कपिला नारसिंहः॥

कपिला नारसिंहं तु पृथुचक्रं सुदंष्ट्रकम्।
ब्रह्मचारिभिरभ्यर्च्योऽन्येषां नास्ति योग्यता॥

ज्वालानृसिंहः॥

बिलपार्श्वेऽथदंष्ट्रीकं कपिलं स्थूलचक्रकम्।
ज्वालानृसिंहमित्याहुः प्रतिमस्करिपूजितः॥

महाज्वालानृसिंहः॥

स्थूलं च विवृतास्यं च नीलं वा कपिलं पृथु।
महाज्वालानृसिंहस्य वृत्तिमस्करिपूजितः॥

शुद्धनृसिंहः॥

नारसिंहो महादेवो पृथुचक्रसुदंष्ट्रकः।
ब्रह्मचर्येण संपूज्यो नान्यतः पूजितो भवेत्॥

बद्धचक्रनृसिंहः॥

कपिलो नारसिंहस्तु बद्धचक्रस्तदांतरे।
ब्रह्मचर्येण संपूज्यः नान्यतः पूजितो भवेत्॥

दंष्ट्री करालः॥

नृसिंहस्तु त्रिबिन्दुश्च कपिलाभो बृहद्बिलः।
दंष्ट्राकरालवदनस्यायतास्यातिरुक्षकः॥

अथवा तु नृसिंहाभो प्रकाशो वा खगाधिप।
मुखाकृतिर्व्याध इत्युक्त पार्श्वदंष्ट्राकृतिस्तु वा।
नारसिंह इति ख्यातो यतिभिः पूज्य उच्यते॥

वक्रदंष्ट्रनृसिहः॥

सुवर्णबिन्दुसंयुक्तं पृथुकं तु बृहन्मुखं।
वक्रदंष्ट्रनृसिंहं तु यतीनां प्रीतिदं सदा॥

(5) VĀMANA-MŪRTI

Twenty-one are the varieties of Vāmana-śālagrāma: (1) Dadhi-vāmana, (2) Śuddha-vāmana, (3) Atasi-pushpa-vāmana, (4) Hemānga-vāmana, (5) Indra-nila-vāmana, (6) Chitra-kuṇḍala-vāmana, (7) Sūkshma-dvāra-vāmana, (8) Bhū-lābha-vāmana, (9) Abhishṭārtha-vāmana, (10) Īpsita-vāmana, (11) Kāmya-vāmana, (12) Bṛhat-kukshi-vāmana, (13) another Dadhi-vāmana, (14) Ujjvala-vāmana, (15) Dadhi-budbuda-vāmana, (16) Rakta-bindu-vāmana, (16) Rakta-bindu-vāmana, (17) Mahābhāra-vāmana, (18) Śyāma-kṛshṇa-vāmana, (19) Sitomukha-vāmana, (20) Aṇḍa-dvaya-vāmana, and (21) Rakta-nilābha-vāmana. Another variety known as Dadhi-gopāla-vāmana is added at the end. It is also mentioned that the varieties 13, 14, 15, 16, 17, and 18 as also the last one are sub varieties of Dadhi-vāmana.

वामनः॥

एकविंश प्रकारा स्युर्वामनः परिकीर्तिताः।
तन्मध्ये दशभेदा स्युर्दधिवामनमुच्यते॥

शुद्धवामनमित्याहुः अतसीपुष्पमेव च।
हेमांगमिन्द्रनीलं च चित्रकुण्डलमेव च॥

सूक्ष्मद्वारं च भूलाभं अभीष्टार्थं च ईप्सितम्।
काम्यदं च बृहत्कुक्षिदधिवामनमुच्यते॥

कदंबकुसुमप्रख्यं दधिबुद्बुदममज्वलं।
रक्तबिन्दुर्महाभारः श्यामकृष्णं सितोमुखम्॥

अंडद्वये रत्नीलौ दधिगोपालकः स्मृतः॥

शुद्धवामनः॥

वर्तुलं चातिह्रस्वं च वामनः परिकिर्तितः।
कदंबकुसुमाकारो रेखापंचकसंयुतम्॥

वामनः॥

अन्नपानसमृद्धिः स्यात् सर्वसौभाग्यवर्धनः।
आरोग्यसुखदश्चैव वामनः परिकीर्तितः॥

अतसीपुष्पवामनः॥

अतसीपुष्पसंकाशं बिन्दुना परिभूषितम्।
ह्रस्वं सुवर्तुलं चैव वामनः परिकीर्तितः॥

हेमांङ्गवामनः॥

वृत्ताकारः छत्रशिराः श्रीभूबिन्दुसमुज्वलः।
हेमधूलिपरिक्षिप्त हेमांङ्ग वामनं विदुः॥

इन्द्रनीलवामनः॥

इन्द्रंनीलनिभाकारं वनमालाभुजोज्वलम्।
ह्रस्वः सुवर्तुलं चैव वामनं परिचक्षते॥

चित्रकुण्डलः॥

अतसीपुष्पसङ्काशं बिन्दुना परिभूषितम्।
छत्रकुण्डलसंयुक्तं वक्त्रे वा बिन्दुपूर्वकम्।
ह्रस्वः सुवर्तुलं चैव वामनः परिकीर्तितः॥

सूक्ष्मद्वारः॥

सुवर्णबिन्दुसहितं ह्रस्वचक्रं सुवर्तुलम्।
सूक्ष्मद्वारं स्निग्धवर्णं वामनः परिकीर्तितः॥

भूलाभवामनः॥

वर्तुलं स्निग्धमत्यन्तस्पष्टचक्रसमन्वितम्।
ह्रस्वमुन्नतमित्येव दीर्घास्यमतिगह्वरम्॥

स्फुरद्रेखवलयितं नाभिस्तस्योन्नतो भवेत्।
चक्रस्योभयपार्श्वे तु स्नुहिपुष्पाकृतिर्भवेत्॥

केसरावयतेताक्ष्योऽतंज्योते (?) चक्रपार्श्वयोः।
वामनं गृहिणां श्रेष्ठं सुखसौभग्यदायकम्॥

अन्नवृद्धिं प्रजावृद्धिं भूलाभं दिशति ध्रुवम्॥

अभीष्टार्थः॥

ऊर्ध्वं च समचक्रो वा अभीष्टर्थप्रदोऽर्चितः।
वर्तुलं चातिसूक्ष्मश्च वामनं परिकीर्तितः॥

ईप्सितवामनः॥

मध्यचक्रूकमह्रस्वमतिस्नग्धं च कार्ष्णिवान्।
स्पष्टचक्रं वामनं स्यान्नृणामीप्सितकारणम्॥

काम्यवामनः॥

अतसीकुसुमप्रख्यं किंचिदुन्नतमस्तकम्।
तद्वामनं कामदं स्यात्किंचिदस्पष्टचक्रकम्॥

बृहत्कुक्षिः॥

वर्तुलं नीलमेघाभं वनमालाविभूषितं।
सूक्ष्मरंध्र बृहत्कुक्षिं वामनं भुवि दुर्लभम्॥

दधिवामनः॥

कदंबकुसुमप्रख्यं रविपुंजसमप्रभं।
चक्रस्योभयपार्श्वे तु स्नुहिपुष्पाकृतिर्भवेत्॥

उज्वलवामनः॥

इन्द्रनीलनिभाकारं वनमालांबुजोज्वलम्।
ह्रस्वं सुवर्तुलं चैव वामनः परिचक्षते॥

दधिबुद्बुदः॥

एतल्लक्षणसंयुक्तं दधिबुद्बुदशोभितम्।
वामनं लीलमेघाभं वदन्ति दधिवामनम्॥

रक्तबिन्दु॥

वर्तुलं चातिह्रस्वश्च रक्तबिन्दुमहद्युतिः।
दधिवामनसंज्ञा स्याद् दुर्लभः सर्वकामदः॥

महाभारः।।

स्निग्धमव्रणकं चैव वर्तुलं च सुशोभनम्।
श्यमलं च महाभारं दधिबिन्दुसमन्वितम्।
दधिवामनमित्युक्तं पशुपुत्रविवर्धनं।।

श्यामकृष्णः।।

ह्रस्वं सुवर्तुलं चैव बिन्दुना परिभूषितम्।
दधिवामनमित्युक्तं दुर्लभं भुवनत्रये।।

सितोमुखः।।

अतसीपुष्पसङ्काशं बिन्दुना परिभूषितम्।
यो वामनाभिधो देवो श्वेतबिन्दुयुतो मुखे।
दधिवामनसंज्ञा स्याद्ग ोभूधान्यधनप्रदः।।

अण्डद्वयः।।

अण्डद्वयं च ह्रस्वं च श्रीकरं वनमालया।
कृष्णवर्णं महास्निग्धं बिन्दुना परिभूषितं।
दधिवामनमित्युक्तं दुर्लभं सर्वकामदम्।।

रक्तनीलौ।।

अधश्चक्राग्रविलसद्दधिबिंदुसमायुतम।
वामनं रक्तनीलाभं वदंति दधिवामनम्।।

दधिगोपालवामनः।।

ऊर्ध्वचक्राग्रविलसद्दधिबुद्बुदशोभितम्।
मृत्युदारिद्र्यनाशं च दधिगोपालवामनम्।।

(6) PARAŚURĀMA-MŪRTI

There are only four varieties of paraśu-rāma-śālagrama; (1) Rājapūjya-paraśurāma, (2) Śānta-paraśurāma, (3) Atasi-pushpa-paraśurāma and (4) Dūrvābha-paraśurāma.



Rājapūjya – Paraśu-rāma

परशुरामः॥

चतुर्धा परशुरामं च राजपूज्य सुशांतिदः।
अतसीपुष्पसंकाशो दूर्वादलनिभप्रभः॥

राजपूज्यः॥

सितकृष्णारुणोपेतं दीर्घद्वारं बृहद्विलम्।
भित्त्भिागे गतं चक्रं वामे वा दक्षिणेपि वा।
चक्रभागे भवेत् बिन्दुः परश्वाकृतिरेखया॥

पृष्ठे वा पार्श्वतो वाथ रेखा दंष्ट्राकृतिर्भवत्।
जामदिग्नस्तु भगवान् स्वर्चनीयो महीभृताम्॥

शान्तः॥

केवलं लाञ्छितं पृष्ठे परश्वाकृतिरेखया।
स जामदग्निस्तु भगवान् शान्ताख्यो शान्तिदोऽर्चितः॥

अतसीपुष्पः॥

अतसीपुष्पङ्कृकाशं बिन्दुना परिभूषितम्।
पीतवर्णं धनुर्बाणं परशुलांऽच्छनभूषितम्॥
राममूर्तिरिति ख्यातं सर्वमृत्युहरं शुभम्॥

दूर्वाभः॥

लसत्परशुरेखाढ्यो दूर्वाभो मस्तकाऽन्ततः।
नाभिदेशे लसच्चक्रो रामः स्याज्जमदग्निजः॥

(7) RĀMĀMŪRTI

Dāśarathi-rāma-śālagrāma has twenty-four varieties, among which Dāśaratha-rāma, (2) Paṭṭābhirāma, (3) Stārāma (with one to seven chakras), (4) Vira-rāma, (5) Bāla-rāma, (6) Daśa-kaṇṭha-kulāntaka-rāma, (7) Parivāra-paṭṭābhirāma (with four chakras), (8) Vijaya-rāma, (9) Śri-rāma, (10) Gopāla-rāma, (11) Kali-nāśakara-rāma, (12) Vana-rāma, (13) Yoga-rāma (Dhūsara), (14) Rāma-bāṇa are described here.

रामः॥

सर्वेषां राममूर्तीनां लक्षणं पतगोत्तम।
श्रुणु भक्त्या प्रवक्ष्यामि सर्वमगलकारणम्॥

अतसीपुष्पसंङ्काशं बिन्दुना परिभूषितम्।
पीतवर्णं धनुर्बाणपरश्वाकृतिशोभितम्।
राममूर्तिमिति ख्यातं सर्वमृत्युहरं शुभम्॥

राममूर्तिलक्षणम्॥

बाणतूणीरचापाढ्यः श्यामवर्णः स्त्रगन्वितः।
चतुर्विंशत्प्रकारेण रामो दशरथात्मजः॥

सीतारामस्तु तत्रापि दशभेदाः प्रकीर्तिताः।
पट्टाभिरामस्तन्मध्ये द्वादश सप्त पंच च॥

एक द्वि त्रि चतुः पंच षण्मूर्तिश्चक्र वृद्धियुक।
चतुर्भेदा त्रिचक्रः स्याद् द्विचक्रं द्विविधं स्मृतम्।।

द्वयोर्दाशरथी वीरदशकण्ठकुलान्तकः।
गोपालक्षेत्रविजयो ह्यष्टराम इति क्रमात्।
रामपंञ्रबाणौ द्वौ बलशालि ततः परं।।

सीतारामः।।

द्विचक्रसीतारामः।।

कृष्णवर्णो धनुः पार्श्वे वनमालोपशोभितः।
भानूस्त्रयसमायुक्तः स्वर्णबिन्दुसमस्तकः।
जानकीवल्लभौ रामस्त्वभीष्टफलदः शुभः।।

अपरो द्विचक्रसीतारामः।।

चापबाणाकुंशश्छत्रध्वजचामरसंयुतः।
वनमालाधरो देवः सीतारामः प्रकीर्तितः।।

त्रिचक्रसीतारामः।।

कुक्कुटांण्डसमोपेतमधोवक्त्रं सकुंडलम्।
द्वारदेशे समासक्तकल्पवृक्षेण चिह्नितम्।।

वामपार्श्वे शिरश्चक्रं रेखालांछनचिह्नितम्।
सीतारामः स विज्ञेयो भुक्तिमुक्तिफलप्रदः।।

त्रिचक्रसीतारामः।।

कोदंण्डी कुक्कुटांण्डाभो बाणतूणीरसंयुतः।
गोखरे पुच्छचक्रे च सीतारामः स उच्यते।।

अपरः त्रिचक्रसीतारामः।।

कुक्कुंटांण्डसमोपेतमधोवक्त्रं सकुंण्डलम्।
द्वारदेशे समासक्तकल्पवृक्षेण चिह्नितम्।।

बाणतूणीरचापाढ्यं बहिश्चक्रसमन्वितम्।
सीतारामममिति ख्यातं भुक्तिमुक्तिफलप्रदम्।।

अन्यः त्रिचक्रसीतारामः।।

सव्यापसव्यतूणीरौ पृष्ठे चाभ्यां विराजितम्।
सीताचक्रसमोपेतं सीतारामममिति स्मृतम्।।

चतुश्चक्रसीतारामः।।

वदनेष्वेकवदनचतुश्क्रोंऽबुदप्रभः।
चापबाणाकुशश्छत्रध्वजचामरसंयुतः।।

वनमालाधरो देवः सीतारामः प्रकीर्तितः।
सर्वसौभाग्यदश्चोक्तः सर्वत्र विजयो भवेत्।।

पञ्चचक्रसीतारामः।।

द्वारद्वये चतुश्चक्रो वामतश्चैकचक्रवान्।
बाणतूणीरचापाढ्यः सीतारामः स्त्रगन्वितः।।

चक्रैस्तु कैवलैर्युक्तं पंचभिः समलंकृतम्।
वनमालालांञ्छनं च तत्रास्ते श्रीसहायवान्।।

तस्मिन्गृहे न दारिद्र्यं दुःखशोका न सन्ति हि।
न चोरादिभयं तत्र दुर्ग्रहैः स न पीड्यते।
अन्ते मोक्षं भवेत्तस्य पूजकस्य न संशयः।।

षड्चक्रसीतारामः।।

द्वारद्वयचतुश्चक्रः श्यामवर्णः स्त्रगन्वितः।
कोदंण्डी कुक्कुटांण्डाभो बाणधारी च तूणवान्।
पृष्ठचक्रः शिरश्चक्रः सीताराम स उच्यते।।

रेखाकारधनुर्बाणं शिरश्चक्रसमन्वितम्।
कल्पद्रुमसमायुक्तं द्वे द्वे चक्रे तु पार्श्वयोः।
पट्टाभिराममित्युक्तं दुर्लभं भुवनत्रये।।

सप्तचक्रपट्टाभिरामः॥

पूर्वभागे त्रिवदनः पार्श्वे चक्रसमन्वितः।
बाणतूणीरचापाढ्यो कल्पृक्षसमन्वितः॥

सिंहासने समासीनः रामः परिजनैः सह।
पट्टाभिराममित्युक्तं राज्यलक्ष्मीप्रदं नृणाम्॥

पंचचक्रपट्टाभिरामः॥

रेखाकारधनुर्बाणं शिरश्चक्रसमन्वितम्।

कल्पवृक्षसमायुक्तं द्वे द्वे चक्रे च पार्श्वयोः।
पट्टाभिराममित्युक्तं दुर्लभं भुवनत्रये॥

एकचक्ररामः॥

एकचक्रं तु वदने कृष्णवर्णा सुशोभना।
बाणतूणीरचापाढ्या कल्पवृक्षसमन्वित।
सा राममूर्तिर्विज्ञेया पूजकस्य फलप्रदा॥

दशरथरामः॥

कोदंडकुक्कुटांडाभं श्यामलं पृष्ठतोन्नतम्।
सव्यापसव्यतूणीरसुषिराभ्यां विराजितम्॥

कल्वद्रुमसमायुक्तं पृष्ठे च्छिद्रसमन्वितम्।
रामं दाशरथिं प्राहुः दुर्लभं भुवनत्रये॥

दशरथरामः रेखाकारधनुर्बाणं स्थूलदीर्घसवज्रकं।
नाभिचक्रबहुच्छिद्रं रामं दाशरथिं विदुः॥

धनुषैकेन संयुक्तं वर्तुलं किंचिदायत।
कोदंडरामनाम स्याच्छुद्धनीलांबुदप्रभः॥



Kodaṇḍa – Rāma

वीररामः॥

बाणतूणीरचापाढ्यः कुण्डलस्त्रक्समाहितः।
सूक्ष्मकेसरचक्राढ्यो वीररामः श्रियावहः॥

बालरामः॥

पृष्ठभागे पंञ्चरेखाश्चापो बाणश्च पार्श्वयोः।
स बलरामो विज्ञेयः पुत्रदायी न संशयः॥

दशकंण्ठकुलांतकः॥

कोदंण्डकुक्कुटाण्डाभं श्यामलं पृष्ठतोन्नतम्।
रेखाद्वयसमोपेत द्वारपार्श्वे ।
धनुराकृतिरेखा च दृश्यते पार्श्वतोथवा॥

पृष्ठतो वा भवेद्रामः दशकण्ठकुलान्तकः।
परीवारद्वादशचक्रपट्टाभिरामः॥

कोदंण्डं कुक्कुटांण्डागं श्यामलं पृष्ठमुन्नतम्।
बाणतूणीरचापाढ्यं कल्पवृक्षसमतविन्तम्॥

समसूक्ष्मलसच्चक्रं पंञ्चवक्त्रेण वेष्टितम्॥

छत्रचामररेखाढ्यं पार्श्वचक्रसमन्वितं।
कूर्मचक्रमधोभागे पकजेन समन्वितम्॥

सिंहासने समासीनं रामं परिजनैः सह।
पट्टाभिराममित्युक्तं राज्यलक्ष्मीप्रदं नृणाम्।।
पुत्रपौत्राभिवृद्ध्यर्थं भुक्तिप्रज्ञानवर्धनं।।

चतुश्चक्रपरिवारपट्टाभिरामः।।

द्वारद्वयचतुश्चक्रो यत्र कुत्र त्रयस्तथा।
वनमालापुष्पकरं बाणतूणीरसंयुतः।।

सीताभरतशत्रुघ्नलक्ष्मणप्राणसेवितः।
स्पष्टचक्रः स्थिरासीनश्च छत्रचामरभूषितः।।

अभिषिक्तो महारामः धनधान्यसुखप्रदः।
मध्यमं रामचक्रं हि वामे सीतासमन्वितम्।।

दक्षिणे लक्ष्मणोपेतं पार्श्वेकत्रेऽतिगह्वरे।
शत्रुघ्नभरतोपेतमासनोपरि चाग्रतः।।

एकवक्त्रेहनूमन्तं सुग्रीवेण च संयुतम्।
जंबूफलसमाकारं तूणीरद्वयमण्डितम्।।

ध्वजचामरसंयुक्तं बाणं बाणासनोज्वलम्।
सुवर्णाबिन्दुखचितं कृष्णमुन्नतमस्तकं।।

पट्टाभिषिक्तं श्रीरामं परिवारसमन्वितम्।
आयुरारोग्यदं पुंसां पुत्रपौत्राभिवर्धनम्।
श्रीकरं सर्वपापघ्नं सर्वत्र विजयप्रदम्।।



Vijaya Rāma

विजयरामः॥

दिव्यबाणेन संयुक्तं चापतूणीरसंयुतम्।
करालवदनं रक्तबिन्दुयुक्चक्रशोभितम्।
यः स्याद्विजयरामाख्यः केसरोपेतचक्रयुक्॥

त्रिचक्रबालरामः॥

पूर्वभागे त्रिवदनस्त्रिकोणे यत्र लोकपाः।
श्रीराम इति विख्यातः सचिन्होऽचिन्ह एव वा॥
बालः प्रयच्छति तेभ्यः सर्वत्र विजयप्रदः॥

गोपालरामः॥

जंबूफलसमाकारः कृष्णवर्णः सबीजकः।
पृष्ठे सुषिरमालाभ्यां वक्त्रे मकरकुंण्डलः॥
ललाटे हेमबाणस्तु बिंदुना धनुसंयुतः।
गोपालक्षेत्रमुत्पत्या स रामस्तस्य लक्षणम्॥

कलिनाशकरः॥

कलिनाशकरं प्रोक्तं सर्वकामफलप्रदम्।
अपुत्रो लभते पुत्रं सर्वमंङ्गलकारकम्॥

वनरामः॥

बाणतूणीरचापाभ्यां शांतमुष्टिं त्रिचक्रकम्।
शोकराम इति ख्यातो सौभाग्यफलदायकः॥

योगरामः॥

धूसरः॥

एकचक्रसमायुक्तो योगराम इतीरितः॥

रामपंञ्जरः॥

तूणीराकृतिदंष्ट्राभ्यां चापद्वश्यशरान्वितम्।
नानायुधध्वजोपेतं रेखाचामरसंयुतम्।
श्रीरामपंञ्जरं ज्ञेयं सर्वत्र विजयप्रदम्॥

रामबाणः॥

रामबाणम् अन्तर्गह्वरसंयुक्तं चक्रहीनं यथा भवेत्।
श्यमालं शरचापं च वनमालाविभूषितम्॥

श्रीरामबाणमित्युक्तं श्रीकरं कुलवर्धनम्॥

(8) BALABHADRA-MŪRTI

Also called Samkarshaṇa, this incarnatory form have five varieties: (10 Bala-bhadra, (2) Bala-rāma (3) Balaśai-rāma (4) Śānta-bhadra-rāma and (5) Sīra-pāṇi. This account is followed by a joint-enumeration of three Rāmas (*viz.* Paraśu-rāma, Dāśarathi-rāma and Bala-rāma) represented in a single śālagrāma-stone. The section concludes with the description of the variety of śālagrāma called Shaṭchakra-sāmrājya-tri-rāma.

बालरामः॥

सङ्कर्षणमहादेवस्याष्टभेदाः प्रकीर्तिताः।
तन्मध्ये पंञ्चभेदाः स्युर्बलभद्रो महाप्रभुः॥

सङ्कर्षर्णः॥

हलरेखामुसलवान् शुक्लांबुदमिवाश्रिवान्।
मध्यबिंदुधरः श्रीमान् रामः सङ्कर्षणः प्रभुः॥

अपरः सङ्कर्षणः॥

द्वे चक्रे एकभागे तु पूर्वभागे च पुष्करम्।
सङ्कर्षणश्च विज्ञेयः रक्ताभश्चोन्नतशोभनः॥

बलभद्रः॥

स्थूलचक्रो भवेद्देवो हरिल्लोहितवर्णकः।
बलभद्रो भवेद्देवो गोत्रकीर्त्तिविवर्धनः॥

बलः॥

शङ्खचक्रगदाकारं पृथुचक्रं च तद्भवेत्।
श्वेताभं हलचिह्नं च मध्यतो यत्र दृश्यते॥

सङ्कर्षणो नाम देवः सुकृत्यां जायते पदम्॥



Balaśāli

बलशालिरामः॥

दीर्घाकारं बृहद्द्वारं मुकलाकृतरेव च।
नीलोत्पलप्रसूनाभं पृष्ठे वक्षःस्थलेऽपि वा।
बलशाली भवेद्रामो वंशकोशविवर्धनः॥

शान्तभद्रः॥ बलशालिप्रकारः॥

द्वितीयो वामचक्रस्तु रेखा चैव तु दक्षिणे।
बलशाली भवेद्रामो लाङ्गलाकितशोभनः॥

सीरपाणिः सर्वत्र रक्तवर्णः स्यात् पीतनीलांबुवर्जितः।
सुचक्रो वक्रचक्रो वा सीरपाणिः शुभप्रदः॥

त्रिरामः॥

पीतवर्णो धनुर्वक्त्रः धनुः परशुलाङ्गलः।
अङ्कितास्ते त्रिरामः स्युः सर्वमृत्युहराः शुभाः॥

रामत्रयः।

कदम्बकुसुमाकारं बिन्दुना परिभूषितम्।
धनुर्बाणधरा रेखा पद्मरेखासमन्वितम्॥

रामो रामश्च रामेऽति दुर्लभं सर्वकामदं॥

षट्चक्रसाम्राज्यत्रिरामः॥

पार्श्वे सायुधसंमुखं सुसुषिरं पृष्ठे च कल्पद्रुमं।
वामे भूषितचक्रलाङ्छितशराघातत्रयं सुस्थिरं॥

ज्ञेयं भार्गवकृष्णारामजगतां वर्णत्रयं दुलभं।
षट्चक्राङ्कित रक्तनीलमधुभिः साम्रज्यमुक्तिप्रदम्॥

(9) KṚSHṆA-MŪRTI

There are twenty-five varieties of Kṛshṇa-specific śālagrāmas. Described here are the śālagrāmas recognized as representing the following forms of Kṛshṇa: (1) Śuddha-Kṛshṇa, (2) Bāla-Kṛshṇa (3) Kūrchākāra-Kṛhṇa, (4) Gadākāra-Kṛshṇa (5) Chhatrākara-Kṛshṇa, (6) Śyāma-rakta-Kṛshṇa, (7) Madana-gopāla, (8) Veṇu-gopāla, (9) Lakshmī-gopāla, (10) Śri-gopala, (11) Santāna-gopāla, (12) Kāliya-mardana-Kṛshṇa, (13) Kamsa-mardana-Kṛishṇa, (14) Dhanañjaya-Kṛshṇa, (15) Chāṇūra-mardana-Kṛshṇa, (16) Gopi-vastrāpahāri-Kṛshṇa and (17) Govardhana-Kṛshṇa.

कृष्णः॥

पञ्चविंशप्रकारेण कृष्णमूर्तिः प्रचक्षते।
तन्मध्ये विविधः कृष्णो त्रयोदशप्रभेदतः॥

शद्धकृष्णो बालकृष्णो कूर्चाकारो गदाकृतिः।
छत्राकृतिः श्यामरक्तो मदनो वेणुलक्ष्मिवान्॥

श्रीगोपाश्च सन्तानो मल्लयुद्धविशारदः।
कालीयमर्दनश्चैव कंसमर्दी धनंजयः॥

श्यमन्तहारि चाणूरं गोपीवस्त्रपहारि च।
गोवर्द्धनश्च बौद्धश्च कल्किद्वयमतः परम्॥

शुद्धकृष्णः॥

समचक्रे द्वारदेशे कृष्णवर्णं सुशोभनम्।
सा कृष्णमूर्तिर्विज्ञेया पूजिता सौख्यदायिनी॥

बालकृष्णः॥

उन्नतो मूर्ध्नि कृष्णाभो निम्नोऽधस्तात् त्रिबिन्दुलः।
स बालकृष्णो विज्ञेयो दीर्घास्यः पुत्रभाग्यदः॥

कूर्चाकारकृष्णः॥

कृष्णः पीतः कृशतनुर्भित्तिपार्श्वे द्विचक्रयुक्।
द्वारतुल्यो भवेन्नाभिः कूर्चाकारं तु पृष्ठतः।
कृष्णो वृत्ताकृतिस्तार्क्ष्य सर्वेषां पापनाशनः॥

गदाकारः॥

कृष्णवर्णं तथा विष्णुं स्थूलचक्रं सुशोभनम्।
गदाकारस्तथा रेखा लक्ष्यते मध्यदेशतः।
कृष्णमूर्तिः स विज्ञेयो भोगमोक्षफलप्रदः॥

छत्राकारगोपालः॥

श्यामवर्णं महास्निग्धं छत्राकारं तथैव च।
सूक्ष्मद्वारेण बिंदूनां रक्तरेखासमन्वितम्॥

शीर्षे च पुष्कलं चैव महास्निग्धं च कोमलं।
गोपालमूर्त्रिर्विज्ञेयः सर्वसौभाग्यवर्द्धनः॥

श्यामरक्तगोपालः॥

अर्द्धश्यामश्चाधो रक्तः शङ्खचक्रधनुःशरैः।
दीर्घसुषिरवन्नाम गोपालो मदनाह्वयः॥

मदनगोपालः॥

यो गोपालः पार्श्वभागे तरुयुक्तः स कार्ष्णिवान्।
सस्यान्मदनगोपालो मालाकुण्डलशोभितः।
पुत्रपौत्रधनैश्वर्यसर्वलोकैकवश्यदः॥

वेणुगोपालः॥

कृष्णोऽतिकृष्णः स्थूलो न कृशो नातिशोभनः।
दण्डशृङ्गयुतः पार्श्वे वेणुना शोभिते मुखे॥

स गोपाल इति प्रोक्तो गोभूधान्यफलप्रदः॥

लक्ष्मीगोपालः॥

कुक्कुटाण्डसमोपेतं श्रीकरो वनमालया।
लाङ्गलं वेणुचिह्नं च कुंण्डलं परिवेष्टितम्॥

लक्ष्मीगोपालमित्येतद्दुर्लभं भुवनत्रये।
पुत्रलाभं तथा मोक्षं गोधान्यधनवर्धनम्॥

श्रीगोपालः॥

रेखां पंञ्चायुधधरं वनमालाविभूषितं।
अब्जचिह्नं सूक्ष्मचक्रं कृष्णमेनं प्रचक्षते॥

एतल्लक्षणसंयुक्तं दीर्घाकारं महोदरं।
श्रीगोपालमिति प्राहुः सरेखावंशनालकम्॥

सन्तानगोपालः॥

दीर्घाकारः कृष्णवर्णः सोऽर्द्धचंद्रनिभाननः।
स स्यात्सन्तानगोपालो पुत्रपौत्राभिवर्द्धनः॥

कालीयमर्दनः।

दक्षादि वामपर्यन्तं मुखाऽधस्तासुशोभनः।
रेखाः स्यात्कृष्णवर्णाढ्याः बिन्दुद्वयविभूषिताः।।

कालीयमर्दनः साक्षात्सर्वारातिविनाशनः।।

कंसमर्दनः।।

पूर्वभागैकवदनः पार्श्वेकवदनं भवेत्।
कंसमर्दी भवेत्कृष्णः शुद्धनीलांबुदप्रभः।।

धनंजयः।।

सव्यापसव्यरेखाभ्यां भूषितः सूक्ष्मचक्रकः।
पार्श्वे खुरयुगोपेतो धनंजयविभुः शुभः।।

स्यमंतकहारी।।

असिवर्णं च न स्थूलो चक्रभागेऽतिशोभनः।
वनमालापरिवृतः पृष्ठे श्रीवत्सलांश्छनः।
स्यमंतहारी विज्ञेयः पुष्टिश्रीकीर्तिदो नृणाम्।।

चाणूरमर्दनः।।

रक्तबिन्दुद्वययुतः श्यामो दंतिभुजोपमः।

रेखा दक्षिणतो वामे मुष्टिवद्दृढबिन्दुकः।
चाणूरमर्दनाख्यः व्यात्सर्वशत्रुनिकृंतनः।।

गोपीवस्त्रापहारी।।

अधस्ताद् द्रुमसंयुक्तं पार्श्वे वस्त्रेण लांश्छितम्।
प्रच्छन्नसूक्ष्मचक्रे तु वामे वा दक्षिणेऽपि वा।
वस्त्रापहारी विज्ञेयः स कृष्णः सर्वसिद्धिदः।।

गोवर्द्धनः॥

वर्तुलो मस्तके निम्नः पार्श्वे रजतबिंदुकः।
गोवर्धनाख्यो गोपालो दीर्घरेखा तु दक्षिणे॥

सर्वकष्टविनाशः स्यात् गोधान्यधनवर्धनः॥

(9) BUDDHA-MŪRTI

There are five varieties of the Buddha-śālagrāma: (1) Nirvāṇa-buddha, (without chakras, but having an aperture), (2) Buddha-mūrti (with two chakras in the interior, but having many colours on the surface), (3) Buddhākāra (white or dirty-looking, with a lotus-like chakra in the aperture), (4) Sarvajña-Śrighana (with a thousand spots, and with a chakra in the center), and (5) Antar-viśāla (large and elevated, adorned with a rounded chakra, and having a small aperture.



Govardhana

बुद्धमूर्त्तिलक्षणम्॥

अन्तर्गह्वरसंयुक्तं चक्रहीनं यथा भवेत्।
निर्वाणबुद्धसंज्ञा स्यात् ददाति परमं पदम॥

रंध्रदृश्यद्वयोपेतंग् अंतश्चक्रद्वयांचितम्।
शिरोद्दिष्टोऽर्ध्वचक्रं च पार्श्वयोर्वाऽपि दृश्यते॥

नानावर्णमयं वाऽपि बुद्धमूर्त्तिः प्रचक्षते॥

रंध्रेषु दृश्यते चक्रं पद्माकारं सबिंदुकम्।
बुद्धाकारं विजानीयाच्छ्वेतं वा मलिनावहम्॥

सहस्त्रबिंदुसंयुक्तं मध्यचक्रसमन्वितम्।
श्वेतेवर्णमतिस्निग्धं सर्वज्ञं श्रीघनम् विदु:॥

बुद्धमूर्त्तिस्तु सूक्ष्मास्यो वृत्तचक्रापलांञ्छित:।
तमालपल्लवस्निग्धपीनोन्नततनु: शुभ:॥

अंतर्विशालमिति च बुद्धमूर्त्तिः पंचभेदा प्रचक्षते॥

Nirvāṇa – Buddha

(10) KALKI-MŪRTI

The śālagrāmas spécific to this tenth incarnatory form of Vishṇu occur in five varieties; (1) very red in colour, shaped like a short sword, (2) shaped like a lance (kunta), white in colour, (3) with subtle lines and an unclear chakra at the opening , shaped like an elephant goad, (4) Kalyāṇa-Kalki with elongated chakra and a line on top, and (5) Svrṇa-kumkuma-miśra, the colour of the stone being a combination of golden and red colours.

अथ कल्किमूर्तिः॥

पंञ्चभेदाः प्रकारेण तत्तल्लक्षणयोगत:।
रक्तं नीलहयं चैव सूक्ष्मं कल्याणमेव च॥

सुवर्णकुङ्कुममिश्रं तु पंञ्च भेद: पकीर्तिता:।
अतिरक्तं सूक्ष्मबिलं स्पष्टचक्रं स्थिरासनम्॥

कृपाणाकृतिका रेखा द्वारस्योपरि पृष्ठके।
रेखाद्वयसमायुक्तो रेखा कुन्तायुधाकृतिः॥

श्वेतवर्णो दीर्घमुखः कल्किरित्यभिधीयते।
इंन्द्रनीलनिभो दीर्घो वनमालाविभूषितः॥

दीर्घचक्रोऽर्ध्वरेखा अंकुशाकारवदनः धर्मदः कल्किविग्रहः॥

सूक्ष्मामालास्पष्टचक्रं द्वारपार्श्वे सखड्गकम्।
म्लेच्छनाशं विजानीयात्कलिकल्मषनाशकः॥

कल्याणमूर्त्तिरुर्ध्वोऽष्टः कल्किरंञ्जनसंनिभः।
दीर्घचक्रोऽर्ध्वरेखांकः सुतीक्ष्णो विजयप्रदः॥

स्वर्णकुङ्कुमसंमिश्रकांतिर्वापि सुनिर्मलम्।

इत्येवं मत्स्यकूर्मादिलक्षणं प्रायशो मया।
दशावतारपर्यन्तं मूर्तीना ग्राह्यते बुधैः॥

VIII. SECTION SEVEN

CHATURVIMŚATI-MŪRTI

This section deals with the śālagrāmas identified as specific to the twenty-four well-known forms of Vishṇu: Keśava etc. (see Volume One). The sub-varieties of these forms are also mentioned and described in detail here.

(1) KEŚAVA-MŪRTI

This category of śālagrāmas occur in two varieties : (1) One variety is adorned with gold and silver spots and has a small chakra: its shape is four cornered; and its colour is blue-black; and (2) the other is dark in hue, shaped like the elephant's trunk and has two red spots on it.

केशवः॥

अतः परं केशवमूर्त्तिलक्षणम्॥

केशवमूर्त्तिर्द्विविधा भिन्नलक्षणयोगतः राजतैर्बिन्दुभिर्हेमैरंचितं।
सूक्ष्मचक्रकं वनमालाविन्तं श्यामं केशवं परिचक्षते॥

सौभाग्यं केशवो दद्याच्चतुष्कोणो भवेत्तु सः।
रक्तबिंदुद्वययुतं श्यामो दंतिभुजोपमः॥

(2) NĀRĀYAṆA -MŪRTI

The deity-specific śālagrāmas of this variety occur in 32 sub-varieties. Of them the Lakshmi-nārāyaṇ-śalagrāmas are commonly found and held especially sacred. There are thirteen varieties of these stones: (1) Abhishta-varada, (2) Tri-gambhira, (3) Añjanāchala, (4) Jambū-phala, (5) Ashṭiśvarya-phala-prada, (6) Trirekhā, (7) Dhvaja-vajrānkita, (8) Nava-durvā-dala, (9) Pakshi-rāja, (10) Śveta-rekhā-dvaya, (11) Madhye-sushira, (12) Svarṇa-tālu and (13) Smitānana.

नारायणः॥

नारायणमहादेवो द्वात्रिंशत्तु प्रभेदतः।
चतुश्चक्रधरो मूर्त्तिस्तन्मध्ये तु चतुर्दश॥

एकद्वित्रिचतुश्चक्रा अष्टमूर्त्तिर्विशेषतः।
चक्रद्वयाधरोष्ठौ च चक्रहीनं तु शोकदम्।
द्विविधस्यैकचक्रं तु तत्तन्मूर्त्तिस्तु भेदतः॥

चतुश्चक्राणामपि मूर्त्तिसंख्या॥

अभीष्टं च त्रिगंभीरम् अंजनाचलजांबवम्।
अष्टैश्वर्यत्रिरेखाश्च ध्वजवज्राकितस्तथ॥

नवदूर्वा पक्षिराजश्वेतरेखाद्वयं तथा।
ऊर्ध्वाऽधो बिलमध्ये च स्वर्णतालु स्मितननम्॥

चतुश्चक्रलक्ष्मीनारायणः।
अभीष्टपुलदलक्ष्मीनारायणः॥

एकचक्रश्चतुश्चक्रो वर्तुलः श्यामवर्णकः।
ध्वजवज्राङ्कुशोपेतो मालायुक्तः सबिन्दुकः॥

नातिह्रस्वो नातिस्थूलो लक्ष्मीनारायणः स्मृतः।
तस्य दर्शनमात्रेण ह्यभीष्टफलमाप्नुयात्॥

त्रिगंभीरलक्ष्मीनारायणः॥

चतुश्चक्रं त्रिगम्भीरं दक्षिणे सुषिरं पृथु।
वनमालाद्वयोपेतं गोखुरेण च मिश्रितम्॥

चक्राकारं दृढं स्निग्धं मध्यचक्रं दृढासनम्।
लक्ष्मीनारायणाख्यं हि मूत्ति मुत्तिमोत्तम्॥

अञ्जनाचललक्ष्मीनारायणः॥

लक्ष्मीनारायणं स्निग्धं अञ्जनाचलसन्निभ।
नातिह्रस्वं नातिस्थूलं वर्तुलं मध्यचक्रकम्॥

लक्ष्मीनारायणाख्यं जम्बूफलसमाकारं चित्रं कनकबिन्दुभिः।

चतुश्चक्रधरं देवं लक्ष्मीनारायणं विदुः।
लक्ष्मीनारायणं ज्ञेयं सर्वकामफलप्रदम्॥

अष्टैश्वर्यप्रदलक्ष्मीनारायणः॥

सुवर्णबिन्दुसंयुक्तं चतुश्चक्रैरलंकृतम् अधरोत्तर पार्श्वतः।
तन्मूर्त्तिदर्शनं पुण्यं अष्टैश्वर्यफलप्रदम्॥

त्रिरेखा लक्ष्मीनारायणः॥

रेखात्रययुतद्वारं पृष्ठचक्रेण लाञ्छितम्।

ध्वजवज्राङ्कुशोपेतं चतुश्चक्रसमन्वितम्॥

लक्ष्मीनारायणं प्राहुर्भुक्तिमुक्तिफलप्रदम्।
ध्वजवज्राङ्कितलक्ष्मीनारायणः॥

ध्वजवज्राङ्कितं पीतं पार्श्वे वामे च वर्तुलम्॥

दीर्घरेखासमोपेतं चतुश्चक्रसमन्वितम्।
लक्ष्मीनारायणं प्राहुः सर्वाभीष्टफलप्रदम्॥

नवदूर्वादललक्ष्मीनारायणः॥

नवदूर्वादलश्यामं वनमालाविभूषितम्।
श्रीवत्सशङ्खचक्राद्यैपञ्चायुधलसत्तनुम्।।

समसूक्ष्मलसच्चक्रैश्चतुश्चक्रैरलंकृतम्।
सदा सुशीतलतनुं अनन्तममलोज्ज्वलम्।।

पक्षिराजलक्ष्मीनारायणः।।

द्वारदेशे लसद्दंष्ट्रं पक्षिराजं खगेश्वरम्।
लक्ष्मीनारायणं प्राहुर्दुर्लभं भुवनत्रये।।

श्वेतरेखाद्वयलक्ष्मीनारायणः।।

एतल्लक्षणसंयुक्तं नागभोगविचेष्टितम्।
श्वेतरेखाद्वयोपेतं पद्माकरसमन्वितम्।।

द्विचक्रान्तरपीतस्तु चतुश्चक्रः सुवर्तुलः।
लक्ष्मीनारायणो देवो सर्वाभीष्टफलप्रदः।।

मध्ये सुषिरलक्ष्मीनारायणः।।

अधश्चोर्ध्वं पार्श्वयोश्च चक्रैरप्युपशोभितम्।
चतुर्भिर्मध्यसुषिरैर्लक्ष्मीनारायणं स्मृतम्।।

सुवर्णतालुलक्ष्मीनारायणः।।

वर्तुलं वर्तुलद्वारं त्रिगंभीरं सगह्वरम्।
समे चक्रे समे चैव शिरसा वनमालया।
सुवणतालुकृष्णाभं लक्ष्मीनारायणं विदुः।।

स्मितानमलक्ष्मीनारायणः।।

वर्तुलं वर्तुलद्वारं त्रिगंभीरं सगह्वरम्।
स्थरासन मतिस्निग्धं नातिस्थूलं स्मिताननम्।।

शक्तियुक्तस्य तद्रूपं वामपार्श्वे समन्वितम्।
लक्ष्मीनारायणो देवो भुक्तिमुक्तिफलप्रदः।।

एकचक्रलक्ष्मीनारायणः॥

ध्वजवज्राङ्‌कितं पीतं एकचक्रं सुवर्तुलम्।
लक्ष्मीनारायणं ज्ञेयं भुक्तिमुक्तिफलप्रदम्॥

Other forms of Nārāyaṇa dealt with here are; (1-3) Lakshmī-nārāyaṇa with a single chakra, and with two and three chakras, (4) Vīra-nārāyaṇa, (5) Śuddha-nārāyaṇa, (6) Śyāma-varṇa-nārāyaṇa, (7) Kṛṣṇa-varṣṇa-nārāyaṇa 98) Rūpa-nārāyaṇa, (9) Keśi-hantṛ-nārāyaṇa, (10) Mahādyuti-nārāyaṇa,, (11) vetrāṅka-nārāyaṇa, (with four chakras), (12-14) Lakshmī-nārāyaṇa, with 4, 6, 8 chakras and (15) Achakra-nārāyaṇa (with no chakra).

एकचक्रवीरनारायणः॥

तमालदलसंकाशः स्वर्णपङ्‌कविलेपवान्।
वीरो नारायणो वेद्यो ह्येकचक्रः सुशोभनः॥

द्विचक्रलक्ष्मीनारायणः॥

ध्वजवज्राङ्‌कुशोपेतं वामे चक्रे च वर्तुलम्।
लक्ष्मीनारायणं प्राहुर्भुक्तिमुक्तिफलप्रदम्॥

पद्माकृतिस्तथा रेखा लक्ष्यं मध्यमदेशतः।
ध्वजवज्रायुधोपेतो वामे चक्रं च वर्तुलम्।
लक्ष्मीनारायणो देवो ह्यभीष्टफलदायकः॥

अपरः द्विचक्रलक्ष्मीनारायणः॥

स्वर्णाकृतिस्तथा रेखा चक्रमध्यमदेशतः।
ध्वजवज्राङ्‌कुशैर्युक्तो वामे चक्रं च वर्तुलम्॥

लक्ष्मीनारायणो देवस्त्वभीष्टफलदः शुभः॥

द्विचक्रनारायणः॥

श्यामो नारायणो देवो नाभिचक्रस्तथोन्नतः।
दीर्घरेखाद्वयोपेतो दक्षिणे सुषिरं पृथु॥

शुद्धः श्यामः कृष्णवर्णो रूपनारायणस्तथा।
सुकेशी केशिहन्ता च वेत्राङ्कश्च महाद्युतिः॥

शुद्धनारायणः॥

नारायणो भवो भव्यो मध्यचक्रस्तथोन्नतः।
तद्धवेत्तु प्रयत्नेन सर्वपूजाफलं लभेत्॥

श्यामवर्णनारायणः॥

श्यामो नारायणो देवो नाभिचक्रस्तथोन्नतः।
दीर्घरेखात्रययुतस्सुवर्णवनमालिकः।
नारायणस्स सः विज्ञेयः अपमृत्युहरः परः॥

कृष्णवर्णनारायणः॥

श्यामो नारायणो नाम नाभिचक्रस्तथोन्नतः।
कृष्णवर्णस्तथा विष्णुः स्थूलचक्रः सुशोभनः॥

रूपनारायणः॥

मुसलासिधनुर्मालाशंखचक्रगदान्वितः।
रूपनारायणो देवो मुखे चापि मुखं धनुः॥

केशिहन्तृ नारायणः॥

नीलवर्णं तथा स्थूलं पृथुचक्रं सुशोभनम्।
सुकेशी केशिहंता च सर्वशत्रुविनाशनः॥

महाद्युतिनारायणः॥

स्वर्णबिन्दुसमायुक्तं कृष्णवर्णं महाद्युतिम्।
रेखात्रितयसंयुक्तं चक्रद्वयविभूषितम्॥

त्रिचक्रलक्ष्मीनारायणः॥

पाञ्चजन्यं गदापद्मं यत्र तत्र श्रियं विदुः।
कौस्तुभैः शोभनैर्युक्तं श्रीकर्या वनमालया॥

चतुश्चक्रयुतो वापि त्रिचक्रश्चैकचक्रवान्।
लक्ष्मीनारायणो देवः सर्वाभीष्टफलप्रदः॥

वेत्राङ्कचतुश्चक्रलक्ष्मीनारायणः॥

कृष्णवर्णं सुवृत्तं च वनमालोपशोभितम्।
ध्वजवेत्राङ्कुशाभं तं चतुश्चक्रसमन्वितम्॥

लक्ष्मीनारायणो देवो भुक्तिमुक्तिफलप्रदः॥

षट्चक्रलक्ष्मीनारायणः॥

श्यामो नारयणो देवो नाभिचक्रस्तथान्वितः।
दीर्घरेखात्रयोपेतो दक्षिणे सुषिरं पृथु॥

खगाकृतिस्तथा रेखा लक्ष्यते मध्यदेशतः।
द्वे चक्रे पार्श्वयुगले वामे चक्रचतुष्टयम्॥

लक्ष्मीनारायाणं देवं सर्वाभीष्टफलप्रदम्॥

अष्टचक्रलक्ष्मीनारायणः॥

मुसलासिधनुर्मालाशंखचक्रगदान्वितः।
लक्ष्मीनारायणो देवो मुखे नाभौ च नारद॥

लक्ष्मीनारायणो देवश्चतुर्भिश्चाष्टकैर्युतः।
यत्र तिष्ठति तत्क्षेत्रमष्टैश्वर्यफलप्रदम्॥

अचक्रनारायणः॥

श्यामो नारायणो देवो न चक्रं च ततोन्नतम्।
दीर्घरेखात्रयोपेतं दक्षिणे सुषिरं पृथु॥



Achakra – Nārāyaṇa

(3) MĀDHAVA-MŪRTI

There are only two varieties of Mādhava-śālagrāma mentioned here. Both are honey-coloured. One has a chakra in the middle, clear and smooth, and small-bodied. The other one is distinguished by a large chakra. The former is worshipped by ascetics who aspire to be emancipated.

माधवः॥

माधवो द्विविधो ज्ञेयस्तत्तल्लक्षणभेदतः।
मधुवर्णो मध्यचक्रो स्निग्धः सूक्ष्मतनुस्तथा॥

माधवः स तु विज्ञेयो यतीनां मोक्षदायकः॥

पुनर्माधवः॥

माधवो नाभिपार्श्वे तु पुष्याभं यत्र दृश्यते॥
स्थूलचक्रसमायुक्तं मधुवर्णं प्रकीर्तितम्॥

(4) GOVINDA-MŪRTI

The śālagrāmas specific to the Govinda form occur in two varieties. Both are perfectly round in shape and have the shape of a mace. One has the marks of lotus, mace and discus on the right side and of a mountain on the left. The other is not very small in size, but is dark in colour.

गोविन्दः॥

गोविन्दो द्विविधो ज्ञेयः गदाकारः प्रकाशते।
सुवर्तुलं तु सुस्निग्धं गदाकारं तु दक्षिणे।
दक्षिणेऽब्जगदाचक्रं वामे पर्वतलाञ्छनम्॥

पुनः गोविन्दः पुण्डरीकाक्षः कृष्णो विष्णुर्महाद्युतिः
नातिह्रस्वः कृष्णवर्णो गोविन्दः पंचवक्त्रकः॥

(5) VISHṆU-MŪRTI

Vishṇu śālagrāmas occur in six varieties in terms of colours: tawny (kapila), blue-black (kṛshṇa), red (raktābha), bright (suprakāśa), colour of Vishṇu-krānta flower, and colour of gold (hema).

विष्णुः॥

षड्भेदा विष्णुमूर्तीनां नानावर्णं खगाधिप।
कपिलं कृष्णवर्णं च रक्ताभं सुप्रकाशकम्।
विष्णुक्रांतं च हेमं च षट्भेद उच्यते बुधैः॥

वामचक्रो बृहद्द्वार उन्नतो मध्यनिम्नगः।
स कपिलः स्निग्धः वर्णे विष्णुर्विषयभेदतः॥

विष्णुक्रान्तः॥

विष्णुक्रांतनिभाकारो वनमालादिलक्ष्यवान्।
पंचायुधधरः श्रीमान् विष्णुरित्युच्यते बुधैः॥

स्थूलचक्रो भवेद्देवो मोक्षैकफलदोऽच्युतः।
क्षत्रियैः पूज्यते नित्यं धनधान्यं भवेत्सुधीः॥

रक्तवर्णं महाकांति विद्युत्पुञ्जनिभाननम्।
कन्दर्पधनुराकारैर्मस्तकोपरि शोभितम्॥

महाविष्णुरिति ख्यातो भुक्तिमुक्तिफलप्रदः।

सुप्रकाशविष्णुः॥

विष्णु : कृष्णाकृतिश्चैव स्थूलचक्रः सुशोभनः।
गदाकृतिस्तथा पृष्ठे लक्ष्यते मध्यदेशतः॥

वामचक्रं बृहद्द्वारो उन्नतो मध्यनिम्नगः।
स कपिलः स्निग्धवर्णः विष्णुर्विषयभोगतः॥

(6) MADHUSŪDANA-MŪRTI

There is but a single variety of madhusūdana-śālagrāma. It is a bright stone with all colours but with one chakra.

मधुसूदनः॥

मधुसूदनो महादेवो एकचक्रो महाद्युतिः।
सर्ववर्णसमायुक्तो महातेजःप्रदः शुभः॥

(7) TRIVIKRAMA-MŪRTI

The śālagrāmas answering to this iconic form occur in five varieties: (1) triangular in shape (trikoṇa), (2) blue-black in colour (śyāmala), (3) elongated (dirghākāra), (4) elephant-trunk-marked (pushkarānka) (5) banner-shaped (dhvajākāra).

त्रिविक्रमः॥

त्रिविक्रमः पञ्चभेदः त्रिकोणाकृतिः श्यामलः।
दीर्घाकारः पुष्कराङ्को ध्वजाकारः प्रकीर्तितः॥

त्रिकोणः॥

त्रिविक्रमस्त्रिकोणास्यश्चक्रत्रयविभूषितः।
प्रयत्नेन द्विजेन्द्राणां सदा पूज्यस्तु नेतरैः॥

पुनः श्यामवर्णः॥

त्रिविक्रमस्ततो देवः श्यामवर्णो महाद्युतिः।
वामभागे गदाचक्रे रेखा चैव तु दक्षिणे॥

दीर्घाकारः॥

दीर्घाकारमहातेजाः शङ्खचक्रगदाङ्कितः।
वनमालाधरः श्रीमांस्त्रिविक्रम उदाहृतः॥

पुष्कराङ्कः॥

कुक्कुटांडसमोपेतं ऊर्ध्वचक्रं सुशोभनम्।
द्वे चक्रे ह्येकभागे तु पूर्वभागे तु पुष्करम्॥

ध्वजाकारः॥

सनिम्ना तं शङ्खलाङ्गलसंयुतं त्रिविक्रमः।
त्रिविक्रमः स विज्ञेयः अपमृत्युहरः शुभः॥

(8) VĀMANA-MŪRTI

Details are already given while Daśāvatāra-forms are described.

वामनः॥

वामनो नारसिंहश्च कृष्णः प्रोक्तस्त्रयः पुरा।
उक्तत्वादत्र नोच्यन्ते प्रभेदैश्च सलक्षणैः॥

(9) ŚRĪDHARA-MŪRTI

The Śridhara-Śālagrāmas are of six types: (1) adorned with five lines, (2) with small countenance (aperture) (sūkṣhmānana), (3) with cakra in the hollow at the bottom, (4) small and round (hrasva) (5) green in hue like fresh grass, (śādvala) and (6) shaped liked the Kadamba-flower (kadamba-kusumākāra) and called wish-fulfilling (kāmada).

श्रीधरः॥

षड्भेदः श्रीधरः प्रोक्तो रेखापञ्चकसंयुतः।
सूक्ष्माननो निम्नचक्रः शाद्वलो ह्रस्व कामदः॥

पचरेखाश्रीधरः॥

श्रीधरस्तु तदा देवश्चिह्नितो वनमालया।
कदम्बकुसुमाकारो रेखापञ्चकसंयुतः॥

चक्रे तु मध्यदेशे तु पङ्कजेन समन्वितः।
सूक्ष्माननः श्यामलाभः स पुनः श्रीधरः स्मृतः॥

निम्नोदरः शिरः पार्श्वे निम्नवक्त्रं सुवर्तुलम्।
निम्नचक्रमतिह्रस्वं श्रीधरं सर्वसिद्धिदम्॥

नवशाद्वलसंकाशं वनमालाविभूषितम्।
किंचिद्विषमचक्राढ्यं श्रीकरं तं विदुः॥

ह्रस्वः सुवर्तुलः श्रीमान् पीतवर्णसमप्रभः।
श्रीधरस्तु तदा देवश्चिह्नितो वनमालया॥

कामदः॥

श्रीधरस्तु तदा देवश्चिह्नितो वनमालया।
कदम्बकुसुमाकारः सर्वकामफलप्रदः॥

(10) HṚSHĪKEŚA

The Hṛshikeśa-śālagrāmas occur in three varieties: (1) blue-black in colour (śyāmala), with ten chakras, (2) bluish hue (indra-nīla), with two chakras devoid of filaments on top and with one chakra with filaments at bottom, and (3) shaped like a half moon and adorned with five lines.

हृषीकेशः॥

त्रिभेदस्तु हृषीकेशः श्यामनीलकदम्बकाः।
कदम्बकुसुमाकारो रेखापञ्चकसंयुतः॥

अर्धचन्द्राकृतिर्देवो हृषीकेश उदाहृतः।
निष्केसर ऊर्ध्वचक्रस्त्वधश्चक्रः सकेसरः॥





Hṛshīkeśa

किञ्चिद्विषमचक्राढ्यं इन्द्रनीलसमप्रभम्।
हृषीकेशमिति प्राहुः शुद्धज्ञानप्रदायकम्॥

दशचक्रहृषीकेशः पञ्चरन्ध्रसमायुतः। (दशचक्रसमन्वितः)
श्यामलं कोमलाकारं हृषीकेशं प्रचक्षते॥

(11) PADMANĀBHA

The Padmanābha-śālagrāmas are in five varieties : (1) Aśatru-padmanābha, (2) Śubhadāyaka-padmanābha, (3) Nābhi-chakra-padmanābha, (4) Śaṅkha-varṇa-padmanābha, and (5) Chāmikara-padmanābha.

पद्मनाभः॥

पद्मनाभाः पंचभेदाः अशत्रुशुभदायकाः।
नाभिचक्रः शङ्खवर्णो हेमचक्रः प्रकीर्तितः॥

अशत्रुपद्मनाभः॥

पद्मनाभो भवेद्देवः शत्रूणां भयदायकः।
पद्मनाभ इति प्रोक्तो विपरीतो हलायुधः॥

शुभदायकः॥

वनमाला उभे कर्णे श्रीवत्साङ्कमवश्यके।
पद्मनाभो भवेद्देवः कल्याणवरदायकः॥

नाभिचक्रः॥

नाभिचक्रो लसन्मूर्तिजम्बूफलसमप्रभः।
पद्मनाभ इति प्रोक्तो विपरीतो हलायुधः॥

शङ्खवर्णः॥

दीर्घाकारं गुहान्तस्थं शङ्खं चोन्नतनाभिकम्।
पद्मनाभः स्थूलचक्रः शङ्खवर्णः सुशोभनः॥

चामीकरपद्मनाभः॥

ललाटे श्वेतनागस्तु ददर्शालोस्तु (?) काञ्चनः।
चक्रं काञ्चनवर्णं च पद्मनाभस्य लक्षणम्॥

(12) DĀMODARA

The Dāmodara-mūrti-śālagrāmas are also in five varieties: (1) Dūrvābha, (2) Nīla-megha, (3) Kapila, (4) Sūkshma-randhra, and (5) Gadākāra.



Dāmodara

दामोदरः॥

दामोदरः पंचभेदो दूर्वाभो नीलमेघवान्।
कपिलः सूक्ष्मरंध्रश्च गदाकारः तु दक्षिणे॥

दूर्वाभदामोदरः॥

दामोदरं तथा स्थूलं मध्यचक्रं प्रतिष्ठितम्।
दूर्वाभं द्वारसंकीर्णं पीतरेखायुतं शुभम्॥

नीलमेघः॥

रेखा यद्विलसन्मध्ये कालमेघसमप्रभम्।
वनमालालसत्कण्ठं प्राहुर्दामोदरं मुने॥



Nīlamegha Dāmodara

कपिलदामोदरः॥

स्थूलो दामोदरो ज्ञेयः सूक्ष्मरन्ध्रो भवेत्तु सः।
चक्रद्वयसमायुक्तः पूजा त्वस्य सुखप्रदा॥

गदाकारः॥

दामोदरं तथा स्थूलं मध्यचक्रं प्रतिष्ठितम्।
वर्तुलं स्निग्धकं चैव गदाकारं तु दक्षिणे॥

(13) SAṄKARSHAṆA

There are only four varieties of Saṅkarshaṇa paraśu-rāma-śālagrama: (1) Rāja-pūjya-paraśurāma, (2) Śānta-paraśurāma, (3) Atasi-pushpa-paraśurāma and (4) Dūrvābha-paraśurāma.

संकर्षणः॥ परशुरामः॥

चतुर्धा परशुरामः च राजपूज्यः सुशांतिदः।
अतसीपुष्पसंकाशो दूर्वादलनिभप्रभः॥

राजपूज्यः॥

सितकृष्णारुणोपेतं दीर्घद्वारं बृहद्बिलम्।
भित्तिभागे गतं चक्रं वामे वा दक्षिणेऽपि वा।
चक्रभागे भवेद् बिन्दुः परश्वाकृतिरेखया॥

पृष्ठे वा पार्श्वतो वाथ रेखा दंष्ट्राकृतिर्भवेत्।
जामदग्निस्तु भगवान् स्वर्चनीयो महीभृताम्॥

शान्तः॥

केवलं लाञ्छितं पृष्ठे परश्वाकृतिरेखया।
स जामदग्निस्तु भगवान् शान्ताख्यो शान्तिदोऽर्चितः॥

अतसीपुष्पः॥

अतसीपुष्पसंकाशं बिन्दुना परिभूषितम्।
पीतवर्णधनुर्बाणं परशुलांछनभूषितम्॥
राममूर्तिरिति ख्यातं सर्वमृत्युरं शुभम्॥

दूर्वाभः॥

लसत्परशुरेखाढ्यो दूर्वाश्यामस्ततोऽन्ततः।
नाभिदेशे लसच्चक्रो रामः स्याज्जमदग्निजः॥

(14) VĀSUDEVA-MŪRTI

Vāsudeva-mūrti-śālagrāmas are popular and frequently found. The varieties mentioned here include (1) Chandrābha-vāsudeva, (2) Dvārakā-chakra-vāsudeva, (3) pūgīphala-vāsudeva, (4) Chhidraprshṭha-vāsudeva, (5) padmayukta-vāsudeva and (6) Nilotpala-vāsudeva.

वासुदेवः॥

वासुदेवस्तु चन्द्राभो द्वारकाचक्रसंयुतः।
गुदं च छिद्रपृष्ठं च पद्मनीलोत्पलप्रभः॥

चन्द्राभवासुदेवः॥

रेखापश्चायुधधरो हिमांशुसदृशप्रभः।
नाभिचक्रधरः शान्तो वासुदेव उदाहृतः॥

द्वारकाचक्रवासुदेवः॥

द्वारदेशे समे चक्रे दृश्येते नान्तिरीयके।
वासुदेवः स विज्ञेयः शुक्लाभश्चारुशोभनः॥

पूगीफलवासुदेवः॥

पूगीफलसमाकारं ह्रस्वं च परिवर्तुलं।
द्वारदेशे समे चक्रे दृश्येते नान्तरीयके॥

छिद्रपृष्ठवासुदेवः॥

पृष्ठभागे तथा छिद्रं बिन्दुना परिभूषितम्।
ललाटे श्वेतनागस्तु वासुदेवस्य लक्षणम्॥

पद्मयुक्तवासुदेवः॥

रेखाभिरावृतं वापि पद्मयुक्तमथाऽपि वा।
द्वारदेशे समे चक्रे दृश्येते नान्तरीयके॥

वासुदेवः स विज्ञेयः शुक्लाभश्चारुविग्रहः।
अपमृत्युहरः शीघ्रं सर्वकामफलप्रदः॥

नीलोत्पलवासुदेवः॥

नीलोत्पलदलाकारं दीप्तचक्रं च वक्त्रकम्।
वासुदेवस्त्वखिलदः अनन्तश्चोत्पलप्रभः॥



Vāsudeva – Mūrti

(15) PRADYUMNA-MŪRTI

The Pradyumna-śālagrāmas occur in four varieties: (1) with numerous fissures (bahuchchidra), (2) dark-coloured (kṛshṇa-varṇa), (3) of the complexion of mythical marine creature (makarābha), and (4) of red hue like hibiscus (japā-prabha).

प्रद्युम्नः॥

प्रद्युम्नोऽपि चतुर्भेदस्तत्तल्लक्षणमुच्यते।
बहुच्छिद्रः कृष्णवर्णः मकराभो जपाप्रभः॥

बहुच्छिद्रप्रद्युम्नः॥

सूक्ष्ममूर्त्तिस्तु पीतस्तु दीर्घदीप्तस्तथैव च।
सुषिरं बहुलं चैव दीर्घाकारं तु यद्भवेत्॥

कृष्णवर्णः॥

कृष्णवर्णं दीर्घचक्रं बिन्दुद्वयसमायुतम्।
प्रद्युम्नमिति विख्यातं सर्वैश्वर्यं प्रयच्छति॥

एतल्लक्षणसंयुक्तं सूक्ष्मचक्रं लसन्मुखम्।
स्वर्णाभो धान्यरेखकः अनिरुद्धं विदुर्बुधाः॥

मकराभः॥

प्रद्युम्नः सूक्ष्मवक्रस्तु दीर्घाकारसमन्वितः।
मकराभा भवेद्रेखा पार्श्वतः पृष्ठतोऽपि वा॥

जपाकुसुमः॥

जपाकुसुमसङ्काशं बिन्दुना परिभूषितम्।
वनमालाम्बुजधरं प्रद्युम्न इति तं विदुः॥

(16) ANIRUDDHA-MŪRTI

The śālagrāmas recognized as specific to this incarnatory form occurs in five varieties : (1) with gold and bronze streaks (svarṇa-kāmsya-rekhāḍhya), (2) stable and poised when placed (susthira), (3) with three lines marked (tri-rekha), (4) dark coloured (kṛshṇa-varṇa), and (5) yellow-hued (pitavān)

अनिरुद्धः॥

अनिरुद्धः पञ्चभेदः स्वर्णकांस्याङ्करेखवान्।
सुस्थिरश्च त्रिरेखश्च कृष्णवर्णः सुपीतवान्॥

एतल्लक्षणसंयुक्तं-सूक्ष्मचक्रं लसन्मुखम्।
सुवर्णाकांस्यरेखाढ्यम् अनिरुद्धं विदुर्बुधाः॥

सुस्थिरः॥

सुस्थिरं छिद्रबहुलं प्रदीप्ताकार एव च।
अनिरुद्धस्तु नीलाभो वर्तुलश्चातिशोभनः॥

त्रिरेखा॥

रेखात्रययुतं द्वारे पृष्ठे पद्मेन लाञ्छितम्।
कृष्णमेव समं द्वारं चक्रमास्यसमीपगम्॥

सूक्ष्मचक्रं भवेदूर्ध्वं पार्श्वे चणकपुष्पवत्।
अनिरुद्ध इति प्रोक्तः सर्वलोकैककारणम्॥

कृष्णवर्णः॥

कृष्णवर्णं तथा पद्मं द्वारं सङ्कीर्णमेव च।
अनिरुद्ध इति ख्यातं सर्वकामफलप्रदम्॥

पीतवर्णः॥

अनिरुद्धः पीतवर्णः वर्तुलश्चातिशोभनः।
रेखात्रयं च तद्द्वारं पृष्ठे पद्मेन लाञ्छितम्।
सर्वकामफलं नित्यं पूजितो नात्र संशयः॥

Among the Chatur-mūrti-śālagrāmas, Vāsudeva is to be worshipped by the brāhmaṇas, Saṅkarshaṇa by the kshatriyas, Pradyumna by the vaiśyas, and Aniruddha by the śūdras. The brāhmaṇas, however, may worship all the four forms, the kshatriyas three of them, the vaiśyas two of them and the śūdras one only.

वासुदेवो विप्रजनैरिष्टः स्यात्पूजकैः सदा।
सङ्कर्षणः क्षत्रियैः स्यात्प्रद्युम्नो वैश्यपूजितः॥

अनिरुद्धस्तु शूद्राणां पूज्यः सर्ववरप्रदः।
विप्राणां मूर्त्तयः सर्वाः पूजनीया विशेषतः॥

क्षत्रियस्य त्रयः पूज्याः वैश्यस्य द्वयमेव च।
शूद्रस्यैका भवेत्तार्क्ष्य सर्वदा सर्वसिद्धये॥

(17) PURUSHOTTAMA

There are eight varieties of Purushottama-śālagrāma, five of which are described here: (1) Dvārachakra-purushottama, (2) Trailokyamochana, (3) Atasi-pushpa-saṅkāśa, (4) Padmini-patra-saṅkāśa, and (5) Ananta-purushottama.

पुरुषोत्तमः॥

अष्टभेदाः प्रकारेण पुरुषोत्तमसंज्ञकः।
अतसीपुष्पसङ्काशं बिन्दुना परिभूषितम्॥

पारिजातं ध्वजं वज्रं वर्तुलश्चातिशोभनः।
पुरुषोत्तमः स विज्ञेयः सर्वसौभाग्यवर्धनः॥

द्वारचक्रपुरुषोत्तमः॥

पुरुषोत्तमसंज्ञस्तु चक्रद्वारप्रदेशतः।
पाशाङ्कुशधृतिश्चक्रे पार्श्वे बाह्वोःऽथवा खग॥

खगासनमहाक्रूरो बाणासनसमीपगः।
उभे वक्त्रे प्रदृश्येते स भवेत्पुरुषोत्तमः॥

महासौभाग्यदः प्रोक्तः सदा त्रैलोक्यमोहनः।
द्वे चक्रे द्वारदेशे तु कृष्णवर्णः सबिन्दुकः॥

पुरुषोत्तमः स विज्ञेयः स चक्राङ्कितमस्तकः।
अतसीपुष्पसङ्काशः बिन्दुना परिभूषितः॥

पद्मिनीपत्रसङ्काशो वर्तुलश्चातिशोभनः।
पुरुषोत्तमः स विज्ञेयः भोगमोक्षफलप्रदः॥

मध्यचक्रसुवर्णश्च मस्तके पृथुचक्रकः।
पुरुषोत्तमः स विज्ञेयः साधुसौभाग्यदायकः॥

अधरे मूर्धचक्राद्यो अनन्तः पुरुषोत्तमः।

यस्या मूर्त्तेरुत्तमांगे चारुचक्रसमन्विता।
तत्तन्मूर्त्तिः खगेशान तन्नाम्ना पुरुषोत्तमः॥

(18) ADHOKSHAJA-MŪRTI

This śālagrāma has no varieties. It is extremely dark in colour, but has a red streak on it; it is round in shape, and has chakras. It may be somewhat tawny at places, small or large.

अधोक्षजः॥

अतिकृष्णो रक्तरेखो वृत्तदेहस्तु चक्रवान्।
किंचित्कपिलसंयुक्तः सूक्ष्मो वा स्थूल एव च।
अधोक्षज इति ख्यातः पूजकस्य शुभप्रदः॥

(19) NARASIMHA-MŪRTI

Details are given under Daśāvatāra-forms.

(20) ACHYUTA

This śālagrāma occurs is five varieties: (1) having the colour of mud or curds (samṛdvarṇa, dadhi-varṇābha), (2) having two ear-rings like scratches (kuṇḍala-dvayasamyuta, (3) multi-coloured (chitra), (4) moon-hued, having the mark of vanamālā (himāṃśu varṇa,) and (5) with small aperture (sūkshmarandhra).

अच्युतः॥

पञ्चभेदाः सुमृद्वर्णः कुण्डलद्वयसंयुतः।
चित्रो हिमांशुवर्णश्च सूक्ष्मरंध्रः प्रकीर्तितः॥

अच्युतो दधिवर्णाभो ह्रस्वचक्रः सुशोभन।
पार्श्वबिन्दुसमायुक्तो नैष्ठिकैरर्चितो भवेत्॥

चतुर्भिरष्टचक्रैस्तु वामदक्षिणपार्श्वतः।
अधिष्ठिते मुखेऽप्येकं कुण्डलद्वयशोभितम्।
शङ्खचक्रगदाशार्ङ्गबाणकौमोदकीधरः॥

(21) JANĀRDANA

This śālagrāma occurs in seven varieties: (1) Putra-lābha, (worship of which bestows progeny), (2) Śirahśyāma (with black stain on top), (3) Śri-prada (prosperity-provider, with four chakras), (4) Utpala-prabha (shining like a water-lily, blue coloured and large stone), (5) Dvādaśa-chakra (with 12 chakras and 6 openings) (6) Nilotpala-samākāra (shaped like the blue lily), and (7) śaṅkha-chakrānkita (marks of conch-shell and discus present)

जनार्दनः॥

पुत्रलाभं शिरःश्यामं श्रीप्रदं चोऽत्पलप्रभम्।
शङ्खचक्राङ्कितश्चैव चक्रद्वादश संख्यया॥

पुत्रलाभः॥

द्वारद्वये चतुश्चक्रः समद्वारविभूषितः।
जनार्दनः स विज्ञेयः पुत्रलाभं प्रयच्छति॥

शिरःश्यामः॥

जनार्दनो नाम देवः शिरःश्यामः सुवर्णकः।
वासुदेवफलं यत्र जन्ममृत्युजरापहम्॥

श्रीप्रदः॥

पूर्वभागैकवदनं पश्चादेकास्यसंयुतम्।
जनार्दनश्चतुश्चक्रः श्रीप्रदो रिपुनाशनः॥

उत्पलप्रभः॥

अन्तर्लक्ष्यं चतुश्चक्रं शीतलं चोत्पलप्रम्।
जनार्दनं विजानन्ति वनमालाविभूषितम्॥

शङ्खचक्रगदाब्जमालाङ्को नीलस्थूलाकृतिः शुभः।
जनार्दन इति ख्यातो हिमांशुपरिशीतलः॥

द्वारषट्कसमायुक्तं चक्रद्वादशकोज्वलम्।
वनमालायुतं श्लक्ष्णमाहुः सर्वे जनार्दनम्॥

नीलोत्पलदलप्रख्यं नातिह्रस्वस्मितातननम्।
जनार्दनं गृहस्थानामखिलार्थसहस्त्रदम्॥

(22) UPENDRA-MŪRTI

This śālagrāma occurs in two varieties (1) maṇi-varṇābha (stone with reddish hue, and small chakra), and (2) śyāmala (dark-coloured, with chakras on the sides).

उपेन्द्रः॥

उपेन्द्रं द्विविधं प्रोक्तं हरिमूर्त्तिस्तथैव च।
उपेन्द्रो मणिवर्णाभे ह्रस्वचक्रोऽतिशोभनः॥

श्यमलं कोमलाकारं तस्य पार्श्वेऽपि चक्रयुक्॥

(23) HARI-MŪRTI

This śālagrāma also has two varieties (1) having a small opening (alpa-dvāra), and (2) blue coloured (nīla-varṇa) and having the marks of conch-shell, discus and mace.

हरिमूर्त्तिः॥

अल्पद्वारसमोपेता हरिमूर्त्तिरुदाहृता।
शङ्खचक्रगदाचिह्नो नीलवर्णो लसत्तनुः।
उपेन्द्र इति विख्यातो हरिः सौख्यसुखप्रदः॥

(24) KṚSHṆA-MŪRTI

This occurs in a single variety: black in colour, having even number of chakras at the opening. The other forms are given under Daśāvatāra.

श्रीकृष्णः॥

समचक्रो द्वारदेशे कृष्णवर्णः सुशोभनः।
सा कृष्णमूर्त्तिर्विज्ञेया पूजिता सौख्यदायिनी॥

VIII SECTION EIGHT

This section deals with the śālgrāmas associated with the minor forms of Vishṇu, like Hayagrīva, Kapila, Dattātreya, Śimśumāra, Mukunda, Hamsa, Parama-hamsa, Vaikuṇṭha, Puṇḍarīkāksha, Lakshmīpati, Devadeva, Vaṭapatra-śāyai, Arbhaka, Kshirābdhi-śāyi Viśvambhara, Viśva-rūpa, Garuḍa-dhvaja, Pītāmbara, Satya-vīra-śravā, Amṛtāharaṇa, Chakra-pāṇi, Māyānārā- yaṇa, Bahu-rūpa-mūrti, Puṇdarika, Pārijāta, Sudarśana (many forms), Jagadyoni, Ananta, Śesha and Lakshmīkānta. There are also

śālagrāmas representing composite forms like Hari-mūrti-trimūrti, Harihara-mūrti and Śankara-nārāyaṇa.



Hayāsya

अष्टवर्गहयग्रीवः॥

हयग्रीवोऽष्टभेदः स्यात्तत्तल्लक्षणमुच्यते।
अङ्कुशाकारवदनो दीर्घबिन्दुसमुज्वलः॥

पद्मजम्बूफलाकारो हयग्रीव इति स्मृतः॥

कपिलो वर्त्तुलोऽत्यंतस्पष्टचक्रसमन्वितः।
पञ्चबिन्दुसमोपेतो वरविद्याप्रदो नृणाम्।
हयग्रीवो यशःकायो रेखा पञ्च भवन्ति हि॥

मधुबिन्दुसमो वर्णः पृष्ठे नीलसमीपगः।
अश्वाकृतिमुखाकारः साक्षमालः सपुस्तकः॥

पद्माकृतिर्भवेन्मुद्रा हयग्रीवः प्रकीर्तितः।
दीर्घग्रीवमधोवक्त्रमल्पवक्त्रमकल्मषम्॥

हयग्रीवमिति ख्यातं संसारभयमोचनम्।
हयग्रावोंऽकुशाकारो रेखाकारसमन्वितः॥

कृष्णवर्णस्स विख्यातो महासारस्वतप्रदः।
हयग्रीवो हि भगवान् रक्तपीतविमिश्रितः॥

अङ्कुशाकृतिकस्ताक्ष्र्य चक्रद्वयसमन्वितः।
पद्माकृतिस्तदा पार्श्वे कुण्डलाकृतिरेव वा।
ज्ञानदो मोक्षदो नृणां भोगदो विनतासुत॥



Hayagrīva

कपिलायज्ञमूर्तिः॥

यज्ञमूर्त्तिस्तु भगवान्रक्तपीतविमिश्रितः।
द्वारस्य वामतश्चक्रं स्त्रुक्स्त्रुवौ दक्षिणेऽपि च।
यज्ञमूर्त्तिस्तु भगवान्सर्वकामफलप्रदः॥

दत्तात्रेयः॥

सितारुणोऽसितापश्च ह्रस्वापृष्ठोन्नतो भवेत्।
अक्षमालाकृतिः पृष्ठे दत्तात्रेयः शुभप्रदः॥

शिंशुमारोः॥

शिशुमारो दीर्घकायो बिलशालः सगह्वरः।
उन्नतं पुच्छभागे तु चक्रेणैकेन संयुतः॥

सर्वदा स तु विज्ञेयः सर्वसिद्धिप्रदायकः।

मुकुन्दमूर्तिः॥

षणमुखेन मुकुन्दाख्या सदा मुक्तिप्रदायकः॥

हंसमूर्तिः॥

हंसस्तु धनुराकारो नीलश्वेतविमिश्रितः।
चक्रपद्मासनोपेतः केवलं मोक्षदो भवेत्॥

पुनः हंसः शङ्खाकृतिश्चैव नाभिचक्रस्तथोन्नतः।
दक्षिणे चोत्पलाकारो वामे कुमुदषण्मुखे।
दृश्यते कौस्तुभाकारश्चतुर्वर्गफलप्रदः॥

परमहंसः॥

धनुः शङ्खयुतावृत्ती त्रिभेदा हंसमूर्त्तयः।
परं हंसः खगेशान शिखण्डिगलसन्निभः॥

स्निग्धमायतवृत्तं च वर्तुलद्वारसंयुतम्।
बिलमध्ये तथा चक्रं दृश्यतेऽत्यन्तशोभनम्॥

चक्रस्य दक्षिणे पार्श्वे द्विमणिर्भासुरो भवेत्।
वकुलाकृतिवद्वामे दृश्यते विनतासुत।
मूर्त्तिः परमहंसाख्या चतुर्वर्गफलप्रदा॥

वैकुण्ठः॥

वैकुण्ठो द्विविधो ज्ञेयः तत्तल्लक्षणभेदतः।
वैकुण्ठः मणिवर्णाभो वामपार्श्वैकचक्रवान्॥

हारोपरि तथा रेखा पद्माकारः सुशोभनः।
रेखाष्टकसमोपेतं पद्मं सदृशगौरवम्।
वनमालायुतं श्यामं वैकुण्ठं परमं विदुः॥

पुण्डरीकाक्षः॥

एकचक्रयुतोपेतं शुक्लवर्णसमन्वितम्।
पुंण्डरीकाक्षमूर्त्तिः स्यात्सर्वलोकैकशङ्करः॥

लक्ष्मीपतिः।।

मुखे वा पार्श्वतो वापि मयूरगलसंनिभम्।
कृष्णवर्णं सूक्ष्मचक्रं पृथुलास्यसमन्वितम्।
लक्ष्मीपतिरिति ख्यातो लक्ष्मीसंपत्तिदायकः।।



Lakshmī-pati

देवदेवः।

विदिक्षु दिक्षु सर्वासां प्रदृश्यन्ते समन्वितम्।
स देवदेवो विज्ञेयः पुराणपुरुषोत्तमः।।

वटपत्रशायी भगवान्वर्तुलोऽप्यतिशोभनः।
क्षीरबिन्दुवप्येतन्न श्वेतप्रभस्तथा।
चक्रस्य वामतः शङ्खं दक्षिणे पद्ममेव च।।

अर्भकः।

अर्भको वटपत्राभः दीर्घो वा वर्तुलः शुभः।
दक्षिणे चक्रपद्माङ्कौ वर्तेते सुमनोहरे।

क्षीराब्धिशायी।।

एकचक्रं तु वदने पञ्चायुधलसत्तनुः।
चक्रस्योभयपार्श्वे तु फणापञ्चकशोभितम्।।

सुवर्तुलं सुस्निग्धं क्षीराब्धिशयनं विदुः।
प्रदक्षिणावर्तचक्रं वनमालाविभूषितम्।।

कृष्णवर्णयुतश्चापि धनधान्यसुखप्रदः।
पूजनीयः प्रयत्नेन स्थिरः स्निग्धः च वर्तुलः॥

विश्वम्भरः॥

चक्राणां चापि विंशत्या युक्तो विश्वम्भरः स्मृतः।

श्यामो द्वादशरध्रस्तु चतुर्विंशातिचक्रवान्।
विश्वम्भर इति ख्यातः सर्वसौभाग्यदायकः॥

विश्वरूपः॥

विश्वरूपोऽथ भगवान् द्विविधः परिकीर्तितः।
पञ्चवक्त्रं स्थूलतरं परुषं बहुचक्रकम्।
विश्वरूपमनन्तं वा पुत्रपौत्राधिकप्रदम्॥

पुनः चतुश्चक्रविश्वपमूर्त्तिः॥

वक्त्रस्य वामतः शङ्खं दक्षिणे पद्ममेव च।

वदने मध्यदेशे तु चतुश्चक्रः सबिन्दुकः।
विश्वरूपो हरिः साक्षात्पारावतपदोपमः॥

गरुडध्वजः॥

स्वर्णशृङ्गशिरः सौम्यो वर्तुलः स्निग्धकेसरः।
चक्रमध्ये गते कृष्णे रेखाबिन्दुविभूषितः।
लक्ष्मीकरो वैनतेयः गरुडध्वजसंज्ञिकः॥

पीताम्बरः॥

पीताम्बरधरो मूर्तिस्त्रिविधोऽत्र प्रकीर्तितः।
स्निग्धगोरोचनापीतो द्विचक्रो वर्तुलोऽपि च॥

पीताम्बरधरो देवो साम्राज्यफलदायकः।
द्वारदेशे भवेच्चक्रं बहुवर्णसमन्वितः।
पीताम्बरधरो देवः सर्वैकफलदोऽर्चितः॥

सत्यवीरश्रवा:॥

सुवर्तुलो ह्रस्वचक्रः सर्वाङ्गे हेमबिंदुकः।
सत्यवीरश्रवाः प्रोक्तः सर्वसौभाग्यवर्धनः॥

अमृताहरणः॥

अमृताहरणो देवो नीलोत्पलसमप्रभः।
वर्तुलो ह्रस्ववदनो मध्यचक्रोऽतिकोमलः॥

चक्रपाणिः॥

पूर्वभागे त्रिवदनः पश्चादेकेन संयुतः।
चक्रपाणिरिति ख्यातश्चक्रवर्तिप्रदायकः॥

मायानारायणः॥

निर्मले सुमुखे चक्रे मध्ये चक्रेऽतिशोभने।
ताटङ्कनासाभरणहारकेयूरलाञ्छनः।
मायानारायणो देवः सर्वकामफलप्रदः॥

बहुरूपमूर्तिः॥

अभ्यन्तरे पृथुश्चक्रो बहुलास्यः समन्ततः।
बहुरूपः समाख्यातः पूजकस्य शुभप्रद॥



Bahurūpi

पुण्डरीकः॥

एकचक्रयुतो वक्त्रे शुक्लवर्णसमन्वितः।
पुण्डरीकः समाख्यातः पूजितो मोक्षदायकः॥

पारिजातः॥

अण्डोपरि द्विचक्राढ्यः पारिजातः परः स्मृतः।
ब्रह्मचर्यव्रतस्थेन पूजनीयः प्रयत्नतः॥

Sudarśana-śālagrāma is said to have twelve varieties, among which (1) Sudarśana, (2) Yati-sudarśana, (3) Nṛsimha-sudarśana, (4) Mahāvishṇu-sudarśana, (5) Ubhaya-sudarśana, (6) Mahogra-sudarśana, (7) Deva-sudarśana, (8) Lakshmi-sudarśana, (9) Eka-vaktra-sudarśana and (10) Trailokya-sudarśana are described here.

सुर्दशनः॥

सुदर्शनमहादेवो ज्ञेयो द्वादश संख्यया।
एकचक्रं शिरोदेशे कृष्णवर्णमुखस्तथा।
सुदर्शनस्तु विज्ञेयः सर्वपापप्रणाशनः॥

यतिसुदर्शनः॥

पद्माकारो बृहद्वक्त्रो निम्नाभिः सुदर्शनः।
यतिभिः सेवनीयश्च एकचक्रः सुरान्तकः॥

नृसिंहसुदर्शनः॥

कपिलो नारसिंहश्च पृष्ठे वा स्थूलचक्रिणम्।
वनमालासुनिष्पन्नं पृथुचक्रं सुदर्शनम्।
ब्रह्मचर्येण संपूज्यं भुक्तिमुक्तिफलप्रदम्॥

महाविष्णुसुदर्शनः॥

सुदर्शनं महाविष्णुं रेखाचक्रमहाद्युतिम्।
कृष्णवर्णमिति ख्यातम् अपमृत्युहरं शुभम्॥

उभयसुदर्शनः॥

वृत्ताकारं तु तद्दीर्घं द्वारि पृष्ठे द्विचक्रकम्।
सुदर्शनं विजानन्ति बिन्दुयुक्तं विचक्षणाः॥

महोग्रसुदर्शनः॥

चक्रद्वयं नास्ति बिलं ऊर्ध्ववक्त्रं सुदर्शनम्।
दक्षिणेऽब्जगदाचक्रे कोष्ठे पर्वतलाञ्छितम्॥

गोविन्दं पुण्डरीकाक्षं कृष्णं विष्णुं महाद्युतिम्।
दक्षिणे शुद्धचक्राब्जं वामे पर्वतलाञ्छितम्॥

देवसुदर्शनः॥

कदम्बकुसुमाकारं रेखापञ्चकसंयुतम्।
सुदर्शनं तथा वामे देवचक्रं महाद्युतिः॥



Sudarśana – śāgrāma

लक्ष्मीसुदर्शनः॥

सुदर्शनमहाचक्रे त्रैलोक्यं सचराचरम्।
रमया सह देवोऽपि स्वयं तिष्ठति सर्वदा।
चक्रद्वयं बिलं नास्ति ऊर्ध्ववक्त्रं सुदर्शनम्॥

एकवक्त्रसुदर्शनः॥

पृष्ठे वा पार्श्वतो वाऽपि मध्ये वाऽप्येकचक्रवान्।
बाह्ये वाऽभ्यन्तरे वापि सुदर्शन इति स्मृतः॥

त्रैलोक्यसुदर्शनः॥

सुदर्शनमहाचक्रे त्रैलोक्यं सचराचरम्।
रमया सह देवोऽपि स्वयं तिष्ठति सर्वदा॥



Ananta-śālagrāma occurs in five varieties: (1) yellow-coloured (2) black-coloured, (3) blue-black in hue, (4) multi-coloured, and marked with serpent-hood and (5) with fourteen apertures. Some śālagrāmas are distinguished with a number of chakras, fourteen to twenty; they may occur in many colours. They may be large in size, and may be marked by scratches calling to mind banner, conch-discus and mace.

अनन्तः॥

पंचभेदास्तदाऽनन्तो नानावर्णसमन्वितः।
चतुर्दशबिलोपेतः द्वारचक्रेण लाञ्छितः॥

नानावर्णो ह्यनन्तात्मा नानाभोगेन चिह्नितः।
ध्वजाकारस्थिता रेखा लक्ष्यते मध्यदेशतः॥

दीर्घाकारं महास्थूलं सप्तचक्रसमविन्तम्।
अथवाऽष्टचक्रं तु दशचक्रं शुभावहम्॥

त्रयोदशं महापुण्यं चतुर्दशमहाफलम्।
पीतवर्णं तथा कृष्णं बहुवर्णं च श्यामलम्॥

चक्रं शङ्खं च पद्मं च वनमालाविभूषितम्।
अनन्तमूर्त्तिर्विज्ञेया सर्वकामफलप्रदा।
अनन्तशायिनं स्थूलं चक्रं चन्द्रसमद्युतिः॥

दारिद्र्यनाशनं पुंसां आयुरारोग्यमोक्षदम्।
नानावर्णसमायुक्तं नागेनाऽथ विचेष्टितम्।

स प्रयत्नेन पूज्यात्मा शिला स्निग्धा च शीतला।

चतुर्दशद्विप्रभृतिविंशद्वा चक्रलाञ्छितम्।
नानावर्णा ह्यनन्तात्मा नागभोगेन चिह्निता।
अनन्तमूर्त्तिर्विज्ञेया सर्वकामफलप्रदा।।

अव्ययमूर्त्तिः।।

बहुवर्णो द्वारचक्रः सौख्यदः फलदोऽर्चितः।
जम्बूफलनिभाकारं वर्तुलं स्निग्धकान्तिदम्।।

मध्ये वक्त्रयुतं तार्क्ष्यं पूजयेद्देवमव्ययम्।
पक्वजम्बूफलाभं च स्निग्धं वर्तुलमेव च।।

नूतनामलकस्थूलं स्वर्णबिन्दुसमन्वितम्।
अष्टचक्रोडुरेखाख्यं निर्मलाभिः समंततः।
बहुवर्णो द्वारचक्रः स ख्यातः पूजितोऽव्ययः।।

हरिमूर्त्तिस्त्रिमूर्त्तिः।।

त्रिमूर्त्तिस्त्रिविधा प्रोक्ता नानाकामफलप्रदा।
ऊर्ध्वाधस्तात् त्रिवदनः षट्चक्रः श्यामलो विभुः।
त्रिमूर्तिरिति विख्यातः सर्वसौभाग्यदायकः।।



Harihara Mūrti

चक्रत्रयसमोपेतः त्रिमूर्तिः स्याच्छुभप्रदः।
शङ्खक्रादि कमलकमण्डलुविशारदः।
वनमालात्रयोपेतं मूर्त्तित्रयमिदं विदुः॥

हरिहरमूर्त्तिः॥

शिवनाभिस्तस्य मूर्ध्नि पृष्ठे वाऽपि भवेद्यदि।
एतद्धरिहरं विद्यात्सुखसौभाग्यवर्धनम्॥



पुनः चतुर्वक्त्रो हरिहरः द्वैतदाप्यदः।
विनश्यति गृहस्थानां धनं क्षेत्रं कुलं क्रमात्॥

शंकरनारायणः॥

शिवनाभयुतः पार्श्वे वामे वा दक्षिणेऽपि वा।
स व शंकरपूर्वाख्यनारायण इतीरितः॥

द्विलिङ्गे वा त्रिलिङ्गे वा चतुःपंच च लिंगवान्।
तत्तु शंकरनामा स्याद्देवो देवत्वदायकः॥

लक्ष्मीकान्तः॥

नानावर्णं तु तत्रैव नागभोगेन जीवितम्।
तदा वरप्रसादेन लक्ष्मीकान्तं वदाम्यहम्॥

SECTION NINE

The śālagrāmas identified as specific to the form of Brahmā, the creator, one of the celebrated trinity (Vishṇu and Rudra being the other two), are dealt with in this section: Svayambhū, Paramcshṭi, Hiraṇya-garbha, Brahma-mūrti, and Chaturmukha. This account is followed by descriptions of Garuḍa-śālagrāmas and Śesha-śalagrāmas. Balaśāli-rāma-śālagrama has been given as a variety of the latter.

स्वयम्भूः॥

मूर्ध्नि वर्तुलरेखाभिराभूतो नीलवर्णवान्।
दीर्घास्यो बहुवक्त्रस्तु स्वयम्भूरिति वर्तुलः॥

केवलं मोक्षफलदो ह्यर्चकस्य न संशयः।
चतुर्दशप्रकाराः स्युः ब्रह्ममूर्त्तिर्महाप्रभुः॥

तत्रापि परमेष्ठी द्वे स्वर्णगर्भाष्टभेदतः।
हिरण्यगर्भस्तन्मध्ये त्रिच्छिद्रोर्ध्वरेखवान्॥

अमुक्तः स्वर्णबिन्दुश्च स्वर्णगर्भः प्रकीर्तितः।
हिरण्यगर्भो भगवान् पवित्रं भुवि दुर्लभम्।
चक्रयुक्ताऽपि रेखास्तु चक्रहीने त्रयो विदुः॥

पितामहश्चतुर्वक्त्रं नानभेदःस उच्चते।
परमेष्ठी तु शुक्लाभ एकचक्रं तथाम्बुजम्॥

सुवर्तुलं तथा पीतं पृष्ठे तु सुषिरं भवेत्।
ब्रह्ममूर्त्तिः स विज्ञेयो भोगमोक्षफलप्रदः॥

परमेष्ठी तु शुक्लाभमेकचक्रं तथाम्बुजम्।
सुवर्तुलं तथा पीतं पृष्ठे तु सुषिरं भवेत्॥

ब्रह्ममूर्तिः स विज्ञेयो भोगमोक्षफलप्रदः।
परमेष्ठी तु शुक्लाभश्चक्रपद्मसमन्वितः॥

द्विधाऽकृतिस्तथा पृष्ठे सुषिरं वाऽपि वर्तुलम्।
पीतवर्णयुता वापि भुक्तिमुक्तिफलप्रदः॥

हिरण्यगर्भः॥

द्वारं न दृश्यते यस्य नीलवर्णं तु शीतलं।
हिरण्यगर्भो विख्यातो हेमगर्भः शुभप्रदः॥



Hiranya – garbha

हिमांशुसदृशाकारं श्लक्ष्णं स्थूलं तथोचितम्।
हिरण्यगर्भ इत्याहुर्द्वारे पृष्ठे सुदर्शनम् ।
चक्राकारं महास्निग्धं द्वारनाभिः सबिन्दुकः॥

स्थूलं स्निग्धकरत्वं च महातेजः प्रकाशते।,
हिरण्यगर्भो विज्ञेयः पूजकस्य शुभप्रदः॥

वर्तुलः कृष्णवर्णश्च विद्युत्पुञ्जनिभाननः।
अमुखी स्वर्णबिन्दुश्च स्वर्णगर्भः प्रकीर्तितः॥

हिरण्यगर्भो भगवान् पवित्रं भुवि दुर्लभः।
अन्तर्ध्वनिसमायुक्तः कृष्णवर्णः सुवृत्तकः॥

वर्तुलो ह्रस्ववदनश्चक्रमध्येऽतिकोमलः।
श्रीवत्सकमलाकारलाञ्छनं चक्रपार्श्वके॥

Hiranya - garbha

हिरण्यगर्भो विख्यातः पृथुनाभिसमन्वितः।
हिरण्येन विमिश्रस्तु श्रीकरः कुलवर्धनः॥

पितामहमूर्त्तिः॥

पितामहश्चतुवक्त्रो ह्यष्टवक्त्रसमन्वितः।
पीतवक्त्र समायुक्तो भक्तिमुक्तिफलप्रदः॥

चतुर्मुखमूर्त्तिः॥

चतुरस्त्रो युज्यन्ते रेखाः पार्श्वसमीपगाः।
द्वे चक्रे मध्येदेशे तु सा शिला च चतुर्मुखः॥

स्वयम्भूः॥

मूर्ध्नि वर्तुलरेखाभिरावृतो नीलवर्णवान्।
दीर्घास्यपृथुवक्त्रस्तु स्वयम्भूरिति वर्तुलः।
केवलं मोक्षफलदो ह्यर्चकस्य न संशयः॥

गरुडमूर्त्तिः॥

द्विपक्षाभ्यां समोपेतंयिद्गारूडविमोचनम्।
दुर्लभं समचक्रं तु कलौ कल्मषनाशनम्॥

गरुडः॥

स्थूलचिह्नमुखं यस्य कलशेन समन्वितम्।
वैनतेयं विजानीयाल्लाञ्छनैश्च समन्वितम्॥

शेषमूर्तिः॥

पृष्ठादिमूर्द्धपर्यन्तं वलयाकाररेखया।
सुवर्णनिभया द्वित्रिचतुःपंचातिसंख्यया॥



Śeshamūrti

संयुक्ता शुभवक्त्राद्या श्यामनीला सितासिता।
अथवा कुंण्डलीभूता नानाभोगप्रदायिनी॥

हेमवर्णा मुखं यस्याः सम्यगुन्नतं ध्वजः।
कूर्मरेखाप्रबुद्धा तु शिलाभूतिप्रदायिनी॥

कनकाभं समीपे तु ह्यक्षसूत्रं सुपार्श्वके।
रुक्माकृतिरधोभागे लिङ्गभागे खुरान्वितः॥

शिवनाभ इति ख्यातो भुक्तिमुक्तिफलप्रदः।
शेषमूर्त्तिस्तु भगवान्विशेषाश्चर्यदायकः॥

बलशालिरामः

दीर्घाकारं बृहद्द्वारं......... पुच्छं च तद्भवेत्।
श्वेतं च हलचिह्नं च मुसलाकृतिरेखया॥

नीलोत्पलप्रसूनाभं पृष्ठे वक्षान्नतेऽपि वा।

बलशाली भवेन्नाम्ना वंशकोशविवर्धनः॥

सर्वत्र रक्तवर्णः स्यात्पीतनीलविवर्जितः।
सुचक्रो वक्रचक्रो वा सीरपाणिः शुभप्रदः॥

X. SECTION TEN

Śiva-nābhạ-śālagrāmas represent the form of Śiva. While the śālagrāmas usually are taken to indicate the presence of Vishṇu, there are nevertheless some śālagrāma-stones specific to Brahmā, Sūrya and Śiva. The śālagrāmas representing Śiva occur in several varieties : Śiva-nābha, Gauri-nābha, Aghora-harihara (two sub-varieties), Dakshiṇāmūrti-śivanābha, Umā-maheśvara, Śiva nārāyaṇa (Harihara) Sadyojāta, Vāmadeva, Iśāna and Tatpurusha. These are described with reference to their distinguishing characteristics.

शिवनाभः॥

स्थिरासनं मध्यनाभिं हेमरेखाविराजितम्।
पूजिते शिवनाभे तु पूजिताः सर्वदेवताः॥

हेमवर्णमुखं यस्य सम्यगुन्नतमूर्ध्वतः।
कूर्मरेखा प्रबुद्धा तु शिला मुक्तिप्रदायिनी॥

कनकादिसमीपे तु ह्यक्षसूत्रं तु पार्श्वके।
कूर्माकृतिरधोभागे लिङ्गभागे खुरान्वितः॥

शिवनाभ इति ख्यातो भुक्तिमुक्तिफलप्रदः।
एकनाभिसमोपेतः कृष्णवर्णः सबिन्दुकः॥

शिवनाभसमाख्यातः सौख्यदः फलदोऽर्चितः।

गौरीनाभः॥

ऊर्ध्वाऽधोनिर्गतं लिङ्गं तल्लिङ्गं तु सदाशिवः।
कपिलं कृष्णवर्ण च सा शिला भुक्तिमुक्तिदा॥

शिवनाभः॥

लिगश्च शिवनाभश्च भिन्नलक्षणयोगतः।
शिवो ऊर्ध्वलिंगं सदाशिवः।
गौरीसुगुरुश्च शिवोऊर्ध्वलिङ्गं सदाशिवः।
उमापतिर्मूर्त्तित्रयहेमपिंगखुरेश्वरः।

अघोरहरिहरः॥ द्विविधः॥

शिवनारायणश्चैव महालिङ्गे हरिहरः।
सोमेशस्तत्पुरुषः सद्योजातस्तथैव च॥

वामदेवस्तथेशानः सूर्यऽवच।
एकनाभिसमीपे तु ह्यक्षमात्रं तु पार्श्ववो॥

कूर्माकृतिरधोभागे लिङ्गभागे खुरान्वितः।
शिवनाभ इति ख्यातो भुक्तिमुक्तिफलप्रदः॥

गजकुम्भस्थूलरेखा दृश्यते यत्र मध्यतः।
शिवनाभः स विज्ञेयः दुर्लभः सर्वकामदः॥

स्निग्धवर्णा तथा सूक्ष्मा गोखुरेण समन्विता।
मूर्ध्नि विद्या कला भागा ऊर्ध्वपिङ्गजटा शशी॥

यवमात्रं तु गर्तः स्याद्यवार्ध लिङ्गमुच्यते।
शिवनाभ इति ख्यातस्त्रिषु लोकेषु दुर्लभः॥

ऊर्ध्वयोनिगतं लिंगं तल्लिङ्गं तु सदाशिवः।
कपिलं कृष्णवर्णं च सा शिला भुवि दुर्लभा॥

ऊर्ध्वरंध्राल्लसल्लिङ्गं सुरक्तं शीतलाकृति।
गौरीशिवनाभाख्यं सर्वसौभाग्यवर्धनम्॥

दक्षिणामूर्त्तिशिवनाभः॥

लिङ्गैः पञ्चभिरालीढं षड्भिर्वा सप्तभिश्च वा।
तन्मूर्त्तिर्दुर्लभा पुण्या मया वक्तुं न शक्यते॥

शिवनाभैर्लिंगभागैर्नेत्रत्रयविभूषितम्।
गंगाजटा चन्द्रबिम्बा अक्षमाला च पुस्तकम्॥

उमामहेश्वरमूर्तिः॥

वैडूर्यं शिवनाभेषु पूजितं।
गोखुरैः परितो युक्तमधश्चक्रसमन्वितम्॥

गण्डकीगर्भजनितं मूर्त्तिर्गौरीसमाश्रितम्।
उमामहेश्वरं प्रोक्तं सर्वाभीष्टफलप्रदम्।।

कुम्भसम्भव धर्मात्मा संपूजयति यो नरः।
कदम्बकुसुमाकारं हेमपिङ्गजटाधरम्।।

स्पर्शे लिङ्गमतिस्निग्धं शिवनाभः सुदुर्लभः।
कूर्मचक्रमधोभागे एकभागे खुरान्वितम्।
शिवनाभ इति ख्यातो भुक्तिमुक्तिप्रदायकः।।

सर्वत्र लोहिताकारो मूर्ध्नि रक्तजटान्वितः।
अघोरा सा परित्याज्या गृहिभिर्यतिपूजिता।
असिवर्णश्च स्वर्णश्च अमला नाम लाच्छितः।।

स न पूज्यः गृहस्थेन व्याधिमृत्युप्रदायकः।
अधश्चक्रे चोर्ध्ववक्त्रं स्निग्धवर्णं सुसूक्ष्मकम्।।

ख्यातं हरिहरं तस्य नृणां संतारणं स्मृतम्।
एतच्चक्रमधोवक्त्रं द्विमुखं तद्धरिहरः।।

द्वे द्वे चक्रेऽप्धश्चोर्ध्वे शिवनारायणः स्मृतः।
एकलिङ्गः सर्वपूज्यः द्विलिङ्गो फलप्रदः।।

त्रिलिङ्गश्च चतुर्लिङ्गः सर्वसौभग्यदायकः।
लिङ्गैः पंचभिरालीढः षड्भिर्वा सप्तभिश्च वा।।

तत्तन्मूर्त्तिफलं पुण्यंमया वक्तुं न शक्यते।
लिङ्गाधिक्यं मृत्युकरी शक्त्याधिक्यं दरिद्रकम्।।

शिवशक्तिसमायुक्ता सा शिला भुक्तिमुक्तिदा।
महिषा च तु मूर्धा चेत्पार्श्वे चक्रं च सूच्यते।
एतद्धरिहरं मूर्तिं सर्वाभीष्टफलप्रदं मुने।।

ऊर्ध्वपिंगजटाजूटं शशिभानुसमन्वितम्।
संस्पष्टलिङ्गं सूक्ष्मं च शिवनाभः सुदुर्लभः।।

अथ सद्योजातः॥

हेमवर्णजटायुक्ता हेमबिन्दुसमन्विता।
मस्तके गोखुराभासा चन्द्रगङ्गासमन्विता॥

सद्योजाताभिधा श्रेष्ठा पुत्रपौत्रधनप्रदा।

वामदेवः॥

लिङ्गसक्ता रक्तवर्णा श्वेतचन्द्रजटायुता।
वामदेवाभिधा श्रेष्ठा गृहिभिः परिपूजिता॥

ईशानः॥

किञ्चित्कपिलसंयुक्ता कृष्णनीलजटेन्दुना।
पार्श्वरेखासमोपेता ईशानो मुक्तिदो भवेत्॥

तत्पुरुषः॥

पूर्वविद्युज्जटाभानुरूर्ध्वपिङ्गजटा शशी।
तत्पूरुषाभिधानः स्याद् दुर्लभा सर्वकामदा॥

XI. SECTION ELEVEN

This section deals with the Śālagrāmas representing the forms of Sūrya, the Sun-god, Haihaya (Kārtavīrya), Havyavāhana (Agni), jitakrodha-mūrti, Daityāri, Ātanka-mūrti, Nara-mūrti, Purāṇa-puroshottama, Padma-lāñchhita, and vishvaksena. Excepting Sūrya, Haihaya and Agni, the other deities represented in śālagrāma are not suitable for worship, as their worship is likely to cause misfortune of some sort or other. This is actually the miscellaneous section, which marks the conclusion of the detailed and descriptive account of deity-specific Śālagrāmas.

अथ सूर्यमूर्तिः॥

बाह्ये वाऽभ्यन्तरे वाऽपि चक्रद्वादशसंयुता।
सूर्यमूर्तिः खगेशान सर्वव्याधिविनाशना॥

हैहयमूर्तिः॥

गर्भगते तु चक्रे तु पद्मे चेद्दक्षिणे बहिः।
पद्मपत्राकृतिर्वाऽपि हेमवर्णसमाकुला।
हैहयस्तु तथा गोप्ता सर्वसिद्धिप्रदायकः॥

हव्यवाहनमूर्तिः।

अग्निवर्णो महातेजाः सप्तरेखासमायुतः।
हण्यवाहनसंज्ञोऽसौ श्रीप्रदो नात्र संशयः॥

निष्केसरं चक्रयुतं बाह्ये वा चिह्नसंयुतम्।
तन्मूर्तिर्विहगाधीश शून्यपूर्वः प्रकीर्तितः॥

जितक्रोधमूर्तिः॥

जितक्रोधस्तु भगवान् रक्तवर्णेन मिश्रितः।
मृत्युं ददाति सततं मध्यचक्रे न संशयः॥

दैत्यारिः॥

बहुचक्रावृतो देवो दैत्यारिः समुदीरितः।
शुक्लकान्तिसमायुक्तः केवलं दुःखदायकः॥

आतङ्कमूर्तिः॥

विवश्वायाऽन्तको देवो हानिमेव प्रयच्छति।
चक्रे तु मध्येदेशे तु पुच्छे चोत्पातमर्पयेत्॥

नरमूर्तिः॥

नरमूर्तिस्तु भगवान् अतसीकुसुमप्रभः।
एकनाभिसमोपेतो ह्यक्षसूत्रं तु पार्श्वके॥

स्पष्टचक्रसमोपेतं अतसीकुसुमप्रभम्।
नरमूर्तिं विजानीयाद्धयग्रीवोऽङ्कुशाकृतिः॥

पुराणपुरुषोत्तमः॥

दूर्वाभस्सूक्ष्मवदन इति लिखितम्।
कमलाक्षताम्रवर्णयुतोऽनेकचक्रयुक्॥

पद्मलाञ्छितः॥

कमलाक्षो हरिर्नित्यं दुःखदः पूजितो नृणाम्।

विष्वक्सेनः॥

बहुवर्णश्चैकचक्रो विश्वक्सेन इति स्मृतः।
करोति पूजितो नृणामटनं तु न संशयः॥

SECTION TWELVE

This section gives an account of how śālagrāmas differ on account their aperture-size, number and location of chakras, shapes, colours and marks on them.

अथ-द्वारमान-आकार-चक्रसंख्या-विभेदेन लक्षणम्

एतेषामेव केषाश्चित् स्पष्टं भेदः प्रतीयते॥

स स्थानभेदः चक्राणां संख्याभेदश्च कथ्यते॥

वासुदेवो जगद्योनिः कृष्णः पीताम्बरोऽव्ययः।
सीरपाणिः समोपेताः षड्द्वारचक्राः प्रकीर्तिताः।
पुरुषोत्तमश्च सीतेशो वराहश्च तथाविधाः॥

Śālagrāmas having chakras on the sides:



Pārśva-chakra

पार्श्वचक्रादयः॥

अनिरुद्धो हरिः कृष्णो जामदग्न्यस्तथैव च।
वामे वा दक्षिणे वाऽपि पार्श्वचक्रसमन्वितः॥

अमृताहरणोपेन्द्रः प्रद्युम्नः कपिलाह्वयः॥

वामचक्रमूर्त्तयः॥

लक्ष्मीनृसिंह्यो विष्णुश्च नारसिंहश्च कीर्तितः।
बलरामो भूवराहः सुयज्ञो वामचक्रिणः॥

कपिलो नारसिंहश्च लक्ष्मीनारयणस्तथा।
त्रिविक्रमो वासुदेवो वामचक्राः प्रकीर्तिताः॥

Śālagrāmas with a single chakra:

एकचक्रादयः॥

पुण्डरीको प्रलम्बघ्नो वैकुण्ठो मधुसूदनः।
नरः सुदर्शनो रामश्चैकचक्रसमन्वितः॥

लक्ष्मीनारायणश्चैव वीरनारायणस्तथा।
परमेष्ठी हयग्रीवः क्षीरशायी च माधवः॥

Śāalagrāmas with three chakras:

त्रिचक्रादयः॥

अधोमुखनृसिंहश्च शिंशुमारस्त्रिविक्रमः।
मत्स्यमूर्त्तिश्च सीतेशः षडेते स्युस्त्रिचक्रकाः।
बुद्धोऽच्युतस्त्रिमूर्तिश्च कूर्मश्च पुरुषोत्तमः॥

चतुश्चक्राहरिदयः॥

चतुश्चक्रो हरिहयः सीतारामो जनार्दनः।
विश्वम्भरः कंसमर्दी लक्ष्मीनारायणस्तथा॥

Śālagrāmas with five chakras:

पंचचक्रमूर्तयः॥

श्रीसहायः पञ्चचक्रः सीतारामस्तथैव च।
लक्ष्मीनारयणो वाऽपि पञ्चचक्रसमन्विताः॥

Śālagrāmas with six chakras:

षट्चक्रादयः॥

सीतारामस्त्रिमूर्तिश्च लक्ष्मीनारायणस्तथा॥

Śālagrāmas with seven chakras:

सप्तचक्रादयः॥

सप्तचक्रः समाख्यातो ह्यनन्तः सर्वतोमुखः॥

अष्टचक्रादयः॥

लक्ष्मीनारायणोऽनन्तश्चक्रपाणिः पितामहः।
अष्टचक्रेण संयुक्ताः पूजकस्य शुभप्रदाः॥

Śālagrāmas with nine to fourteen chakras:

नवचक्रादयः॥

दशचक्रस्तु गोन्विदो ह्यनन्तो विश्वरूपधृक्।
नवचक्रस्तु भगवान् अच्युतः परिकीर्तितः॥

हृषीकेशस्तथाऽनन्तः क्रमेणैकादशेन तु।
मुकुन्दश्च तथा सूर्यो द्वादशेन जनार्दन :॥

अनन्तस्तु महादेवस्त्रयोदशचतुर्दश।
विश्वम्भरस्तु भगवान्विंशत्युपरि चक्रवान्।
चक्राणां विंशातियुतो विश्वरूप इति स्मृतः॥

Śālagrāmas with chakras at the navel:

नाभिचक्रादयः॥

माधवो वसुदेवश्च कूर्मो दाशरथिस्तथा।
लक्ष्मीनारायणः पद्मनाभो भार्गव एव च॥

नाभिचक्रयुताः सर्वे पूजकानां शुभप्रदाः।
लक्ष्मीवराहो देवेशो वाराहो नरकेसरिः॥

दक्षिणे चक्रयुक्ताश्च त्रय एव महामुने॥

Perfectly round Śālagrāmas:



Vartula

वर्तुलमूर्तयः॥

अमृताहरणश्चैव सत्यवीरश्रवास्तथा।
गोवर्धनाख्यगोपालः स्वयम्भूश्चेति वर्तुलः॥

लक्ष्मीनारायणः कूर्मो गोविन्दो वामनस्तथा॥

अधोक्षजोऽनिरुद्धश्च कपिलः केशवस्तथा।
वटपत्रशयश्चैते वर्तुलाः परिकीर्तिताः॥

Elongated Śālagrāmas:



Dīrg ākāra

दीर्घाकारमूर्त्तयः॥

विभीषणश्च कोदण्डो रामः परमहंसकः।
तथा सन्तानगोपालो बलरामश्च दीर्घकाः॥

लक्ष्मीमदनगोपालः श्रीगोपालस्त्रिविक्रमः।
शेषः परशुरामश्च वाराहो माधवस्तथा॥

लक्ष्मीमूर्तिश्च भगवान्सुदीर्घाकारमूर्तयः॥

Śālagrāmas with large chakras:



Pārśva



Aṇḍākāra

पृथुचक्रादयः॥

केवलं नारसिंहश्च विदारणयुतस्तथा।
लक्ष्मीपतिर्बालकृष्णो रामोऽपि बलपूर्वकः॥

नारायणो नारसिंहो वाराहोऽधोक्षजस्तथा।
बलः परशुरामश्च विष्णुः संकर्षणस्तथा।
वामनः कपिलश्चैते पृथुवक्त्राः प्रकीर्तिताः॥

śālagrāmas with small openings:



Pṛthu Chakra

सूक्ष्मवक्त्रादयः॥

कुक्षिपूर्वनृसिंहश्च बालपूर्वो नृसिंहकः॥

कल्किर्बुद्धो दामोदरः श्रीधरः सूक्ष्मवक्त्रकः॥

कुक्षिवामनगोपालो मधुसूदनमाधवाः।
वासुदेवोऽनिरुद्धश्च हयश्च पुरुषोत्तमः॥

लक्ष्मीनृसिंहः प्रद्युम्नः स्वयंभूः शेष एव च।
अच्युतश्च मुनिश्रेष्ठ सूक्ष्मवक्त्राः प्रकीर्तिताः॥



Sūkshma – Chakra

Śālagrāmas with garland-like marks on them:

अथ मालावर्गमूर्तिवर्गः॥

कृष्णश्च वीररामश्च श्रीधरो हृष्टरामकः।
महाज्वालानृसिंहश्च सीतारामश्च केशवः॥

बालपूर्वो नृसिंहश्च लक्ष्मीनारायणस्तथा।
माधवो बलभद्रश्च गोपालो मदनाह्वयः॥

स्यमन्तकमणेर्हर्ता श्रीगोपालः सुदर्शनः।
यदुवीरः कल्किमूर्त्तिर्लक्ष्मीगोपाल एव च॥

दामोदरो हृषीकेशो ह्यच्युतो विष्णुरेव च।
लक्ष्मीपतिरनन्तश्च विक्रमो विष्टरश्रवाः॥

जनार्दनो महाकूर्मो वराहः श्वेतनामकः।
वनमालासमेतास्ते तेषां लक्षणमुच्यते॥

Śālagrāmas with uneven chakras:

विषमचक्रादयः॥

वराहो नारसिंहश्च कपिलो गरुडस्तथा।
श्रीधरश्च हृषीकेशो ह्येते विषमचक्रिणः॥

Śālagrāmas with opening at the bottom:

अधोवक्त्रेण संयुक्ता मूर्त्तिर्हरिहरस्तथा॥

Śālagrāmas with fang-like structures:

दंष्ट्रिणः॥

वराहो नारसिंहश्च विदारणयुतस्तथा।
कपिलो नारसिंहश्च ज्वालानृसिंहस्तथैव च।
तथा परशुरामश्च सुदंष्ट्रेण विराजितः॥

Śālagrāmas having the complexion of the snuhī-flower:

स्नुहीपुष्पिणः॥

वाराहो वामनः कूर्मो प्रद्युम्नः स्नुहिपुष्पिणः।

Śālagrāmas having openings which are fissured:

भिन्नवक्त्रादयः॥

छिद्रराक्षससिंहोऽपि भिन्नवक्त्रः प्रकीर्तितः।

Śālagrāmas like the Kadamba flowers:

कदम्बकुसुमाः॥

कदम्बकुसुमा रेखा वामनः श्रीधरः स्मृतः।
हयग्रीवो वराहश्च कल्किनामा तथैव च॥

अंकुशाकारवदनश्चतुष्कोणः स केशवः।
लक्ष्मीनारायणो मूर्तिस्त्रिविक्रमसमाह्वयः॥

गोपालक्षेत्रजो रामो लक्ष्मीनारायणस्तथा।
प्रद्युम्नः परमेष्ठी च पार्श्वे सुषिरसंयुतः।
कृष्णो हिरण्यगर्भश्च पद्मनाभो हरस्तथा॥

केशवो वामनश्चैव नाभिचक्रसुदर्शनः।

Snuhi is a spurge, *Euphorbia antiquorum.*

Kadamba-the tree, *Nauclea cadamba* having orange coloured fragrant flowers

Śālagrāmas which resemble hen's egg:

कुक्कुटाण्डाभाः॥

कोदण्डरामः श्रीरामो दशकण्ठकुलान्तकः।
सीतारामो दाशरथिर्लक्ष्मीगोपाल एव च॥

त्रिविक्रमस्तथा ज्ञेयाः कुक्कुटाण्डसमप्रभाः।
कपिलो नारसिह्मश्च ज्वालानृसिंहस्तथैव च॥

संकर्षणो हृषीकेशः प्रद्युम्नो विष्णुरेव च।
बहुरूपी पद्मनाभो बलभद्रोऽच्युतस्तथा॥

शेषः स्वयम्भूर्भगवान् रामो विजयपूर्वकः।
एते वै पृथुचक्राः स्युस्तेषां लक्षणमुच्यते॥

Śālagrāmas with chakras like proboscis:

पुष्करचक्रिणः॥

कल्की संकर्षणश्चैव लक्ष्मीगोपाल एव च।
परमेष्ठी च ते सर्वे प्रोक्ताः पुष्करचक्रिणः॥

Śālagrāmas having small chakras:

सूक्ष्मचक्रादयः॥

दामोदरो वामनश्च प्रद्युम्नः परहंसकः।
मायानारायणः कूर्मो माधवो गरुडध्वजः॥

जितक्रोधोऽन्तकश्चैव श्रीधरः पुरुषोत्तमः।
अमृताहरणश्चैव हैहयश्च चतुर्मुखः॥

एते वै सूक्ष्मचक्रास्तु ऋषिभिः परिकीर्तिताः॥

Śālagrāmas having marks of earrings:

कुण्डलयुक्तमूर्तिवर्गः॥

सीतारामो हयास्यश्च गोपालो मदनाह्वयः।
अनिरुद्धश्च कृष्णश्च ह्यूर्ध्वचक्रस्त्रिविक्रमः॥

सीतारामो भूवराहः कृष्णो मदनगोपतिः।
कल्पवृक्षेण संयुक्तो लक्ष्मीनारायणस्तथा॥

Śālagrāmas having gold spots:

स्वर्णबिन्दुः॥

कूर्मश्च पारिजातश्च वाराहो द्विविधस्तथा।
विद्युज्जिह्वो नृसिंहश्च गोपालो वेणुभूषितः॥

कालीयमर्दनश्चैव वीरनारायणस्तथा।
दत्तात्रेयो जामदग्निः पुण्डरीकाक्षवामनौ॥

नारायणो बुद्धमूर्तिर्हंसः संकर्षणस्तथा।
पद्मनाभो हृषीकेशो हयग्रीवश्च केशवः॥

चाणूरमर्दनो देवो धनञ्जयविभुस्तथा।
विश्वरूपो हरिहरः गरुडो हरिहयस्तथा।
नारायणः शंकाराख्यो राक्षसाख्यो नृकेसरी॥

त्रिविधः शिवनाभो हि स्वर्णबिन्दुधरस्तथा॥

SECTION THIRTEEN

This is the concluding portion of the manuscript, giving the various benefits obtained from worshipping the śālagrāma-stones of different varieties. Perfectly smooth (snigdha) and blue-black (mechaka) are regarded

as the best. If the colour is of washed coal (dhautāṅgāra-vat) or bluish, the stone is of middling merit. If the colour is tawny (piṅgala), yellowish (pīta), ash-grey (dhūmābha) or red (rakta) the stone will be malefic in effect. Perfectly round stones contribute to prosperity; umbrella-shaped ones will secure lordship; cart-like stones (śakaṭākārā) spell misery, and a spear-shaped stone will bring about death and ruin. Crooked stones cause poverty. This is what the texts generally say.

एवं लक्षणसंयुक्तं शिलाचक्राद्यलङ्कृतम्।
पूजयेद्यस्त्रिसंध्यं तु स मुक्त इति निश्चयः॥

इष्टा यस्येह सा मूर्तिः स तां यत्नेन पूजयेत्।
पूजयित्वा फलं सम्यक् प्राप्नोतीऽह परत्र च॥

सालग्रामाः समाः पूज्या विषमा न कदाचन।
विषमे त्वेकमेव स्यात्समौ द्वौ न कदाचन।
द्वादशैव शिला यो वै सालग्रामसमुद्भवाः॥

अहर्चयेद्वैष्णवो नित्यं तस्य पुण्यमनंतकम्।
किं पुनर्बहुशो यस्तु पूजयेद्वैष्णवो नरः॥

सालग्रामोद्भवशिलानिर्मितं यन्त्र कृत्रिमम्।
तस्य दर्शनमात्रेण सर्वान्कामानवाप्नुयात्॥

खण्डितं मुण्डितं चैव पार्श्वे भग्नं द्विधा स्थितम्।
सालग्रामसमुद्भूतं शिलामात्रं न दोषकृत्॥

न प्रतिष्ठा न संस्कारो न प्रायश्चित्तमेव च।
नोपचारापचारश्च विद्यते वै खगाधिप॥

मूर्त्यन्तरं तु विषमे न यष्टव्यं कदाचन।
सालग्रामशिलायां तु यष्टव्याः सर्वमूर्तयः॥

चक्रोंङ्कितशिलासार्धं द्वारकायां समुद्भवम्।
यः पूजयेदनुदिनं स याति परमं पदम्॥

विष्णुपादे च संस्पृष्टं पत्रं वा पुष्पमेव वा।
शिरसा धारयद्यो वै स याति परमं पदम्॥

निर्माल्यं शंकरस्यापि पत्रं वा पुष्पमेव च।
सालग्रामस्य संपर्कात् सर्वं याति पवित्रताम्॥

सालग्रामशिला यत्र यत्र द्वारवती शिला।
शङ्खं च तुलसी पत्रं तत्र सन्निाहितो हरिः॥

फलं त्रिभिश्च प्राप्नोति ह्यच्युतः फलदो भवेत्।
श्रीप्रदो रिपुहन्ता च चतुश्चक्रो जनार्दनः॥

पञ्चमं वासुदेवः स्यात् जन्ममृत्युभयापहः।
प्रद्युम्नं षड्भिरेवाऽथ लक्ष्मीः कान्ति ददाति च॥

सप्तभिर्बलदेवः स्याद्गोत्रकीर्तिप्रवर्धनः।
ददाति वाञ्छितं भुक्तिं ह्यष्टभिः पुरुषोत्तमम्॥

सर्वदस्तु नवव्यूहो यः सुरैरपि दुर्लभः।
दशराज्यप्रदश्चैव अवतारदशाः स्मृताः॥

एकादशभिरैश्वर्यमनिरुद्धः प्रयच्छति।
निर्वाणं द्वादशात्माऽसौ द्वादशात्मा ददाति च।
अत ऊर्ध्वमनन्तात्मा पूजकस्य शुभप्रदः॥

वर्णभेदेन फलभेदः॥

श्वेतः पीतश्च वर्णश्च कृष्णवर्णस्तथैव च।
पुत्रपौत्रधनैश्वर्यं सुखं मोक्षं यथाप्रियम्।
ददाति शुक्लवर्णस्तु तं यत्नेन प्रपूजयेत्॥

पीतो धनकरो नित्यं कपिलस्तु भयापहः।
कृष्णो मृत्युप्रदो नित्यं पूजकस्य न संशयः॥

आकारेण गुणदोषौ॥

वर्तुलं चतुरश्रं च नराणां सर्वसौख्यदम्।
त्रिकोणं विद्रुमं चैव छिद्रो भग्नस्तथैव च॥

अर्धचन्द्राकृतिर्यस्तु स वै पुत्रविनाशनः।
चक्रांकितस्य सान्निध्ये यत्किंचित्क्रियते नरः।।।

स्नानं दानं जपो होमः सर्वस्तत्राऽक्षयो भवेत्।
संवत्सरं तु यत्पापं कर्मणा मनसा कृतम्।
नश्यन्ति तदशेषेण विष्णुचक्राङ्कितदर्शनात्।।

ज्वरदाहविषं चैव वह्निचोरभयं तथा।
सर्वं तत्प्रशमं याति यत्र चक्राकितो वसेत्।।

गण्डक्याश्चोत्तरे तीरे गिरिराजस्य दक्षिणे।
शतयोजनविस्तीर्णं मम क्षेत्रं खगाधिप।।

अद्यापि दृश्यते यत्र तेषां नाम सुदर्शनम्।
चक्राङ्कितास्तु पाषाणा दृश्यन्ते सर्वजन्तुभिः।।

तत्र यो म्रियते तार्क्ष्य गर्दभोऽपि चतुर्भुजः।
शङ्खचक्राङि्कततनुः स तु पङ्कजवाहनः।
त्रैलोक्यमव्यतिक्रम्य मम लोकं स गच्छति।।

किं पुनर्मनुजास्तार्क्ष्य मम क्षेत्रं गतम् सुखा।
प्रयान्ति मम सायुज्यं नात्र कार्या विचारणा।।

सालग्रामोद्भवो देवो द्वारवत्युद्भवोऽपि च।
चक्राङि्कतशिलायाश्च तासां पूजा विधानतः।।

पुष्पैः शतगुणं पद्मैः सहस्त्रगुणितं फलम्।
गषडपत्रैर्लक्षगुणं दशलक्षगुणं तथा।।

सुगन्धमूलैर्वंशाद्यैर्बिल्वकोटिगुणं फलम्।
पूजां तु तुलसीपत्रैरनन्तगुणितं फलम्।।

Bāṇa-lingas are in this regard very similar to śālagrāmas. These aniconic objccts of worship are not in the nature of artifacts, and hence do not suffer from the disadvantages and limitations of deliberate human involvement. They do not need to be made worship- worthy by rituals of tansmutation; their worthiness for worship is self- evident natural and enduring. They cannot be defiled on any account, and do not lose their merit under any circumastaces. In fact, there is a consideration of acceptability or otherwise in the case of lingas made by human agency. Some are deemed worthy of worship, owing to the presence of certain favorable features, and others not so. Further, there is the problem of partaking of the water or food offered to a linga (naivedya) and of using the flowers once placed on the linga (nirmālya). There are doubts expressed in these matters, and the authentic texts are themselves divided in their views on these matters. But it is clear in the case of bāṇa-lingas that all offerings made to them are acceptable by the devotees.

ग्राह्याग्रह्यविभागोऽयं बाणलिङ्गे न विद्यते।
तदर्पितं जलं वाऽन्नं ग्राह्यं प्रसादसंज्ञया॥

शिवनाभमयं लिङ्गं सदा पूज्यं महर्षिभिः।
यतश्च सर्वलिङ्गेभ्यस्तद्धि पूज्यतमं मतम्।। (कालोत्तरे)

With regard to the lingas of all varieties except bāṇa-linga, bigger the size the greater the acceptability, as it is also the case with the rudrāksha beads which are sacred to Śiva. But with regard to the bāṇa-lingas obtained in the river Narmadā, as is the case with the śālagrāmas obtained in the river Gaṇḍaki, smaller the size the more meritorious it is.

रुद्राक्षं शिवलिङ्गञ्च स्थलूस्थूलं प्रशस्यते।
शालग्रामो नार्मदं च सूक्ष्मसूक्ष्मो विशिष्यते।। (हेमाद्रौ)

According to *Siddhānta-śekhara,* the bāṇa-lingas available in the Narmadā river are said to have been worshipped already by the gods, especially by the guardian-deities (loka-pāla), and the stones are also said to contain the impress of such worship. There are bāṇa-lingas carrying different marks characteristic of these gods : conch-shell mark on top (śamkhābha-mastaka) to denote that it was worshipped by Vishṇu, lotus-mark (padma) to indicate that it was worshipped by Brahmā, mark of a parasol (chhatra, Indra), mark of the heads (śiro-yugma, Agni), three steps (pāda, Yama) mark of mace (gadā, Īśāna), mark of a water-vase (kalaśa, Varuṇa), mark of banner (dhvaja, Vāyu) and so on And having been worshipped by the gods, the bāṇa-lingas answer to the 'daiva' variety of linga, in addition to being 'svayambhu'. Hence their indubitable superiority.



Yāmya-linga

Kaubera-linga

Vira-mitrodaya, the celebrated gloss on *Mitāksharā* (which is itself a commentary by vijñāneśvara on Yājñavalkya's *Dharma-Śāstra*), quotes *Kālottara* on this subject of bāṇa-lingas being distinguished by characteristic marks of the gods who worshipped them. The text enumerates nine varieties of bāṇa-lingas, eight of them corresponding to the eight guardian-deities (loka-pālas), and one called Vaishṇava. The verses are quoted below:

बाणलिङ्गं तथा ज्ञेयं भुक्तिमुक्तिप्रदायकम्।
उत्पत्तिं बाणलिङ्गस्य लक्षणं शेषतः शृणु॥

नर्मदादेविकायाश्च गङ्गायमुनयोस्तथा।
सन्ति पुण्यनदीनां च बाणलिङ्गानि षण्मुख।
इन्द्रादिपूजितान्यत्र तच्चिह्नैर्विहितानि च॥

(1) ऐन्द्रालिङ्गानि

सदा सन्निहितस्तत्र शिवः सर्वार्थसाधकः।
इन्द्रलिङ्गानि तान्याहुः साम्राज्यार्थप्रदानि च॥

(2) आग्नेयलिङ्गानि

आरुणं हीत्यकीलालमुष्णस्पर्शं करोत्यलम्।

आग्नेयं तच्छक्तिनिभमथ वा शक्तिलाञ्छितम्।
इदं लिङ्गवरं स्थाप्य तेजसाधिपतिर्भवेत्॥



Nairrti-linga

(3) याम्यलिङ्गानि

दण्डकारं भवेद्याम्यं अथवा रसनाकृति॥

यद्यदुक्तं सह तैर्न निर्निक्तं ज्ञायते तदा।
निषिक्तं निधनं तेन क्रियते स्थापितेन तु॥

(4) नैर्ऋतिलिङ्गानि

राक्षसं खड्गसदृशं ज्ञानयोगफलप्रदम्।
कर्करादिप्रलिप्तं तु कुण्ठकुक्षियुतं तथा।
राक्षसं निष्कृते लिङ्गे गार्हस्थे न सुखप्रदम्॥

(5) वारुणलिङ्गानि

वारुणं वर्तुलाकारं पाशाङ्कं चालिवर्चसम्।
वृद्धिं सुखादेर्वैवस्वत्वसम्भोगप्तं तु मध्यगे॥



Vāruṇa-linga

(6) वायव्यालिङ्गानि

कृष्णं धूम्रं नवारुच्यं ध्वजाभं ध्वजमूषलम्।
मस्तके स्थापितं तस्य न्यूनन्यूनमितस्ततः॥

(7) कौबेरलिङ्गानि

तूणपाशगदाकारं गुह्यकेशस्य मध्यगम्॥



Vāyu-liṅga

(8) रौद्रलिङ्गानि

दिनं वाऽप्यथ वा रात्रिं शस्यावृद्धिकरैर्बलम्।
अस्थिशूलाङ्कितं रौद्रं हिमकुण्डलवर्चसम्॥

(9) वैष्णवलिङ्गानि

चतुर्वर्णमयं वाऽपि वैष्णवं ज्ञायतेऽग्रतः।
वैष्णवं शङ्खचक्रगदाब्जादिविभूषितम्॥

श्रीवत्सकौस्तुभाङ्कम् च सर्वसिंहासनाङ्कितम्।
वैनतेयसमङ्कं वा तथा विष्णुपदाङ्कितम्।
वैष्णवं नाम तत्प्रोक्तं सर्वैश्वर्यफलप्रदम्॥

शालग्रामदिसंस्थं तु शशाङ्कं श्रीविवर्धनम्।
पद्माङ्कं स्वस्तिकाङ्कं वा श्रीवत्साङ्कं विभूतये॥

The bāṇa-lingas worshipped by Indra will, when worshipped, fulfill all the desires of the devotee; and bestow upon him sovereignty. The Āgneya variety of bāṇa-liṅga will be warm to touch, and carries the mark of the weapon śakti. The Yāmya-linga will have the form of a cudgel or of the tongue. The Nairṛti-linga will look like a sword, carries stain on its body and will bestow the benfits of jñāna and yoga; however, it should not be worshipped by a householder, as it will bring about misery; it is demoniacal in character. The Vāruṇa-linga will be round in shape, and may be distinguished by the marks of noose (pāśa). Its worship will secure prosperity. The linga named after Vāyu will be black in colour, or ashi-grey; it will have the appearance of flag-post, or may carry on its head the mark of a banner. The Kaubera-liṅga will be in the form of a a quiver/ noose or mace; there may be a hair-like line in the centre. The Raudra-linga will be lustrous like a block of ice, but bears the marks of a bone or spear. The linga which was worshipped by Vishṇu is distinguished by the marks of conch-shell, discus, lotus, mace, the jewels on the chest (śri-vatsa and kaustubha) or the foot-prints of vishṇu.

4

There is another classification of bāṇa-lingas suggested by Hemādri (*Lakshaṇa-kāṇḍa*) :

1. The Svayambhu-liṅga is honey-coloured (tawny), and carries the black mark of a coil; it is adored by all Yogic adepts.

मधुपिङ्गलवर्णाभं कृष्णकुण्डलिकायुतम्।
स्वयम्भुलिङ्गमाख्यातं सर्वसिद्धैर्निषेवितम्॥

2. The Mṛtyuñjaya-linga is multi-coloured, and has marks of matted hair and spear; it is worshipped by gods and titans alike.

Svayambhū-linga

नानावर्णसमाकीर्णं जटाशूलसमन्वितम्।
मृत्युञ्जयाह्वयं लिङ्गं सुरासुरनमस्कृतम्॥

3. The Nilakaṇṭha-liṅga is elongated in shape, and is pure white in colour, with a black dot in it.



Nīlakanṭha-linga

दीर्घाकारं शुभ्रवर्णं कृष्णबिन्दुसमन्वितम्।
नीलकण्ठं समाख्यातं लिङ्गं पूज्यं सुरासुरैः॥

4. The Trilochana-linga is white in complexion, and has three eye-like marks in it; there are also white lines resembling hairs in the body; the worship of this liṅga will eliminate all sins.



Trilochana-linga

शुक्लाभं शुक्लकेशं च नेत्रत्रयसमन्वितम्।
त्रिलोचनं महादेवं सर्वपापप्रणोदनम्॥

5. The Kālāgni-rudra-linga is dark-complexioned, stout in shape, and brilliant in aspect; it carries the marks of matted hair dressed into a top-knot; it is adored by all spirits.

ज्वलल्लिङ्गं जटाजूटं कृष्णाभं स्थूलविग्रहम्।
कालाग्निरुद्रमाख्यातं सर्वसत्त्वैर्निषेवितम्॥

6. The Tripurāri-liṅga is honey-coloured (tawny), with a white line resembling the sacred thread cord worn by the twice-born; there is a mark resembling crescent-moon on top, and at the bottom lotus-like mark, white in colour, can be seen; there are also lines reminding one of weapons.



Tripurāri-linga

मधपिङ्गलवर्णाभं श्वेतयज्ञोपवीतकम्।
श्वेतपद्मसमासीनं चन्द्ररेखाविभूषितम्।
प्रलयास्त्रसमायुक्तं त्रिपुरारिसमाह्वयम्॥

7. The Īśāna-linga is white in colour, but there will be tawny coloured mark on top resembling matted hair; there will also be the mark of a garland of severed heads, and the mark of a trident.

शुभ्राभं पिङ्गलजटं मुण्डमालाधरं परम्।
त्रिशूलधरमीशानं लिङ्गं सर्वार्थसाधकम्॥

8. The Ardha-nāriśvara-linga is distinguished by half of it being white, and the other half red; there will also be marks of trident and hand-drum.

त्रिशूलडमरुधरं शुक्लरक्तार्धभागतः।
अर्धनारीश्वराह्वानं सर्वदेवैरभष्टिदम्॥

9. The Mahā-kāla linga is bright and corpulent in shape, elongated, and silghtly red-hued; it is bright and attactive, and its worship will secure all the values of life.

ईषद्रक्तमयं कान्तं स्थूलं दीर्घं समुज्ज्वलम्।
महाकालं समाख्यातं धर्मकामार्थमोक्षदम्।।

Besides the above varieties, other texts (like *Kālottara* and *Bhavishya*) mention three other types of Bāṇa-linga. The 'Daiva' type is very uneven on the surface, with scratches and holes, depressions and mounds; it is longish in shape and it contains the marks of spear, crescent moon and stone-mason's hammer. The 'Gola' type resembles a small pumpkin or a crow's egg in shape. The 'Ārsha' type is like a rose-apple in shape, and carries the mark of a sacred cord. It is fatter at the base than the rest of the body. Some lingas of this type are stout in the middle and not so at bottom or the top; and these are the best among the lingas of this type.



Daiva-linga

(1) दैवलिङ्गानि

करसंपुटसंस्पर्शं शूलटङ्केन्दुभूषितम्।
रेखाकोटरसंयुक्तं निम्नोन्नतसमन्वितम्।।

दीर्घाकारं च चल्लिंगं ब्रह्मभागादिवर्जितम्।
0लिङ्गं दैवमिति प्रोक्तं गोलकं प्रोच्यतेऽधुना।।

(2) गोललिङ्गानि

कूष्माण्डस्य फलाकारं नागरङ्गफलोपपम्।
काकाडिम्बसमाकारं गोललिङ्गमितीरितम्।।

Ārṣha-linga

(3) आर्षलिङ्गानि

नानाकौलफलाकारं ब्रह्मसूत्रविवर्तनम्।
मूले स्थूलश्च यल्लिङ्गं कपित्थफलसन्निभम्।।

Gola-linga

नालस्य वा फलाकारं मध्ये स्थूलं च यद्भवेत्।
मध्ये स्थूलं वरं लिङ्गं ऋषिबाणमुदाहृतम्।।

5

According to *Yājñavalkya-samhitā,* the bāṇa-lingas obtained in the river Narmadā are the very forms of Śiva assumed by the god at the request of Bāṇāsura; they are therefore the holiest of objects. The benefits that can be procured by worshipping a crore of other lingas are got by worshipping one bāṇa-linga. The bāṇa-lingas in the Narmadā river may be of the shape of a ripe jambū-fruit, of a swan's egg. They may be honey-coloured, white, blue or emerald-hued (passage quoted earlier).

प्रशस्तं नार्मदं लिङ्गं पक्वजम्बूफलाकृति।

मधुवर्णं तथा शुक्लं नीलं मरकतप्रभम्।
हंसडिम्बाकृति पुनः स्थापनायां प्रशस्यते।।

Sūta-samhitā, which also extols the bāṇa-lingas, mentions that the best bāṇa-lingas are like the lotus-seeds or like the hen's eggs in shape.

अथ बाणं समाख्यातं यथा वक्ष्ये तथादितः।
बाणः सदाशिवो देवो बाणो बाणान्तरोऽपि च।।1।।

तेन यस्मै कृतं तस्मात् बाणलिङ्गमुदाहृतम्।
सदा सन्निहितस्तत्र शिवः सर्वार्थदायकः।।2।।

कृतप्रतिष्ठं तल्लिङ्गं बाणाख्येन शिवेन च।
पङ्कजस्य फलाकारं कुण्डलस्य समाकृति।।3।।

(कुक्कुटाण्डसमाकृति पाठान्तरम्)

भुक्तिमुक्तिप्रदश्चैव बाणलिङ्गमुदाहृतम्।।4।।

We also read in other texts that the best of bāṇa-lingas must be four angulas in height, when fixed on a pedestal; half that height would indicate midling merit, and one quarter of that height would be inferior. A bāṇa-linga the height of which is less even than this must never be worshipped.

चतुरङ्गुलमुच्छ्रायं रम्यं वेदिकया युतम्।
उत्तमं लिङ्गमाख्यातं पञ्चसूत्रसुसाधितम्।।

तदर्धं मध्यमं प्रोक्तं तदर्धमवरं स्मृतम्।
तस्य न्यूनं पूजनीयं न कदापि न तत्फलम्।।

Raudra-linga

While *Suprabheda* (33) roundly declares that all bāṇa-lingas are equally worship-worthy, and that the distinguishing marks and features are not to be considered ('bāṇa-lingasya naivoktam lakshaṇam'), there are texts which commend some bāṇa-lingas as worthy of worship (śubha-bāṇa-lingas), while others are not (dushṭa-bāṇā-lingas). According to *Kedāra-khaṇḍa,* the rough-surfaced bāṇa-linga must not be worshipped; for its worship may lead to the death of son and spouse. The linga that is flattened or blunted will augur ill for the house; if the linga when placed on earth inclines to a side it will cause the death of cattle, children and consorts, as well as destroy wealth. If the linga is split on top, its worship will cause disease and death.

कर्कशे बाणलिंगे तु पुत्रदारक्षयो भवेत्।
चिपिटे पूजिते तस्मिन् गृहभङ्गो भवेद् ध्रुवम्॥

एकपार्श्वस्थिते धेनुपुत्रदारधनक्षयः।
शिरसि स्फुटिते बाणे व्याधिर्मरणमेव च॥

छिद्राङ्गेऽर्चिते बाणे विदेशगमनं भवेत्।
लिङ्गे च कर्णिकां दृष्ट्वा व्याधिमान् जायते पुमान्।
अत्युन्नतिबिलाग्रे तु गोधनानां क्षयो भवेत्।। (केदारखण्डे)

Hemādri (*Lakshaṇa-kāṇda)* says that the bāṇa-lingas with sharp edges, and crooked tops, must not be worshipped as also exceedingly corpulent or thin ones. They may be beneficial to those whose only goal in life is emancipation from phenomenal involvement; but they will spell ruin for the normal householders, interested in worldly prosperity and spiritual welfare.

तीक्ष्णाग्रं वक्रशीर्षं त्र्यसलिंगं विवर्जयेत्।
अतिस्थूलं चातिकृशं स्वल्पं वा भूषणान्वितम्।
गृही विवर्जयेत्तादृक् तद्धि मोक्षार्थिनो हितम्।। (हेमाद्रौ)

The householder would profit by worshipping a bāṇa-linga which is like a bee in colour, shape and size. It may be worshipped, fixed to a pedestal or not. It will secure worldly prosperity as well as ultimate liberation from all phenomenal ills. But those ascetics whose only concern is emancipation may worship bāṇa-lingas which are tawny in colour or dark, and of any size. The householder must never worship the bāṇa-lingas which are extremely small or unusually fat.

अर्थदं कपिलं लिङ्गं घनाभं मोक्षकांक्षिणाम्।
लघु वा कपिलं स्थूलं गृही नैवार्चयेत् क्वचित्।।

पूजितव्यं गृहस्थेन वर्णेन भ्रमरोपमम्।
तत् सपीठमपीठं वा मन्त्रसंस्कारवर्जितम्।
सिद्धिमुक्तिप्रदं लिङ्गं सर्वप्रसादपीठगम्।। (वीरमित्रोदये)

Even as there are methods of examining the śālagrāma-stones for their acceptability (parīkshā), there are methods to find out if a bāṇa-linga is suitable for worship. One of the methods is to weigh the bāṇa-linga against grains of rice, three, five or seven times. If the weight of the rice grains is not the same in all cases, then the bāṇa-linga is acceptable as genuine. If the weight increases, and does not decrease, when it is weighed seven times on a balance, then the supposed bāṇa-linga is genuine; otherwise it is a mere stone.

इत्येतल्लक्षणं प्रोक्तं परीक्षातत्त्वकोविदैः।
त्रिः सप्त पञ्च वारं तुलासाम्यं न जायते।
तदा बाणं समाख्यातं शेषं पाषाणसम्भवम्॥ (वीरमित्रोदये)

सप्तकृत्वस्तुलारूढं वृद्धिमेति न हीयते।
बाणलिङ्गमिति ख्यातं शेषं नार्मदमुच्यते॥

त्रिपञ्चवारं यस्यैव तुलासाम्यं न जायते।
तदा बाणं समाख्यातं शेषं पाषाणसम्भवम्॥ (सूतसंहितायाम्)

Another method is to drop the bāṇa-linga under examination into a flowing stream; if it can be picked up again, it is a genuine bāṇa linga, and its worship will secure happiness.

नद्यां वा प्रक्षिपेद्भूयो यदा तदुपलभ्यते।
बाणलिङ्गं तदा विद्धि नूनं सुखविवर्धनम्॥ (वीरमित्रोदये)

6

While there are no distinct prescriptions or procedures for the worship of śālagrāmas, there appears to be a separate procedure for worshipping bāṇa-lingas, different from the standard worship-ritual offered to Śiva. However, this procedure is heavily tāntrik in orientation, and suggests Kaula influence. *Yoga-sāra,* which is in the nature of a dialogue between Śiva and Pārvati, contains not only a dhyāna for Śiva in the from of a bāṇa-linga but also a long stava (hymnology) eulogizing the bāṇa-linga. He Bāṇa is the name of Śiva himself, and he is associated with his feminine counterpart, Śakti. He is said to be inebriated (pramatta) and equipped with the dart of eros, (kāma-bāṇa), which deludes the phenomena; and he is full of the erotic sentiment (śṛngārarasa). The worship of bāṇalinga is calculated to burn up our transmigrational involvement.

The verse for contemplation (dhyāna-śloka) is as follows :

प्रमत्तं शक्तिसंयुक्तं बाणाख्यं च महाप्रभुम्।
कामबाणान्वितं देवं संसारदहनक्षमम्।
शृङ्गारादिरसोल्लासं बाणाख्यं परमेश्वरम्॥

Then the procedure involves the mental worship of the bāṇa-linga, visualizing all articles of worship like sandal paste and flowers ('manasā gandha-pushpādyaih sampūjya manum smaret'). This is followed by rounds of breath-retention, which will cause delight to the bāṇa-linga ('prāṇāyāmam tatah kṛtvā bāṇa-lingam tu toshayet'). Then the devotee visualizes the identity of the bāṇa-linga with his own chosen deity, and recites the 'vāgbhava-mantra' in a state of contemplation ('tadishṭadevayor aikyam vibhāvya vāgbhavam japet').

After the completion of this ritual of silent and concentrated repetition of the mantra (japa) for the fixed duration, the devotee offers the following prayer to bāṇa-linga ('tato japam samāpyātha stavenānena toshayet').

This marks the completion of the ritual. The prayer-hymn (stava) contains nineteen verses, the first six of which appear to have been the original portion and the nucleus; the rest of the section opens afresh with the seed-syllable 'aim' which is the Śākta-praṇava, even as 'aum' is the Veđic praṇava (with which the first section begins). The first four verses in this latter section is the hymn-proper recounting the names of Śiva, the remaining verses being in the nature of 'phala-sruti' (eulogization of the benefits to be obtained by reciting this hymn).

एवं ध्यावा बाणलिङ्गं यजेत्तं परमं शिवम्।।

(मनसा गन्धपुष्पाद्यैः संपूज्यास्य मनुं स्मरेत्
प्राणायामं ततः कृत्वा बााणलिङ्गं तु तोषयत्।)

तदिष्टदेवयोरैक्यं विभाव्य वाग्भंव जपेत्।
ततो जपं समाप्याथ स्तवेनानेन तोषयेत्।।

अथ स्तवः।।

बाणालिङ्ग महाभाग संसारात् त्राहि मां प्रभो।
नमस्ते चोऽग्ररूपाय नमस्तेऽव्यक्तयोनये।।1।।

संसाराकारिणे तुभ्यं नमस्ते सूक्ष्मरूपधृक्।
प्रमत्ताय महेन्द्राय कालरूपाय वै नमः।।2।।

दहनाय नमस्तुभ्यं नमस्ते योगकारिणे।
भोगिनां भोगकर्त्रे च मोक्षदात्रे नमो नमः॥3॥

नमः कामङ्गनाशाय नमः कल्मषहारिणे।
नमो विश्वप्रदात्रे च नमो विश्वस्वरूपिणे॥4॥

बाणस्य वरदात्रे च रावणस्य क्षयाय च।
रामस्यानुग्रहार्थाय राज्याय भरतस्य च॥5॥

मुनीनां योगदात्रे च राक्षसानां क्षयाय च।
नमस्तभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः॥6॥

दाहिकाशक्तियुक्ताय महामायाप्रियाय च।
भगप्रियाय सर्वाय वैरिणां निग्रहाय च॥7॥

परित्राणाय योगिनां कौलिकानां प्रियाय च।
कुलाङ्गनानां भक्ताय कुलाचाररताय च॥8

कुलभक्ताय योगाय नमो नारायणाय च।
मधुपानप्रमत्ताय योगेशाय नमो नमः॥9।

कुलनिन्दाप्रणाशाय कौलिकानां सुखाय च।
कुलयोगाय निष्ठाय शुद्धाय परमात्मने॥10॥

परमात्मस्वरूपाय लिङ्गमूलात्मकाय च।
इत्येतत् परमं गुह्यं बाणलिङ्गस्य शंकर॥11॥

सः पठेत् साधकश्रेष्ठो गाणपत्यं लभेत सः।
स्तवस्यास्य प्रसादेन योगी योगित्वमाप्नुयात्॥12॥

राज्यार्थिनां भवेद्राज्यं भोगिनां भोग एव च।
साधूनां साधनं चैव कौलिकानां कुलं भवेत्॥13॥

यं यं कामयते मन्त्री तं तमाप्नोति लीलया।
बाणालिंगप्रसादेन सव्रमाप्नोति सत्त्वरम्॥14॥

किमन्यत्कथयामीह सर्वं वेत्सि कुलेश्वर।
महाभये समुत्पन्ने राजद्वारे कुलेश्वर॥15॥

देशान्तरभये प्राप्ते दस्युचौरादिसंकुले।
पठनात् स्तवराजस्य न भयं लभते क्वचित्॥16॥

बाणलिङ्गस्य माहात्म्यं संक्षेपात् कथितं मया।
तस्य श्रवणमात्रेण नरो मोक्षमवाप्नुयात्॥17॥

बाणलिङ्गः सदाऽराध्यं योगिनां योगसाधने।
कौलिकानां कुलाचारे पशूनां शत्रुनिग्रहे॥18॥

वेदज्ञानां वेदपाठे रोगिणां रोगनाशने।
यो यो नाराधयेदेनं सर्वं तन्निष्फलं भवेत्॥19॥

The following is an extract form *Sūta-samhitā* relating to the penance of Bānāsura and his obtainment of the holy linga as Śiva's gift to him.

भैरव उवाच-

बाणासुरः पुरा भद्रे शिवस्यातीव वल्लभः।
जितक्रोधो क्रोधोऽनुरक्तश्च शिवपूजाविधौ रतः॥

वह्निजो निपुणश्चैव शिल्पज्ञो लक्षणान्वितः।
दिने दिने स्वयं दत्त्वा लिङ्गं स्थाप्य प्रपूजयेत्॥

एवं वर्षशतं देवे दिव्यमानेन पूजयेत्।
तदा तद्भक्तिसुलभः प्रत्यक्षः शंकरो भवेत्॥

शङ्कर उवाच-

तुष्टोऽहं तव हे बाण वरं ब्रूहि किमिच्छसि।

भैरव उवाच-

शङ्करस्य वचः श्रुत्वा बाणो वचनमब्रवीत्॥

बाण उवाच-

यदि तुष्टोऽसि हे नाथ मह्यं त्वं मन्दभागिने।
क्लिष्टोऽहं तव देवेश लिङ्गं कृत्वा दिने दिने॥

तत्तल्लक्षणसंसिद्धलक्षणं शास्त्रनिर्मितम्।
शास्त्रार्थौ दुर्लभौ देव सिद्धश्चार्थश्च दुर्लभः॥

तस्मात् त्वं यदि मे तुष्टो लिङ्गं देहि सुलक्षणम्।

सर्वकामकृतार्थश्च सर्वसत्त्वानुकम्पनम्।
सर्वेषां च हितार्थाय प्रसादं कुरु शङ्कर॥

भैरव उवाच-

इत्येव वचनं तस्य शिवः परमकारणम्।
श्रुत्वा कैलासमूर्द्धानं शङ्करेण विनिर्मिताः॥

लिङ्गानां कोटिसंख्याश्च तथा चैव चतुर्दश।
सिद्धलिङ्गं तदा तत्तत् सर्व सिद्धोदयं स्वयम्॥

अयोज्यैवं सुसम्पूर्ण बाणस्य च समर्पितम्।
अक्षय्यफलदं बाणं स्थाप्यमानं च नित्यशः॥

सम्पूज्य बाणः सद्भावं कृत्वा प्रणयनं तदा।
तद् भावं स्वपुरं नीत्वा नूनं चिन्तयते शुचिः॥

अक्षय्यं यदि संसिद्धं स्थाप्यमानं दिने दिने।
सत्त्वानां सिद्धिहेत्वर्थं बाणस्थाने सुसंरये॥

लिङ्गानां कालिकागर्ते सञ्चितासु त्रिकोटयः।
श्रीशैले कोटयस्तिस्तः कोट्येका कन्यकाश्रमे॥

माहेश्वरे च कोटिस्तु कन्यातीर्थे च कोटिका।
महेन्द्रे चैव नेपाले एकैका कोटिरेव च॥

बाणार्चार्थं कृतं लिङ्गं बाणलिङ्गमतः स्मृतम्।
बाणो वा शिव इत्युक्तस्तत्कृतं बाणमुच्यते॥

तस्मात्तेषु प्रदेशेषु पुण्यस्थानेषु तेषु वा।
स्थितं तच्छिवसद्भावं शिवस्याकृतिविग्रहे॥

Yoga-Narasimha

MATSYA

KŪRMA

VARĀHA

NĀRASIMHA

VĀMANA

PARAŚU-RĀMA

ŚRĪ-RĀMA

KṚSHṆA

KALKI

CHATURVIMŚATI-MŪRTI

KEŚAVA

NĀRĀYAṆA

MĀDHAVA

GOVINDA

VISHNU

MADHU-SŪDANA

TRI VIKRAMA

VĀMANA

ŚRIDHARA

HRSHĪKEŚA

PADMANĀBHA

DAMODARA

SANKARSHAṆA

VASUDEVA

PRADYUMNA

ANIRUDDHA

PURUSHOTTAMA

ADHOKSHAJA





Śamkha for Blowing (Dhamana)



Śamkha for Abhisheka

Courtesy : Temple Treasures, Vol. I



Śamkha on Śamkhādhāra



Dakshiṇāvarta-Śamkha

Courtesy : Temple Treasures, Vol. I



Vishṇu's Emblems



Śamkha-Pīṭha (Kūrma)

Courtesy : Temple Treasures, Vol. I



Pāncha-Janya (In Sri Chāmuṇḍi Temple, Mysore)

Courtesy : Temple Treasures, Vol. I



Sālagrāma-Śilāhāra

Courtesy : Crafts Council of Karnataka, Bangalore

APPENDICES



जस्य दक्षिणे ॥ क्षेत्रं [illegible] ॥
सर्वक्षेत्रोत्तमोत्तमं ॥ योजनद्वादशमितं
सर्वतीर्थसमाकुलं ॥ तत्र चक्रनदीनाम ती
र्थं ब्रह्मणा निर्मितं ॥ तस्योत्तमे [illegible]
मम प्रीतिकरस्सदा ॥ [illegible] चि
त्र पाषाणाश्च [illegible]
[illegible] ॥ [illegible]
[illegible] निवासिना ॥ [illegible]
[illegible] ॥ मत्सा [illegible] ॥

१



एवं क्षेत्रस्य माहात्म्यं मृगपक्ष्यादयस्तथा ॥
चक्रनद्युत्तरे [illegible] पुण्यमुत्तमं ॥ सा
लग्रामशिला [illegible] समन्विता ॥
[illegible] प्रयत्नेन चातुर्वर्ण्य [illegible] ॥
[illegible]
[illegible] सा
लग्रामस्य चक्रता [illegible]
[illegible] ॥ [illegible]
[illegible] ॥ सालग्रामशिला
गर्भमासा [illegible] ॥ तत्र [illegible]



Sundial-Shell
(Architectonica perspective)

APPENDIX I

SĀLIGRĀMA-MŪRTI-LAKSHAṆA-SAMGRAHA

-सालग्राम मूर्तिलक्षणसंग्रहारम्भः-

श्रीरामचन्द्राय नमः।।

I

मूर्तिस्वरूपं मूर्तिभेदं च।।

गण्डक्याश्चोत्तरे तीरे गिरिराजस्य दक्षिणे।
क्षेत्रं तु विष्णुसान्निध्यात्सर्वक्षेत्रोत्तमोत्तम्।।1।।

योजनद्वादशमितं बहुतीर्थसमाकुलम्।
तत्र चक्रनदी नाम तीर्थं ब्रह्मादिनिर्मितम्॥2॥

तत्रोत्तरे महाशृङ्गे मम प्रीतिकरे सदा।
तथा या गर्भितास्तत्र पाषाणश्च खगेश्वर॥3॥

मच्चिह्नचिह्निताश्चैव तरवो धरणीतले।
नराणामपि पक्षीन्द्र किंचित्कालनिवासिनाम्॥4॥

सर्वार्थिषु भवेच्चक्रं मस्तके स्पष्टमेव च।
एवं क्षेत्रस्य माहात्म्यं मृगपक्ष्यादयस्तथा॥5॥

चक्रनद्युत्तरे मर्त्याः लभन्ते पुण्यमुत्तमम्।
सालग्रामशिलास्तत्र नानामूर्तिसमन्विताः॥6॥

पूजनीयाः प्रयत्नेन चतुर्वर्गफलाप्तये।
हिरण्यवज्रकीटेन निर्मितं चक्रमुत्तमम्॥7॥

मठपद्मादिभेदेन चक्रं बहुविधं स्मृतम्।
मूर्त्तयो द्विविधा ज्ञेयाः जलजाः स्थलजास्तथा॥8॥

जलस्थं कोमलं स्निग्धं तटस्थं परुषं स्मृतम्।
मूर्तयः पुष्टिदाः स्निग्धाः मोक्षदाः परुषाःस्मृताः॥9॥

श्यामा कृष्णा तथा पीता श्वेता रक्ता च कापिला।
अतिरक्ता धूम्रवर्णा विवर्णा मधुपिङ्गला॥10॥

बहुवर्णा कलङ्का च तथा संदिग्धवर्णिनी।
इत्यादिवर्णभेदेन ज्ञेया नानाविधाः शिलाः॥11॥

स्निग्धं सूक्ष्मं शीतलांगं वृत्तमुन्नतमस्तकमृ।
श्यामं कृष्णं तथा पीतं बहुवर्णं च लोहितम्॥12॥

वामचक्रं मध्यचक्रं चारुचक्रं सगह्वरम्।
वनमालाधरं वृत्तवदनं कमलादिमत्॥13॥

एता ग्राह्याः विशेषेण साधकस्य शुभप्रदाः।
स्निग्धं सिद्धिप्रदं नित्यं सूक्ष्मं दिव्यफलप्रदम्॥14॥

संन्तोषदं शीतलाङ्गं वृत्तं सिद्धिप्रदायकम्।
सर्वसिद्धिकरं श्यामं कृष्णं कीर्तिकरं सदा।।15।।

श्वेतं मोक्षप्रदं चैव पीतं धनकरं तथा।
सुखदं बहुवर्णं च रक्तं राज्यकरं तथा।।16।।

वामचक्रं मध्यचक्रं पुत्रपौत्राभिवृद्धिदम्।
कीर्तिप्रदं चारुचक्रं मानदं स्यात्सगह्वरम्।।17।।

वनमालायुतं चापि दारसौभाग्यदायकम्।
वृत्ताननं भुक्तिकरं चाथ कौशलदायकं।।18।।

पद्मादियुक्तं सौभाग्यधान्यधेनुफलप्रदम्।
न स्थूलं न कृशं भिन्नं नातिकृष्णं न कर्कशम्।।19।।

स्थिरासनयुतं चापि राज्यभोगापवर्गदम्।
चक्रैस्तु केवलैर्युक्तं पंचभिस्समलंकृतम्।।20।।

वनमालायुतं चक्रं तत्रास्ते श्रीसहायवान्।
जंब्वामलकतुल्या या सूक्ष्मचक्रद्वयान्विता।।21।।

तस्यामेव सदाकालं श्रिया सह वसाम्यहम्।
यथा यथा शिला सूक्ष्मा फलाधिक्यं तथा तथा।।22।।

क्षीरे वा तण्डुले वापि सालग्रामं निवेशयेत्।
दृष्ट्वाधिक्य तयोः किंचिदृगृहणीयद् बुद्धिमान्नरः।।23।।

II

अग्राह्यलक्षणम्।।

त्याज्यफलम्।।



Vakra-tuṇḍa

अथाग्राह्यान्प्रवक्ष्यामि सालग्रामान्स्वरूपतः।
करालं विकरालं च तिर्यग्वक्त्रं विदिग्मुखम्॥24॥

पृथुवक्त्रं चोर्ध्ववक्त्रमधः पार्श्वशिरोमुखम्।
वक्रतुण्डं बद्धचक्रमचक्रं वक्रचक्रकम्॥25॥

भग्नचक्रं भुग्नचक्रं तथा विषमचक्रकम्।
अव्यक्तं बहुचक्रं च पङ्क्तिचक्रं विवर्णकम्॥26॥

धूम्रातिरक्ता कपिला कलङ्का मधुपिङ्गला।
संदिग्धवर्णा स्फुटिता भग्नोष्ठा बन्धिता तथा॥27॥

अन्तः स्फुटितभुग्नं च दर्दुरं भिन्नमस्तकम्।
अतिस्थूलं चातिह्रस्वं अंन्तस्सलिलधारणम्॥28॥

त्रिकोणं बहुरेखाढ्यं चिह्नहीनं चलासनम्।
अर्धमुन्नतमुष्णं च दग्धपृष्ठं च रूक्षकम्॥29॥

छिद्रासनं बहुच्छिद्रं स्फोटं चैहिकवांछिभिः।
पूजाय वर्जनीयां स्यान्निष्कामाश्चेन्न दुष्यति॥30॥

करालं कुलनाशं स्यात् विकरालमरिष्टदम्।
कार्यविघ्नकरं तिर्यग्विदिग्वक्त्रं तु शोकदम्॥31॥

अपुष्टिदं स्थूलचक्रमूर्ध्वमुच्चाटनं स्मृतम्।
अधोवक्त्रं पार्श्ववक्त्रं क्षयरोगविधायकम्॥32॥

शिरोवक्त्रं पुत्रवृद्धि प्रतिबन्धकमार्तिदम्।
दुःखदं वक्रतुण्डं च मित्रघ्नं बद्धचक्रकम्॥33॥

अचक्रं सर्वशून्यं च वक्रचक्रं भयप्रदम्।
कपिला पत्निहानिः स्यात्कलङ्क क्षयकारिणी॥34॥

मधुवर्ण मध्यमं स्याद् भीतिः संदिग्धवर्णिनी।
पापदं भग्नचक्रं च स्तेयदं भुग्नचक्रकम्॥35॥

विषादं चक्रविषमं बहुचक्रं कुलक्षयम्।
पंक्तिचक्रं कुलघ्नं स्याद्विवर्णा बलनाशनी॥36॥



Bhagnoshṭha

स्फुटितं पुत्रनाशाय भग्नोष्ठं बुद्धिनाशनम्।
आस्थानभङ्गदं भग्नं दर्दुरं क्लेशदं स्मृतम्॥37॥

स्मयोपहं निम्नशीर्षम् अतिस्थूलं धनापहम्।
अतिह्रस्वमपूजार्हं त्रिकोणं बन्धुनाशनम्॥38॥

बहुरेखाङ्कितं दद्यादसत्यं जनसंसदि।
सुकृतघ्नमचिह्नं च स्थाननाशं चलासनम्॥39॥

कुलवृद्धिविनाशाय चार्धमुन्नतमीरितम्।
चित्रदाहदमुष्णं च दग्धं मृत्युभयप्रदम्॥40॥



Bahucchhidra

उद्वेगदायकं रूक्षं छिद्रपृष्ठं तु रोगदम्।
पैशुन्यदं बहुच्छिद्रं स्फोटमायुष्यनाशनम्॥41॥

III

द्वारमानम्॥

एतत्त्याज्यफलं प्रोक्तं द्वारमानमथोच्यते।
वृत्तसूत्राष्टमो भागः उत्तमं वक्त्रलक्षणम्॥42॥

मध्यमं तु चतुर्भागं कनीयांसं त्रिभागकम्।
क्षेत्रं तु त्रिविधं प्रोक्तं मूर्तितो वर्णतस्तथा॥43॥

मिश्रलक्षणतश्चेति विज्ञातव्यं विचक्षणैः।
वामनानामच्युतं स्यात्छ्रीधराणां च वामनम्॥44॥

क्षेत्रं वाराहमूर्त्तेस्तु श्रीधरं त्वखिलप्रदम्।
हयग्रीवस्य वाराहं लक्ष्मीक्षेत्रमथापि वा॥45॥

क्षेत्रं नारायणं ज्ञेयं अन्येषां क्रमशः स्मृतम्।
कपिलो नारसिंहश्च वामनस्त्वतसीप्रभः॥46॥

वासुदेवः सितो ज्ञेयः रक्तः संकर्षणः स्मृतः।
दामोदरस्तु नीलाभः अनिरुद्धस्तथैव च॥47॥

श्यामं नारायणं प्रोक्तं कृष्णवर्णं तु वैष्णवम्।
बहुवर्णमनन्तं च श्रीधरं पीतमुच्यते॥48॥

लक्षणान्तरयोगेन तत्तत्क्षेत्रमुदाहृतम्।
अनेकमूर्त्तयः सन्ति तत्तल्लक्षणलक्षिताः॥49॥

वैलक्षण्यं विशेषेण ज्ञातुं शक्यं न वै कलौ।
वर्णरूपाद्यवयवैः प्रमाणबिललाञ्छनैः॥50॥

द्वारदेशविभेदेन भेदः केषाञ्चिदुच्यते।
चक्रवक्त्रा शिलाशुद्धिसंपत्तावुक्तलक्षणैः॥51॥

कैश्चिन्न्यूनापि सा मूर्त्तिरुत्तमा सिद्धिदायिनी।
वासुदेवो विप्रजनैरुपास्यः पूजने तथा॥52॥

संकर्षणः क्षत्रियस्य प्रद्युम्नो वैश्यपूजितः।
अनिरुद्धस्तु शूद्राणां पूज्यः सर्ववरप्रदः॥53॥

विप्राणां मूर्त्तयस्सर्वाः पूजनीयाः प्रयत्नतः।
क्षत्रियस्य त्रयः पूज्याः वैश्यस्य द्वयमेव च॥54॥

शूद्रस्यैकं भवेत्ताक्ष्य सर्वदा सर्वसिद्धये।
सालग्रामाः समाः पूज्याः विषमा न कदाचन॥55॥

विषमे त्वेकमेव स्यात्समे द्वौ न कदाचन।
एते सामान्यतः प्रोक्ताः सालग्रामगुणागुणाः॥56॥

IV

विशिष्य वर्णनम्॥

विशिष्य तद्वर्णनाय चोद्देशः तूद्देशः उद्देशः क्रियतेऽधुना।
मत्स्याद्याः केशवाद्याश्च हयास्यः कपिलस्तथा॥57॥

यज्ञो दत्तः शिंशुमारः मुकुन्दो हंस एव च।
परमहंसः वैकुण्ठो पुंण्डरीकाक्ष एव च॥58॥

लक्ष्मीपतिर्देवदेवो वटपत्रशयस्तथा।
विश्वम्भरो विश्वरूपो गरुडध्वज एव च॥59॥

पीताम्बरधरश्चैव सत्यवीरश्रवस्तथा।
बहरूपी पुण्डरीकः पारिजातः सुदर्शनः॥60॥

अमृताहरणश्चक्रपाणिर्नारायणस्तथा।
जगद्योनिस्तथानन्त अव्ययो हरिमूर्त्तियः॥61॥

त्रिमूर्तिर्हरिपूर्वश्च हरः शंकरपूर्वकः।
नारायणः स्वयंभूश्च परमेष्ठी चतुर्मुखः॥62॥

पितामहः स्वर्णगर्भो गरुडः शेष एव च।
नरश्च बलरामश्च त्रिरामो हैहयाधिपः॥63॥

शिवनाभिरघोरश्च सद्योजातस्तथैव च।
वामदेवो महेशानास्तत्पुमांश्च तथैव च॥64॥

सूर्यमूर्त्तिरितिप्रोक्ता एकाशीतिविधाः शुभाः।
मूर्त्तयो लक्षणं तासां दर्शयिष्ये पृथक्पृथक्॥65॥


लक्षणायोगतः॥ वराहशक्तिलिंगं तु चक्रे चाविनास्थिते॥
इंद्रनीलनिभः स्थूलस्त्रिरेखालांछनं शुभं॥ दक्षपार्श्वे
स्थितो पार्श्वे चक्रे समलग्ने कोदरात्॥ वनमालायुतो
लक्ष्मीवराहः परिकीर्तितः॥ अतसीकुसुमप्रख्यो नी
लोत्पलनिभो तु वा॥ दीर्घाकारं तु वा दीर्घं द्वारं चक्रे स
जर्जरी॥ पृष्ठे यो जातचक्री यस्यं वामतश्चक्रमुन्नतः॥ स्थ
ए पृष्ठे रेखा समायुक्ते वराहाकृतिरेव वा॥ आस्यमात्रे भु
वानाक्ष्मापादलांगूल कैतथा॥ दक्षिणे कोस्तुभा रेखा
रखाय पृष्ठे च पार्श्वके॥ वराहमूर्ति [illegible] लक्ष्मी
[illegible]
ब्रह्मांडे॥ वराहः स [illegible] चक्रयेस्य स मब्जे॥


तस्य संदर्शनाद्देवप्राप्नोति मनसेप्सितं॥ नारसिं
होदीर्घास्यं श्यामलाकार पृथ्वीवलय वेष्टितः॥
द्वारदेशे लसच्चक्रं वाराहं तं विदुर्बुधाः॥ स्कंदे
इंद्रनीलनिभः स्थूलस्त्रिरेखालांछितं शुभं॥ वरा
हमूर्तिर्विज्ञेया सर्वकामफलप्रदा॥ दीर्घ चोणास
मायुक्तं एकदंष्ट्रं सुनिर्मलं॥ वनमालासमायुक्तं
रम्यं श्वेतवराहमुच्यते॥ नारसिंह [illegible] देशा
प्रकारास्य: नारसिंहास्यमूर्तयः॥ तेषां दो हि विधा
लक्ष्मीनृसिंह [illegible] विदार [illegible]॥ नारसिंहोमता
देवः पृथुवक्त्रः सदंष्ट्रकः॥ ब्रह्मचर्येण पूज्येत नान्य
था पूजने भवेत्॥ वामपार्श्वे स्थिते चक्रे कृष्णाव

V

मूर्तिलक्षणम्॥

अथ दशावतारमूर्तिलक्षणम्॥

अथ मत्स्यमूर्तिलक्षणम्॥

नानावर्णसमोपेता कांस्यवर्णयुतापि वा।
दीर्घाकारयुता स्निग्धा द्वारमध्ये द्विचक्रयुक्॥66॥

चक्रमेकं पुच्छभागे दक्षिणे शफराकृतिः।
वामे प्रदृश्यते रेखा मत्स्यमूर्तिः शुभप्रदा॥67॥

मत्स्यरूपं तु देवस्य दीर्घाकारं तु यद्भवेत्।
चक्रत्रयसमायुक्तं कांस्यं वर्णां सुशोभनम्॥68॥

मत्स्याकृतिमुखाकारं मुखे दृश्यत्सुचक्रकम्।
श्रीवत्सबिन्दुमालाढ्यं मत्स्यमूर्तिं शुभं विदुः॥69॥



Matsya

अथ कूर्ममूर्त्तिलक्षणम्॥

चतुर्धा कूर्ममूर्त्तिश्च तस्या लक्षणमुच्यते।
कूर्मः स्यादुन्नतः पृष्ठे श्वेताभो गोखुरान्वितः॥70॥

विख्यातो दुर्लभः सर्वमनोरथफलप्रदः।
बिन्दुत्रयान्विता शङ्खयुता चक्रयुताऽपि वा॥71॥

दीर्घदक्षिणवामा स्याद्भानोर्वलयपञ्चकैः।
भूषिता कूर्ममूर्तिः स्याद्दुर्लभा सर्वकामदा॥72॥

वृत्तायता कूममूर्तिः कनकच्छविसंयुता।
स्नुहिपुष्पाकृतिर्वापि चक्रस्योभयपार्श्वके॥73॥

कूर्ममूर्तिः खगेशान सर्वकामफलप्रदा।
वर्तुला मकाराकारा दीर्घद्वारा खगेश्वर॥74॥

स्थिरासना ततः पृष्ठे उन्नता नीललोहिता।
कूर्ममूर्मिरिति ख्याता पुत्रपौत्रादिवृद्धिदा॥॥75॥

नाभिचक्रयुतारम्या कूर्माकारा तु पार्श्वतः।
कूर्ममूर्तिः खगेशान दुर्लभा सर्वकामदा॥76॥



Kūrma

तुरङ्गमुखाकारो वनमालाब्जचक्रवान्।
श्यामलो हेमबिन्दुश्रीर्महाकूर्मः स उच्यते॥78॥

बिन्दुत्रयसमायुक्तं चक्रवच्छङ्खलाञ्छनम्।
सुदीर्घं दक्षिणास्यं च तत्र चक्रेण चिह्नितम्॥79॥

वृत्तलक्षणसंयुक्तं भानोर्वलयसंयुतम्।
कूर्ममूर्तिः सचक्रं तु दुर्लभं सर्वकामदम्।।80।।

बिन्दुत्रयसमायुक्तं कांस्यवर्णं सुशोभनम्।
कूर्मस्तथोन्नतपृष्ठे वर्त्तुलावर्त्तलाञ्छनः।।81।।

हरितं वर्णमाधत्ते कौस्तुभेन सुचिह्नितम्।
तत्तल्लक्षणसंयुक्तं भानोर्वलयपञ्चकम्।।82।।

कूर्ममूर्त्तिरधोवक्त्रं दुर्लभं सर्वकामदम्।
स्थूलं च निबिडाकारं श्यामवर्णं सुचक्रकम्।।83।।

कर्बुरं वाऽथ कपिलं श्यामं वा कूर्ममुच्यते।।
इति कूर्ममूर्त्तिलक्षणं।।

अथ वराहमूर्तिलक्षणम्।।

दक्षपार्श्वस्थिते चक्रे समे लग्ने प्रदेशतः।
वनमालायुतो लक्ष्मीवराहः परिकीर्तितः।।84।।

अतसीकुसुमप्रख्यं नीलोत्पलनिभं तु वा।
दीर्घाकारं तु तद्दीर्घद्वारयुक्तं सपञ्जरम्।।85।।

पृष्ठेन्नतं तु दीर्घास्यं वामतश्चक्रमुन्नतम्।
पृष्ठे रेखासमायुक्तं वाराहाकृतिरेव वा।।86।।

आस्यमात्रंतु वा तार्क्ष्य पदलांगूलकं तथा।
दृश्यते कौस्तुभाकाररेखा पृष्ठे च पार्श्वके।।87।।

वराहमूर्त्तिरित्युक्ता राज्यलक्ष्मीप्रदा नृणाम्।
पुत्रपौत्रप्रदा वित्तभूप्रदा ज्ञानवर्धिनी।।88।।

अधश्चक्राङ्कितलसदेकदंष्ट्रं समुद्धृतम्।
अङ्कुशाकारवदनं वाराहं भूप्रदं शुभम्।।89।।

सुखासीनं सुपीताभं सूक्ष्मरन्ध्रं सुचक्रकम्।
सुदंष्ट्राभासमोपेतं वाराहं धरणीप्रदम्।।90।।

दीर्घास्यं श्यामलाकारं पृथ्वीवलयवोष्टितम्।
छत्रचामररेखाढ्यं कल्पवृक्षसमन्वितम्॥91॥

द्वारदेशे लसच्चक्रं वाराहं परिचक्षते।
अधोवक्त्रमतिस्निग्धं पृष्ठोन्नतसुपीतकम्॥92॥

वाराहं धान्यफलदं सर्वैराराधनीयकम्।
सूचीमुखं सूक्ष्मचक्रमुन्नतं मस्तकोपरि॥93॥

त्रिबिन्दुभिः परिवृतं वराहममृतप्रदम्।
घोणरूपैर्वराहाख्या चतुलाञ्छनशोभिता॥94॥

दद्यात्सा मोक्षसंसिद्धिं ब्रह्मचर्येण पूजिता।
दीर्घघोणसमायुक्तमेकदंष्ट्रसुनिर्मलम्॥95॥

वनमालायुतं रम्यं श्वेतं वाराहमुच्यते।
दीर्घास्यं श्यामलाकारं पृथ्वी वलयभूषितम्॥96॥



Vārāha

द्वारदेशे लसच्चक्रं वाराहं परिचक्षते।
वाराहं शक्तिलिंगं तु चक्रे च विषमे स्थिते॥97॥

इन्द्रनीलनिभं स्थूलं त्रिरेखालांछितं परम्।
वाराहः स च विज्ञेयः सूक्ष्मचक्रेऽन्तरेऽस्थिते॥98॥

तस्य संपूजनाद्देही प्राप्नोति मनसेप्सितम्।
इति वराहमूर्तिलक्षणम्॥

अथ नृसिंहमूर्तिलक्षणम्॥
त्रयोदशप्रकारा स्युर्नारसिंहस्य मूर्त्तयः॥99॥

तत्र तु द्विविधौ लक्ष्मीनृसिंहाख्यविदारणौ।
नृसिंहः कपिलो ज्ञेयः स्थूलचक्रः सुदंष्ट्रकः॥100॥

त्रिबिन्दुः पञ्चबिन्दुर्वा ब्रह्मचर्येण पूजितः।
विवृतास्यः वामचक्रं वर्तुलं कपिलप्रभम्॥101॥

नारसिंहं गृहस्थानां भीतिदं बिन्दुभिर्युतम्।
द्विचक्रं च बृहच्चक्रं कपिलं कनकप्रभम्॥102॥

लक्ष्मीनृसिह्यं विज्ञेयं ब्रह्मचारिभिरर्चितम्।
वामपार्श्वस्थिते चक्रे कृष्णवर्ण सबिन्दुकम्॥103॥

लक्ष्मीनृसिंहं विज्ञेयं भुक्तिमुक्तिफलप्रदम्।
सप्तचक्रं बहुमुखं समन्तात्स्वर्णभूषितम्॥104॥



Vidāraṇa Narasimha

सर्वतोमुखमाख्यातं बहुवर्ण तु मोक्षदम्।
बहुचक्रं सूक्ष्मरन्ध्रं बहुवर्ण बहूदरम्॥105॥

पातालनारसिंहाख्यं भिक्षूणाममृतप्रदम्।
अस्पष्टचक्रमालास्यमल्पभारं महोदरम्॥106॥

तत्कुक्षिनारसिंहाख्यं वनवासिभिरार्चितम्।
अन्तश्चक्रं बृहद्द्वारं दक्षिणोन्नतमस्तकम्॥107॥

विदारणमिति ख्यातं दंष्ट्राभ्यामुपशोभितम्।
बहुच्छिद्रं भिन्नचक्रं सुवर्णकनकान्वितम्॥108॥

तच्छिद्रं राक्षसं ज्ञेयं नृसिंहं गृहदाहकम्।
सुवर्णबिन्दुभिर्युक्तं बृहच्चक्रं बृहन्मुखम्॥109॥

वक्रदंष्ट्रं नृसिंहं तु यतीनां प्रीतिदं सदा।
द्विचक्रं द्विमुखं स्थूलं दूर्वाभं चोन्नतं शिरः॥110॥

दारिद्र्यफलदं पुंसां विद्युज्जिह्वं नृसिंहकम्।
पुरः पार्श्वे च पृष्ठे वा चक्राभ्यामुपशोभितम्॥111॥

अन्तर्मुखमिति ख्यातमर्चकानां विमुक्तिदम्।
स्थूलचक्रद्वयं मध्ये गुंजालाक्षालवर्णकम्॥112॥

स्फुटितं विषमं चक्रं नारसिंहं च कापिलम्।
संपूज्यं मुक्तिमाप्नोति संग्रामे विजयी भवेत्॥113॥

सूक्ष्मरन्ध्रं द्विचक्रं च वनमालाविभूषितम्।
तद्बालनारसिंहाख्यं नृणां संसारमोक्षदम्॥114॥

दीर्घास्यः कपिलाकारो दीर्घचक्रो महाद्युतिः।
नारसिंह इति ख्यातो योग्यो मस्करिपूजने॥115॥

इति नृसिंहमूर्तिलक्षणम्॥



Bāla-Narsimha

अथ वामनमूर्त्तिलक्षणम्॥

वर्त्तुलश्चातिह्रस्वश्च वामनः परिकीर्तितः।
तं तु पञ्चप्रभेदेन वक्ष्ये मूलानुसारतः॥116॥

मध्यचक्रं चातिहूस्वम् अतिस्निग्धं च कार्ष्णिकम्।
स्पष्टचक्रं वामनं स्यान्नृणामीप्सितकामदम्॥117॥

अतसीकुसुमप्रख्यं किंचिदुन्नतमस्तकम्।
तद्वामनं कामदं स्यात्किंचिदस्पष्टचक्रकम्॥118॥

वर्तुलं नीलमेघाभं वनमालाविभूषितम्।
सूक्ष्मरन्ध्रं बृहत्कुक्षि वामनं भूवि दुर्लभम्॥119॥

वामनाख्यो भवेद्देवः ह्रस्वा यस्य भवेत्तनुः।
ऊर्ध्वचक्रं सुचक्रं च सोर्चितोऽर्ध्वप्रदो नृणाम्॥120॥

सुवर्णबिन्दुसहितं हूस्वचक्रं च वर्तुलम्।
सूक्ष्मद्वारं स्निम्धवर्णं वामनं परिचक्षते॥121॥

इन्द्रनीलनिभाकारं वनमालाम्बुजोज्वलम्।
हूस्वं च वर्तुलं चैव वामनं परिचक्षते॥122॥

एतल्लक्षणसंयुक्तं दधिबुद्बुदशोभितम्।
वामनं नीलरक्ताभं वदन्ति दधिवामनम्॥123॥

अधश्चक्राग्रविलसद्दधिबुद्बुदशोभितम्।
मूर्तिः श्रियं विधातृ स्याद्दधिगोपालवामनम्॥124॥

ऊर्ध्वचक्राग्रविलसद्दधिबुद्बुदशोभितम्।
वामनं नीलरत्नाभं वदन्ति दधिवामनम्॥125॥

वर्तुलं स्निग्धमत्यन्तस्पष्टचक्रसमन्वितम्।
हूस्वमुन्नतिमच्चैव दीर्घास्यमतिगह्वरम्॥126॥

स्फुरदिद्धरेखावलयं नाभिस्तस्योन्नता भवेत्।
चक्रस्योऽभपार्श्वे तु स्नुहिपुष्पाकृतिर्भवेत्॥127॥

केसराभं तु वै ताक्ष्य दृश्यते चक्रपार्श्वयोः।
गृहिणां वामनं श्रेष्ठं सुखसौभाग्यदायकम्॥128॥

अन्नवृद्धिं प्रजावृद्धिं भूलाभं दिशति ध्रुवम्।
वर्तुलश्चातिह्रस्वश्च वामनः परिकीर्तितः॥129॥

अन्नपानसमृद्धिश्च सर्वसौभाग्यदायकः।
आरोग्यसुखदश्चैव वामनः परिकीर्तितः॥130॥

कदंबकुसुमाकारो रेखापञ्चकसंयुतः।
वर्तुलश्चातिह्रस्वश्च वामनः परिकीर्तितः॥131॥

वृत्ताकारश्छत्रशिराः श्रीभूमीन्दुसमुज्ज्वलः।
हेमधूलिपरिक्षिप्तो हेमाङ्गं वामनं विदुः॥132॥

सितकृष्णारुणोपेतं दीर्घाकारं बृहद्बिलम्।
भित्तिभागगतं चक्रं वामे वा दक्षिणेऽपि वा॥133॥

इति वामनमूर्त्तिलक्षणम्॥



Vāmana

अथ परशुराममूर्तिलक्षणम्॥

जामदग्न्यस्तु भगवान्द्विविधः परिकीर्तितः।
सितकृष्णारुणोपेतं दीर्घाकारं बृहद्बिलम्॥134॥

भित्तिभागगतं चक्रं वामे वा दक्षिणेऽपि वा।
चक्रभागे भवेद्बिन्दुः परश्वाकृतिरेव वा॥135॥

पृष्ठे वा पार्श्वतो वापि रेखादंष्ट्राकृतिर्भवेत्।
जामदग्न्यस्तु भगवानर्चनीयो महीभृताम्॥136॥

लसत्परशुरेखाढ्यो दूर्वाश्यामस्तथोन्नतः।
नाभिचक्रयुतश्चैव रामः स्याज्जमदग्निजः॥137॥

केवलं लाञ्छितः पृष्ठे परश्वाकृतिरेखया।
स जामदग्न्यो भगवान् शान्ताख्यः शान्तिदोऽर्चितः॥138॥

इति परशुराममूर्त्तिलक्षणम्॥

अथ राममूर्तिलक्षणम्॥

अष्टधा राममूर्तिः स्याद्वीररामदिभेदतः।
सीतारामस्तु तत्रापि द्विविधः परिकीर्तितः॥139॥

कोदण्डी कुक्कुटाडाभं श्यामलं पृष्ठमुन्नतम्।
रेखाद्वयसमोपेतं द्वारदेशे खगेश्वर॥1140॥

धनुराकृतिका रेखा दृश्यते पार्श्वतोऽपि वा।
पृष्ठतो वा भवेद्रामो दशकण्ठकुलान्तकः॥141॥

बाणतूणीरचापाढ्यः कुण्डलस्त्रक्समन्वितः।
सूक्ष्मकेसरचक्राढ्यो वीररामः श्रियावहः॥142॥

पृष्ठभागो पञ्चरेखा चापबाणौ च पार्श्वतः।
स बालरामो विज्ञेयः पुत्रदोऽत्र न संशयः॥143॥

जम्बूफलसमाकारं कृष्णवर्णं सबिन्दुकम्।
पृष्ठे सुषिरमारभ्य वक्त्रे मकरकुण्डलम्॥144॥

ललाटे हेमबाणस्तु बिन्दुनापि समन्वितम्।
गोपालक्षेत्र उत्पत्त्या सदा रामस्य लक्षणम्॥145॥



कलिनाशकरं प्रोक्तं सर्वज्ञानफलप्रदम्।
अपुत्रो लभते पुत्रं सर्वमङ्गलकारणम्॥146॥

दिव्यबाणेन संयुक्तः चापतूणीरसंयुतः।
करालवदनो रक्तबिन्दुयुक् चक्रशोभितः॥147॥

स स्याद्विजयरामाख्यः केसरोपेतचक्रकः।
मूर्ध्नि मालाधनुर्बाणौ पार्श्वे खुरयुतस्तथा॥148॥

हृष्टराम इति ख्यातो भुक्तिमुक्तिफलप्रदः।
धनुषैकेन संयुक्तो वर्तुलः किंचिदायतः॥149॥

कोदण्डरामनामा स्याच्छुद्धनीलाम्बुदप्रभः।
एकचक्रा तु वदने कृष्णवर्णसुशोभना॥150॥

सा राममूर्तिर्विज्ञेया पूजकस्य कवित्वदा।
रेखाकारधनुर्बाणं स्थूलदीर्घं सबिन्दुकम्॥151॥

नाभिचक्रं बहुच्छिद्रं रामं दाशरथिं विदुः।
वदनेऽप्येकवदनः चतुश्चक्रोऽम्बरप्रभः॥152॥

चापबाणाङ्कुशच्छत्रध्वजचामरसंयुतः।
वनमालाधरो देवः सीतारामः प्रकीर्तितः॥153॥

सर्वसौभाग्यदश्चापि सर्वत्र विजयप्रदः।
द्वारद्वये चतुश्चक्रो वामतश्चैकचक्रवान्॥154॥

बाणतूणीरचापाढ्यः सीतारामः स्त्रगन्वितः।
सर्वसौभाग्यदश्चापि सर्वत्र विजयप्रदः॥155॥

सव्यापसव्यतूणीरसुषिराभ्यां विराजितम्।
सीताचक्रसमोपेतं सीताराममिति स्मृतम्॥156॥

पार्श्वे सायुधसन्मुखं ससुषिरं पृष्ठे च कल्पद्रुमम्।
पार्श्वे भूषितचक्रलाञ्छितशरं धातुत्रयं सुस्मितम्॥157॥



Sītā-Rāma

सीतारामसमाख्यया सुविदितं लोकत्रये दुर्लभम्।
षट्चक्राङ्कितनीलपीतसहितं साम्राज्यमुक्तिप्रदम्॥158॥

द्वारद्वये चतुश्चक्रः श्यामवर्णः स्त्रगन्वितः।
कोदण्डी कुक्कुटाण्डागः बाणभूखण्डतूणवान्॥159॥

पृष्ठचक्री शिरश्चक्री सीतारामः प्रकीर्तितः।
पूर्वभागे त्रिवदनः पार्श्वे चक्रेण संयुतः॥160॥

सिंहासनसमासीनो रामः परिजनैः सह।
पट्टाभिराम इत्युक्तः राज्यलक्ष्मीप्रदो नृणाम्॥161॥

द्वारद्वये चतुश्चक्रो यत्र द्वितित्रतयस्तथा।
वनमाला पुष्कला च बाणतूणीरसंयुतः॥162॥

सीताभरतशत्रुघ्नलक्ष्मणप्राणसेवित:।
स्पष्टचक्र: स्थिरासीनो छत्रचामरलांछन:॥163॥

अभिषक्तो महाराम: धान्यधेनुधनप्रद:।
मध्यमं रामचक्रं हि वामे सीतासमन्वितम्॥164॥

दक्षिणे लक्ष्मणोपेतं पार्श्वचक्रे सगह्वरे।
शत्रुघ्नभरतोपेतं आसनोपरि चाग्रत:॥165॥





एकचक्रे हनुमता सुग्रीवेण च सेवितम्।
जम्बूफलसमाकारं तूणीरद्वयशोभितम्॥166॥

ध्वजचामरसंयुक्तं बाणबाणासनोज्ज्वलम्।
सुवर्णबिन्दुसहितं कृष्णमुन्नतमस्तकम्॥167॥

पट्टाभिषेकं श्रीरामं परिवारसमन्वितम्।
आयुरारोग्यदं पुंसां पुत्रपौत्राभिवृद्धिदम्॥168॥

श्रीकरं सर्वपापघ्नं सर्वत्र विजयप्रदम्।
बाणतूणीरचापाढ्यं शान्तं भूषितचक्रकम्॥169॥

शोकराम इति ख्यातं वर्णतः शितधूसरम्।
स एव युतचक्राद्यः योगराम इतीरितः॥170॥

पूर्वभागे त्रिवदनः त्रिकोणाकृतिरेव च।
बलं प्रयच्छति सदा सर्वत्र विजयप्रदः॥172॥

कुक्कुटाण्डसमोपेतः अधोवक्त्रः सकुण्डलः।
द्वारदेशसमासक्तकल्पवृक्षसुचिन्हितः॥172॥

वामपार्श्वे शिरश्चक्ररेखालाञ्छनसंयुतः।
सीतारामः स विज्ञेयः भुक्तिमुक्तिफलप्रदः॥173॥

कोदण्डकुक्कुटाण्डाभं बाणतूणीरसंयुतम्।
गोखुरी पुच्छचक्री च सीतारामः स उच्यते॥174॥

तूणीराकृतिमच्छ्यामं चापद्वयशरान्विम्।
नानाध्वजसमोपेतं रेखाचामरसंयुतम्।
श्रीरामपञ्जरं ज्ञेयं सर्वत्र विजयप्रदम्॥175॥

इति राममूर्तिलक्षणम्॥

अथ बलराममूर्तिलक्षणम्॥

हलरेखामुसलवान्शुक्लाम्बोधिनिभात्मवान्।
मधुबिन्दुधरः श्रीमान्स तं संकर्षणं विदुः॥176॥

स्थूलचक्रो भवेद्देवो हरिर्लोहितवर्णवान्।
बलभद्रो भवेद्देवो गोत्रकीर्तिविवर्धनः॥177॥

शङ्खचक्रगदाकरो मध्यतो यत्र दृश्यते।
संकर्षणो नाम देवः संस्मृत्या जायते पदम्॥178॥

दीर्घाकारं बृहद्द्वारं पृथुचक्रं च यद्भवेत्।
श्वेताम्बरहलं चिह्नं मुसलाकृतिरेव वा॥179॥



Bala-rāma

नीलोत्पलप्रसूनाभं पृष्ठे वा चासनेऽपि वा।
बलशाली भवेद्रामः वंशकोशविवर्धनः॥180॥

द्वितीयो वामचक्रस्तु रेखा चैव तु दक्षिणे।
बलशाली भवेद्रामः लाङ्गलाङ्कितशोभनः॥181॥

सर्वत्र रक्तवर्णः स्यात पीनीलाभवर्जितः।
सचक्रो वा अचक्रो वा सीरपाणिः शुभप्रदः॥182॥

पीतवर्णधरो वक्त्रे धनुःपरशुलांगलैः।
अङ्कितो रामनामा स्यात्सर्वमृत्युहरः शुभः॥183॥

कदंबकुसुमाकारबिन्दुना परिभूषितः।
धनुर्बाणधरो रेखा पद्मरेखासमन्वितः॥184॥

पृष्ठभागो तथा छिद्रः पीतरेखासमन्वितः।
रामो रामश्च रामोऽतिदुर्लभः सर्वकामदः॥185॥

इति बलराममूर्तिलक्षणम्॥

अथ कृष्णमूर्तिलक्षणम्॥

कृष्णमूर्त्तिप्रभेदास्तु त्रयोविंशतिरीरिता:।
कृष्ण: पीत: कृशतनुर्भित्तिभागे तु चक्रयुक्॥186॥

द्वारतुल्यो भवेन्नाभि: कूर्चाकारस्तु पृष्ठत:॥186॥

कृष्णो वृत्ताकृतिस्ताक्ष्र्य सर्वेषां पापनाशन:।
कृष्ण: मध्योन्नत: पृष्ठे वर्तुलो परिचिह्नित:॥187॥

हरिद्राभ अधोभागे कौस्तुभेन तु लांछित:।
सा कृष्णमूर्तिर्विज्ञेया श्रीप्रदा कीर्तिवर्धिनी॥188॥

उन्नतो मूर्ध्नि कृष्णाभ: निम्नोऽधस्तात्त्रिबिन्दुल:।
स बालकृष्णो विज्ञेय: दीर्घास्य: पुत्रभाग्यद:॥189॥

दक्षादिवामपर्यन्तं मुखाधस्तात्तु शोभना।
रेखा स्यात्कृष्णवर्णाढ्या बिन्दुद्वयविभूषिता॥190॥



Kṛshṇa

कालीयमर्दन: साक्षात्सर्वारातिविनाशन:।
सव्यापसव्यरेखाभ्यां भूषित: सूक्ष्मचक्रक:॥191॥

पार्श्वे मेरुयुतो देव: धनञ्जयविभु: शुभ:।
असिवर्णश्च न स्थूलो चक्रभागेऽतिशोभन:॥192॥

वनमालावृतः पृष्ठे श्रीवत्सशुभलाञ्छनः।
स्यमन्तकहारिर्ज्ञेयो पुष्टिश्रीकीर्तिदो नृणाम्॥193॥

रक्तबिन्दुद्वययुतो श्यामो दन्तिभुजः समः।
रेखादक्षिणतो वामे पुष्टिवद् दृढबिन्दुलः॥194॥

चाणूरमर्दनाख्यः स्यात्सर्वशत्रुनिकृन्तनः।
पूर्वभागैकवदनः पार्श्वैकवदनं भवेत्॥195॥

कंसमर्दी भवेत्कृष्णो नीलाम्बरनिभः शुभः।
समचक्रा द्वारदेशे कृष्णवर्णा सुशोभना॥196॥

सा कृष्णमूर्तिर्विज्ञेया पूजिता सौख्यदायिनी।
रेखापञ्चायुधधरं वनमालाविभूषितम्॥197॥

अब्जचिह्नं सूक्ष्मचक्रं कृष्णमेनं प्रचक्षते।
एतल्लक्षणसंयुक्तं दीर्घाकारं बहूदरम्॥198॥

श्रीगोपालमिति प्राहुः सुरेखावंशतालकम्।
श्यामवर्णं महास्निग्धं छत्राकारं तथैव च॥199॥



सूक्ष्मद्वारेण बिन्दूनां रक्तरेखासमन्वितम्।
शीर्षपुष्कलकं चैव महास्निग्धं च कोमलम्॥200॥

गोपालमूर्तिर्विज्ञेया दुर्लभा भुवनत्रये।

कुक्कुटाण्डसमोपेतं श्रीकर्या वनमालया।
लाङ्गले वेणुचिह्नं च कुण्डलैः परिवेष्टितम्।।201।।

लक्ष्मीगोपालकं ज्ञेयं दुर्लभं भुवनत्रये।
पुत्रलाभं तथा मोक्षं भुक्तिं मुक्तिं च यच्छति।।202।।

कृष्णोऽतिकृष्णो न स्थूलः चक्रे फेनाभिशोभितः।
वनमालावृतः पृष्ठे श्रीवत्सशुभलाञ्छनः।।203।।

दण्डशृङ्गयुतः पार्श्वे वेणुना शोभितो मुखे।
स गोपाल इति प्रोक्तो गोभूधान्यधनप्रदः।।204।।

यो गोपालः पार्श्वभागे तरुयुक्तश्च काष्ण्यर्वान्।
स स्यान्मदनगोपालो मालाकुण्डलशोभितः।।205।।

पुत्रपौत्रधनैश्वर्यसर्वलोकैकवश्यदः।
अर्धश्यामोऽर्धरक्तश्च शङ्खचक्रधनुर्धरः।।206।।

दीर्घः सुचक्रवान्वामे गोपालो मदनाह्वयः।
दीर्घाकारः कृष्णवर्णः सोऽर्धचन्द्रनिभाननः।।207।।

स स्यात्सन्तानगोपालो पुत्रपौत्राभिवृद्धिदः।
वर्तलो मस्तके निम्नः पार्श्वे रजतबिन्दुलः।।208।।

गोवर्धनाख्यो गोपालो दीर्घरेखा तु दक्षिणे।
सर्वकष्टविनाशाय भूधान्यधनवर्धनः।।209।।

इति कृष्णमूर्त्तिलक्षणम्।।

अथ बुद्धकल्किद्वयमूर्तिलक्षणम्।।

अन्तर्गह्वरसंयुक्तं चक्रहीनं तु यद्भवेत्।
निर्वाणबुद्धसंज्ञं स्यात् ददाति परमं पदम्।।210।।

रन्ध्रदृश्यद्वयोपेतं अन्तश्चक्रद्वयान्वितम्।
शिरोदृष्टार्धचक्रं च पार्श्वयोर्वापि दृश्यते।।211।।



नानावर्णमयं वापि बुद्धमूर्तिं प्रचक्षते।
सहस्त्रबिन्दुसंयुक्तं समचक्रसमन्वितम्।।213।।

श्वेतवर्णमतिश्लक्ष्णं सर्वज्ञं श्रीकरं विदुः।
अतिरक्तं सूक्ष्मबिलं पृष्ठचक्रं स्थिरासनम्।।213।।

कृपाणाकृतिरेखा स्याद् द्वारस्योपरि पृष्ठके।
म्लेच्छनाशी भवेत्कल्की कलिकल्मषनाशनः।।214।।

इन्द्रनीलनिभो दीर्घो वनमालाविभूषितः।
अङ्कुशाकारवदनो धर्मदः कलिनिग्रहः।।215।।

दीर्घास्यः कपिलाकारो दीर्घचक्रो महोदरः।
हयरेखासमायुक्तो रेखाकुन्तायुधाकृतिः।।216।।

श्वेतवर्णो दीर्घमुखः कल्कीति प्रोच्यते बुधैः।
इति बुद्धकल्किद्वयमूर्त्तिलक्षणम्।।



Kalki

अथ चतुर्विंशमूर्त्तिलक्षणम्।।

अथ केशवमूर्तिलक्षणम्।।

सौभाग्यं केशवो दद्याच्चतुष्कोणो भवेत्तु सः।
श्वेतवृतं समं पूर्वं अतिह्रस्वं च वर्त्तुलम्।।217।।

मस्तकोन्नतिविख्यातं केशवं परिचक्षते।
राजतैर्बिन्दुभिर्हैमैन्वितं सूक्ष्मचक्रकम्।।218।।

वनमालान्वितं श्यामं केशवाख्यं विदुर्बुधाः।।219।।

इति केशवमूर्तिलक्षणम्।।

अथ नारायणमूर्तिलक्षणम्।।

नारायणोऽपि भगवान् लक्ष्यतेऽत्र चतुर्विधः।
श्यामो नारायणो देवो नाभिचक्रस्तथोन्नतः।।220।।



Nārāyaṇa

दीर्घरेखात्रयोपेतो दक्षिणे सुषिरं पृथु।
नीलांम्बुदसमाकारं चतुर्लाञ्छनशोभितम्।।221।।

रेखात्रयसमायुक्तं नारायणमिति स्मृतम्।
तमालदलसंकाशः स्वर्णपङ्कविलेपवान्।।222।।

वीरनारायणो देवः श्वेतचक्रः सुशोभनः।
मुसलायुधमालासिशङ्खचक्रगदान्वितः॥223॥

रूपनारायणो देवो मुखे चापमुखं धनुः।
सर्वसिद्धिकरो देवः सर्वकामफलप्रदः॥224॥

ताटङ्कनासाभरणहारकेयूरलाञ्छनः।
मायानारायणो देवः सर्वसिद्धिप्रदायकः॥225॥

ध्वजवज्राङ्कितं पीतं एकचक्रं सुवर्तुलम्।
लक्ष्मीनारायणं देवं अभीष्टफलद विदुः॥226॥

नवदूर्वादलश्यामं वनमालाविभूषितम्।
श्रीवत्सशङ्खचक्राद्यं पञ्चायुधलसत्तनुम्॥227॥

समसूक्ष्मलसच्चक्रं पङ्कजद्वयशोभितम्।
सदा सुशीतलतनुम् अनन्तमधिकोज्ज्वलम्॥228॥

द्वारदेशे लसद्रेखा पक्षिराजसरेखकम्।
लक्ष्मीनारायणं देवं दुर्लभं शीघ्रसिद्धिदम्॥229॥

एतल्लक्षणसंयुक्तं शेषभोगसमन्वितम्।
नारायणमिमं प्राहुः नारदेऽष्टफलप्रदम्॥230॥

वनमालाद्वयोपेतं गोखुरेण च मिश्रितम्।
छत्राकारं दृढं स्निग्धं मध्यचक्रं दृढासनम्॥239॥

लक्ष्मीनारायणख्यं हि मूर्तीनामुत्तमोत्तमम्।
ध्वजचक्राङ्कितं पीतं वामचक्रं तु वर्तुलम्॥238॥

लक्ष्मीनारायणं देवम् अभीष्टफलदं विदुः।
सुवर्णबिन्दुसहितं ह्रस्वास्यं स्थिरमस्तकम्॥239॥

जम्बूफलसमाकारं बिन्दुनोपरि पूरितम्।
अतिवृत्तं सूक्ष्मयुक्तं चतुर्लाछनशोभितम्॥240॥

चतुश्चक्राम्बुजाकारं मस्तके पद्मलक्षणम्।
वृत्तं वर्तुलसङ्काशं लक्ष्मीनारायणं स्मृतम्॥241॥



Lakshmī-Nārāyaṇa

मुसलासिधनुर्मालाशङ्खचक्रगदाङ्कितम्।
लक्ष्मीनारायणं देवं मुखे नाभौ च नारद॥242॥

लक्ष्मीनारायणो देवश्चतुर्भिश्चक्रकैर्युतः।
यत्र तिष्ठति तत्क्षेत्रं अष्टैश्वर्यफलप्रदम्॥243॥

अधश्चोऽर्ध्वपार्श्वयोश्च चक्रैरप्युपशोभितम्।
चतुर्भिर्मध्यसुषिरं लक्ष्मीनारायणं स्मृतम्॥244॥

लक्ष्मीनारायणं स्निग्धं अञ्जनाचलसंनिभम्।
नातिह्रस्वं न च स्थूलं वर्तुलं मध्यचक्रकम्॥245॥

सुवर्णबिन्दुसंयुक्तं चतुश्चक्रैरलंकृतम्।
वनमालापरिवृतं वदनेतरपार्श्वतः॥246॥

तन्मूर्त्तिदर्शनात्पुंसाम् अष्टैश्वर्यफलं भवेत्।
निम्नाकारं शिरश्चक्रसंवृतं शीतलाकृति॥247॥

द्वारद्वये चतुश्चक्रं वामे वा दक्षिणेऽपि वा।
श्रीवत्सशङ्खचक्राद्यायं पार्श्वे चणकपुष्पवत्॥248॥

लक्ष्मीनारायणं देवं भुक्तिमुक्तिफलप्रदम्।
गदाकृतिकरा रेखा लक्ष्यते मध्यदेशतः॥249॥

ध्वजवज्राङ्कुशोपेतं वामे चक्रचतुष्टयम्।
दक्षिणे चक्रयुगलं वनमालाविभूषितम्॥250॥

लक्ष्मीनारायणो देवो ह्यभीष्टफलदोऽर्चितः।
द्वे द्वे चक्रे च पार्श्वे च श्रीमन्नारायणः स्मृतः॥251॥

द्वे द्वे चक्रेऽप्यधश्चोऽर्ध्वे लक्ष्मीनारायणः स्मृतः।
ध्वजवज्राङ्कुशोपेत एकचक्रं सुवर्तुलम्॥252॥

लक्ष्मीनारायणं ज्ञेयं भुक्तिमुक्तिफलप्रदम्।
ध्वजवज्राङ्कुशोपेतं वामचक्रे च वर्तुलम्॥

लक्ष्मीनारायणं देवं भुक्तिमुक्तिफलप्रदम्।
इति नारायणमूर्तिलक्षणम्॥

अथ माधवमूर्तिलक्षणम्॥

मधुवर्णो मध्यचक्रः स्निग्धसूक्ष्मतनुस्तथा॥254॥

माधवः स तु विज्ञेयो यतीनां मोक्षदायकः।
अतिस्थूलं चतुश्चक्रं अतसीकुसुमप्रभम्॥255॥

सुषिरं छिद्रबहुलं माधवं परिकीर्तितम्॥256॥

इति माधवमूर्तिलक्षणम्॥

अथ गोविन्दमूर्तिलक्षणम्॥

नातिस्थूलः कृष्णवर्णः गोविन्दः पंचवक्त्रकः।
दशरन्ध्रसमायुक्तः विंशश्चक्रसमन्वितः॥257॥

नवदूर्वादलश्यामो वनमालाविभूषितः।
गोविन्दमूर्तिर्विख्यातो सर्वकामफलप्रदः॥258॥

इति गोविन्दमूर्तिलक्षणम्॥



Govinda

अथ विष्णुमूर्तिलक्षणम्।।

कृष्णवर्णस्तथा विष्णुः स्थूलचक्रः सुशोभनः।
गदाकारा तथा रेखा दृश्यते मध्यदेशतः।।259।।

स्थूलवक्त्रो भवेद्विष्णुर्मोक्षदः फलदो विभुः।
वामचक्रो बृहद्द्वार उन्नतो मध्यनिम्नगः।।260।।

स कापिलः स्निग्धवर्णो विष्णुर्विषयभोगदः।
विष्णुक्रान्तनिभाकारो वनमालाब्जचिह्नकः।।261।।

पञ्चायुधधरः श्रीमान्विष्णुरित्युच्यते बुधैः।।

इति विष्णुमूर्तिलक्षणम्।।



Krshna

अथ मधुसूदनमूर्तिलक्षणम्॥

मधुसूदनो महादेवः एकचक्रो महाद्युतिः।
सर्ववर्णसमायुक्तः महातेजःप्रदः शुभः॥270॥

इति मधुसूदनमूर्तिलक्षणम्॥

अथ त्रिविक्रममूर्तिलक्षणम्॥

त्रिविक्रमस्त्रिकोणाढ्यश्चक्रत्रयविभूषितः।
प्रयत्नेन प्रजेन्द्राणां सदा पूज्यस्तु नेतरैः॥271॥

त्रिविक्रमस्तथा देवः श्यामवर्णो महाद्युतिः।
वामभागगते चक्रे रेखा चैव तु दक्षिणे॥272॥

दीप्त्याकारं सूक्ष्मचक्रम् उन्नतं वामपार्श्वके।
त्रिविक्रममिति ख्यातम् ऐश्वर्यफलदं नृणाम्॥273॥

दीर्घाकारो महातेजाः शङ्खचक्रगदाङ्कितः।
वनमालाधरः श्रीमान् त्रिविक्रम उदाहृतः॥274॥

इति त्रिविक्रमूर्तिलक्षणम्॥

अथ श्रीधरमूर्तिलक्षणम्॥

श्रीधरस्त्रिविधो ज्ञेयः पूजकस्य शुभप्रदः।
श्रीधरश्च तथा देवः सहितो वनमालया॥275॥

कदम्बकुसुमाकारो सर्वसिद्धिफलप्रदः।
सुवर्णबिन्दुसहितं हृस्वचक्रं च वर्तुलम्॥276॥

निम्नचक्रम् अतिहृस्वं श्रीधरं सर्वसिद्धिदम्।
निम्नोदरमतिहृस्वम् उत्तमं श्रीधरं स्मृतम्॥277॥

सर्वसौभाग्यदं चापि सर्वैश्वर्यप्रदायकम्।
निम्नमूर्धा हि फलदः निम्नपार्श्वः सुपुष्टिदः॥278॥

निम्नपृष्ठस्त्वफलदः निम्नचक्रः प्रमोददः।
चक्रे तु मध्यदेशे तु पङ्कजेन समन्वितः॥279॥



Śrīdhara

सूक्ष्माननः श्यामलाङ्गः स पुनः श्रीधरः स्मृतः।
घनशाद्वलसंकाशं वनमालाविभूषितम्॥280॥

किंचिद्विषमचक्राढ्यं श्रीकरं श्रीधरं विदुः।

इति श्रीधरमूर्तिलक्षणम्॥

अथ हृषीकेशमूर्तिलक्षणम्॥

अर्धचन्द्राकृतिर्देवो हृषीकेश उदाहृतः॥259॥

Note : Verses form this point are not numbered in the Manuscript.

स्थूलचक्रोर्ध्वचक्रस्तु अनन्तफलदो नृणाम्।
श्चिद्विषमचक्राढ्यं इन्द्रनीलनिभप्रभम्॥

हृषीकेशमिति प्राहुः शुद्धज्ञानप्रदायकम्।

इति हृषीकेशमूर्तिलक्षणम्॥

अथ पद्मनाभमूर्तिलक्षणम्॥

चक्रस्योऽभयपार्श्वे तु पङ्क्कजद्वयशोभितम्।
पद्मनाभमिति ख्यातं विदुर्नागशयं बुधाः॥

नाभिचक्रलसत्पद्मं जम्बूफलसमप्रभम्।
पद्मनाभ इति ख्यातं विदुर्नागशयं बुधाः॥

निष्केसरोर्ध्वचक्रस्तु अधश्चक्रः सकेसरः।
पद्मनाभ इति ख्यातो विपरीतो हलायुधः॥

इति पद्मनाभमूर्तिलक्षणम्॥

Padmanābha

अथ दामोदरमूर्तिलक्षणम्॥

दामोदरस्तथा स्थूलो मध्ये चक्रं प्रतिष्ठितम्।
दूर्वाभं द्वारि संकीर्णपीतरेखासमन्वितम्॥

स्थूलं दामोदरं ज्ञेयं सूक्ष्मरन्ध्रं सुनिर्मलम्।
सकापिलं सकाष्र्ण्यं च नृणामर्थफलप्रदम्॥

रेखया विलसन्मध्ये कालमेघनिभप्रभम्।
वनमालालसत्किञ्चित्प्राहुर्दामोदरं मुने॥

किंचिद्विषमचक्राढ्यं इन्द्रनीलनिभप्रभम्।
वनमालालसच्चक्रं प्राहुर्दामोदरं मुने॥

दामोदरस्तथा स्थूलः मध्ये चक्रं प्रतिष्ठितम्।
वर्तुलः स्निग्धकश्चैव घनाकारस्तु दक्षिणे॥

स्थूलदामोदरो ज्ञेयः सूक्ष्मरन्ध्रो भवेत्तु सः।
चक्रद्वयसमायुक्तः पूजितः सुखदः सदा॥

मध्ये दाम सुदीर्घं च सुखसौभाग्यदायकः।

इति दामोदरमूर्तिलक्षणम्॥

अथ संकर्षणमूर्तिलक्षणम्॥

द्वे चक्रे एकभागे तु पूर्वभागं तु पुष्करम्।
संकर्षणः स विज्ञेयः रक्ताभः सर्वसिद्धदः॥

इति संकर्षणमूर्तिलक्षणम्॥

अथ वासुदेवमूर्तिलक्षणम्॥

वासुदेवो विप्रजनैरुपास्यः पूजने सदा।
द्वारदेशे समे चक्रे दृश्येते नान्तरीयके॥

वासुदेवः स विज्ञेयः शुक्लाभश्चातिशोभनः।
रेखापञ्चायुधधरः हिमांशुसदृशप्रभः॥



Vāsudeva

नाभिचक्रयुतः शान्तो वासुदेव इतीरितः।

इति वासुदेवमूर्तिलक्षणम्॥

॥ अथ प्रद्युम्नमूर्तिलक्षणम्॥

प्रद्युम्नः सुक्ष्मचक्रस्तु पीतवर्णस्तथैव च।
मकराभो भवेद्रेखा पाश्वर्तः पृष्ठतोऽपि वा॥

प्रद्युम्नः सूक्ष्मचक्रस्तु पीतदीपः सुशोभनः।
सुषिरः छिद्रबहुलं दीपकारं तु यद्भवेत्॥

प्रद्युम्नः सूक्ष्मचक्रः स्यान्नीलाम्बुजचयस्तथा।
स ददाति श्रियं नृणामभक्त्यापि प्रपूजितः॥

जपाकुसुमसङ्काशं वनमालाविभूषितम्।
धनुर्बाणाम्बुजधरं प्रद्युम्नं चेष्टदं विदुः॥

इति प्रद्युम्नमूर्तिलक्षणम्॥

Pradumna

अथ अनिरुद्धमूर्तिलक्षणम्॥

अनिरुद्धो त्रिधा ज्ञेयः तत्तल्लक्षणभेदतः।
अनिरुद्धः सूक्ष्मचक्रः नीलोत्पलनिभं तु वा॥

एतल्लक्षणसंयुक्तं सूक्ष्मचक्रलसन्मुखम्।
सुवर्णरूप्यरेखाढ्यम् अनिरुद्धं विदुर्बुधाः॥

अनिरुद्धस्तु नीलाभः वर्तुलश्चातिशोभनः।
रेखात्रयं तु तद्द्वारे पृष्ठे पद्मेन लाञ्छितम्॥

कृष्णवर्णं समद्वारं चक्रभित्तिसमीपगम्।
सूक्ष्मचक्रं भवेदूर्ध्वं पार्श्वे चणकपुष्पवत्।
अनिरुद्धमिति प्रोक्तं सर्वलोकैककारणम्।

इति अनिरुद्धमूर्तिलक्षणम्॥

अथ पुरुषोत्तममूर्तिलक्षणम्॥

मध्यचक्रस्सुवर्णश्च मस्तकः पृथुचक्रकः।
पुरुषोत्तमाभिधो देवः पूजकस्य शुभप्रदः॥

अनन्तो मूर्ध्नि चक्राढ्यः अनन्तः पुरुषोत्तमः।
यस्या मूर्त्तेरुत्तमाङ्गं चारु चक्रसमन्वितम्॥

तत्तन्मूर्त्तिः खगेशान तन्नाम्ना पुरुषोत्तमः।

इति पुरुषोत्तममूर्तिलक्षणम्॥



Purushottama

अथ अधोक्षजमूर्तिलक्षणम्॥

अतिकृष्णो रक्तरेखः वृत्तदेहस्तु चक्रवान्।
किञ्चित्कपिलसंयुक्तः सूक्ष्मो वा स्थूल एव वा॥

अधोक्षज इति ख्यातो पूजकस्य शुभप्रदः।

इति अधोक्षजमूर्तिलक्षणम्॥

अथ अच्युतमूर्तिलक्षणम्॥

चतुर्भिरष्टचक्रैस्तु वामे दक्षिणपार्श्वगैः।
अधिष्ठितो मुखेऽप्येकं कुण्डलद्वयशोभितम्॥

शङ्खचक्रगदाशार्ङ्गबाणकौमोदकीधरः।
मुसलध्वजवत् श्वेतच्छत्रवज्राङ्कुशैर्युतः॥

सोऽच्युतः कथितो नाम्ना दुर्लभस्तपसा विना।
नीलस्थूलसमाकारवनमालाबिभूषितः।
सूक्ष्मचक्रधरः श्लक्ष्णोऽच्युतः समुदाहृतः॥

इति अच्युतमूर्तिलक्षणम्॥

अथ जनार्दनमूर्तिलक्षणम्॥

शङ्खचक्राम्बुजमालः नीलः स्थूलाकृतिः शुभः।
जनार्दन इति ख्यातः हिमांशुपरिशीतलः॥

नीलोत्पलदलप्रख्यं नातिह्रस्वं भयापहम्।
जनार्दनं गृहस्थानां अभीष्टार्थफलप्रदम्॥



Janārdana





पूर्वभागैकवदनः पश्चादेकास्यसंयुतः।
जनार्दनश्चतुश्चक्रः श्रीपद्रो रिपुनाशनः।।

अन्तर्लक्षं चतुश्चक्रं शीतलं चोत्पलप्रभम्।
जनार्दनं विजानन्ति वनमालाविवेष्टितम्।।

द्वारचक्रसमायुक्तं चक्रद्वादशकोज्ज्वलम्।
वनमालायुतश्लक्षणम् आहुस्तं च जनार्दनम्॥

इति जनार्दनमूर्तिलक्षणम्॥

अथ उपेन्द्रमूर्तिलक्षणम्॥

उपेन्द्रो मणिवर्णाभो ह्रस्वचक्रोऽतिशोभनः।
शङ्खचक्रगदाचिह्नो नीलवर्णलसत्तनुः॥

उपेन्द्र इति विख्यातो हरिः श्लाघ्यशुभप्रदः।
श्यामलं कोमलाभं तु दक्षपार्श्वे तु चक्रयुक्।
अल्पद्वारसमोपेतं हरिमूर्त्तिरुदाहृतम्॥

इति उपेन्द्रमूर्तिलक्षणम्॥

अथ हयग्रीवमूर्तिलक्षणम्॥

हयग्रीवोऽपि भगवान् रक्तपीतादिमिश्रितः।
अङ्कुशाकृतिकस्तार्क्ष्य चक्रद्वयसमन्वितः॥

पद्माकृतिस्तथा पार्श्वे कुण्डलाकृतिरेव वा।
ज्ञानदो मोक्षदो नृणां भोगदो विनतासुत॥

हयग्रीवोऽङ्कुशाकारो रेखा चक्रसमीपगा।
कृष्णवर्णसमाख्यातो महासारस्वतो मतः॥

हयग्रीवस्तु विज्ञेयः अङ्कुशप्रतिरूपकः।
चक्रद्वयसमायुक्तः पूजितः सुसुखप्रदः॥

दीर्घग्रीवमधोवक्त्रं अल्पचक्रमकल्मषम्।
हयग्रीवमिति ख्यातं संसारभयमोचनम्॥

अङ्कुशकारवदनं दीर्घबिन्दुसमुज्ज्वलम्।
पक्वजम्बूफलाकारं हायग्रीवं वदन्त्यमुम्॥

इति हयग्रीवमूर्तिलक्षणम्॥

अथ कपिलमूर्तिलक्षणम्॥

कपिलः कपिलोऽत्यन्तस्पष्टचक्रसमन्वितः।
पञ्चबिन्दुसमायुक्तः वरविद्याप्रदो नृणाम्॥

यज्ञमूर्तिस्तु भगवान् रक्तपीतो हि मिश्रितः।
द्वारस्य वामतश्चक्रं स्रुक्स्रुवौ दक्षिणेऽपि च।
यज्ञमूर्तिरिति ख्यातो सर्वक्रतुफलप्रदः॥

इति कपिलमूर्तिलक्षणम्॥

अथ दत्तात्रेयमूर्तिलक्षणम्

सितारुणोऽसिताभश्च ह्रस्वपृष्ठोन्नतो भवेत्।
अक्षमालाकृतिः पृष्ठे दत्तात्रेयः शुभप्रदः॥

इति दत्तात्रेयमूर्तिलक्षणम॥

अथ शिंशुमारमूर्तिलक्षणम्॥

शिंशुमारो दीर्घकायः बलशाल्यतिगह्वरः।
उन्नतः पुच्छभागे तु चक्रेणैकेन संयुतः॥



Śimśumāra

सर्वाधारः सर्वज्ञेयः सर्वसिद्धप्रदो नृणाम्।
ज्ञेयो द्वादश रन्ध्रस्तु मुकुन्दः साध्य एव हि।
षण्मुखेन मुकुन्दाख्यः सतां मुक्तिप्रदायकः।।

इति शिंशुमारमूर्तिलक्षणम्।।

अथ हंसमूर्तिलक्षणम्।।

हंसस्तु धनुराकारो नीलश्वेतविमिश्रितः।
चक्रपद्मसमोपेतः केवलं मोक्षदायकः।।

इति हंसमूर्तिलक्षणम्।।

अथ परमहंसमूर्तिलक्षणम्।।

परमहंसः खगेशान शिखण्डिगलसंनिभः।
स्निग्धश्चयतपृष्ठश्च वर्तुलद्वारसंयुतः।।

बिलमध्ये तथा चक्रे दृश्येतेऽत्यन्तशोभने।
चक्रस्य दक्षिणे पार्श्वे द्युमणिर्भानुको भवेत्।।

वर्तुलाकृतिवद्वामे दृश्यते विनतासुत।
मूर्तिः स्यात्परमहंसाख्या चतुर्वर्गफलप्रदा।।

इति परमहंसमूर्तिलक्षणम्।।

अथ पुण्डरीकाक्षमूर्तिलक्षणम्।।

वैकुण्ठमणिवर्णाभो वामपार्श्वैकचक्रकः।
द्वारोपरितथा रेखा पद्माकारा सुशोभना।।

रेखाष्टकसमोपेता पदसदृशगह्वरम्।
वनमालायुतं श्यामं वैकुण्ठं कोमलं विदुः।।

पार्श्वे वा मूर्ध्नि वा पृष्ठे नयनद्वयसंयुतः।
पुण्डरीकाक्षमूर्तिः स्यात्सर्वलोकैकवश्यकः।।

इति पुण्डरीकाक्षमूर्त्ति लक्षणम्।।



Puṇḍarīkāksha

अथ लक्ष्मीपतिमूर्तिलक्षणम्।।

मूर्ध्नि वा पार्श्वतो वापि मयूरगलसंनिभः।
कृष्णवर्णः सूक्ष्मचक्रः पृथुलास्यः स्त्रगन्वितः।।

(पृथुनाभिसमन्वित इति पाठः।।)

लक्ष्मीपतिरिति ख्यातो लक्ष्मीसंपत्तिदायकः।
दूर्वाभः सूक्ष्मवदनः पीतरेखा सुसूक्ष्मका।।

विदिक्षु दिक्षु सर्वासु प्रदृश्यन्तं समंततः।
स देवदेवो विज्ञेयः पुराणपुरुषोत्तमः।।

इति लक्ष्मीपतिमूर्तिलक्षणम्।।

अथ वटपत्रशायिमूर्तिलक्षणम्।।

वटपत्रशायी भगवान्वर्तुलोऽप्यतिशोभनः।
क्षीरबुद्बुदवत्ताक्ष्र्य नीलश्वेतप्रभस्तथा।।

चक्रस्य वामतः शङ्खं दक्षिणे पद्ममेव च।
वदनैके मध्यदेशे चतुश्चक्रसबिंदुलः।।

इति वटपत्रशायिमूर्तिलक्षणम्।।

अथ विश्वम्भरमूर्तिलक्षणम्।

चक्राणां वाऽपि विंशत्या युक्तो विश्वम्भरः शुभः।
श्यामो द्वादशरन्ध्रस्तु चतुर्विंशतिचक्रकः।

विश्वम्भर इति ख्यातः सर्वसौभाग्यदायकः।
विश्वम्भरो हरिः साक्षात्पारावतपदोपमः।।

बहुचक्राङ्कितो वापि नैकमूर्तिसमन्वितः।
पञ्चरन्ध्रं स्थूलतरं परुषं बहुचक्रकम्।
विश्वरूपमनन्तं वा पुत्रपौत्रादिकप्रदम्।।

इति विश्वम्भरमूर्त्तिलक्षणम्।।



Viśvambhara

अथ गरुडध्वजमूर्तिलक्षणम्।।

स्वर्णशृङ्गकरं सौम्यं वर्तुलं स्निग्धकेसरम्।
चक्रमध्यगतः कृष्णः रेखाबिन्दुसमन्वितः।।

लक्ष्मीकरो वैनतेय गरूडध्वजसंज्ञिकः।

इति गरुडध्वजमूर्तिलक्षणम्।।

॥ अथ पीताम्बरमूर्तिलक्षणम्॥

स्निग्धगोरोचनाकारः सुवक्त्रे वर्तुलोऽपि वा।
पीताम्बरधरो देवः साम्राज्यफलदायकः।
द्वारदेशे समे चक्रे बहुवर्णसमन्वितः॥

पीताम्बरधरो देवः सौख्यैकफलदोऽ र्चितः।
पीतगोरोचनाकारो वर्तुलो वदनेऽपि वा॥

पीताम्बरधरो देवः साम्राज्यफलदायकः।

इति पीताम्बरमूर्तिलक्षणम्॥

अथ सत्यवीरश्रवमूर्तिलक्षणम्॥

सुवर्तुलो ह्रस्वचक्रः सर्वाङ्गे हेमबिन्दुलः।
सत्यवीरश्रवाः प्रोक्तः सर्वसौभाग्यवर्धनः॥

इति सत्यवीरश्रवमूर्तिलक्षणम्॥

अथ अमृताहरणमूर्तिलक्षणम्॥

अमृताहरणो देवः नीलोत्पलसमप्रभः।
वर्त्तुलो ह्रस्ववदनो मध्यचक्रोऽतिकोमलः॥

इति अमृताहरणमूर्तिलक्षणम्॥

अथ चक्रपाणिमूर्तिलक्षणम्॥

पूर्वभागत्रिवदनः पश्चादेकास्यसंयुतः।
चक्रपाणिरिति ख्यातः चक्रावर्तित्वदायकः॥

इति चक्रपाणिमूर्तिलक्षणम्॥

अथ मायानारायणमूर्त्तिलक्षणम्॥

निर्मले सुमुखे चक्रे बहुलास्यसमन्ततः।
बहरूपी समाख्यातः पूजकस्य शुभप्रदः॥

इति मायानारायणमूर्तिलक्षणम्॥

अथ पुण्डरीकमूर्तिलक्षणम्।।

एकचक्रयुतो वक्त्रे शुक्लवर्णसमन्वितः।
पुण्डरीकः समाख्यातः पूजितो मोक्षदायकः।।

इति पुण्डरीकमूर्तिलक्षणम्।।



Parijātahara

अथ पारिजातहरमूर्तिलक्षणम्।।

अधोपरि द्विचक्राढ्यं पारिजातहरं स्मृतम्।
ब्रह्मचर्यव्रतस्थेन पूजनीयं प्रयत्नतः।।

इति पारिजातमूर्तिलक्षणम्।।

अथ सुदर्शनमूर्तिलक्षणम्।।

शतरेखासमायुक्तं मध्ये चक्रं सुदर्शनम्।
सर्वाघौघप्रशमनं नृणां निःश्रेयसप्रदम्।।

पद्माकारं बृहच्चक्रं निम्ननाभिसुदर्शनमृ।
यतिभिः सेवनीयं तत् स्निग्धवर्णं च रक्तकम्।।

एकचक्रशिशरोदेशे कृष्णवर्णो मुखे तथा।
सुदर्शनः स विज्ञेयः सर्वपापप्रणाशनः।।

इति सुदर्शनमूर्तिलक्षणम्।।



Jagadyoni

अथ जगद्योनिमूर्तिलक्षणम्॥

द्वारचक्रो रक्तवर्णः जगद्योनिः प्रकीर्तितः।
प्रदक्षिणं वर्तुलश्च वनमालाविभूषितः॥

कृष्णवर्णयुतश्चापि धनधान्यसुखप्रदः।

इति जगद्योनिमूर्तिलक्षणम्॥

अथ अव्ययमूर्तिलक्षणम्॥

पूजनीयः प्रयत्नेन शिरःस्निग्धश्च वर्तुलः।
बहुवर्णो द्वारचक्रो सौख्यदः पूजितोऽव्ययः॥

इति अव्ययमूर्तिलक्षणम्॥

अथ अनन्तमूर्तिलक्षणम्॥

चतुर्दशादिप्रभृति विंशात्प्राक्चक्रलाञ्छितः।
नानावर्णो ह्यनन्तात्मा नागभोगेन चिह्नितः॥

अनेकमूर्तिसंयुक्तः सर्वकामफलप्रदः।
प्रदक्षिणावर्तनववनमालाविभूषितः॥

कृष्णवर्णयुतश्चापि धनधान्यफलप्रदः।
दीर्घाकारं महास्थूलं सप्तचक्रसमन्वितम्॥

अथवाऽष्टचक्रं तु दशचक्रं शुभावहम्।
त्रयोदशं महापुण्यं चतुर्दशं महाफलम्॥

पीतवर्णं महाकृष्णं श्यामलं बहुवर्णकम्।
शङ्खचक्रगदापद्मवनमालाविभूषितम्॥

अनन्तमूर्तिर्विज्ञेयो सर्वकामफलप्रदः।
अनन्तशायिनं स्थूलं चक्रं चन्द्रमिवाद्भुतम्॥

दारिद्र्यनाशनं पुंसां आयुरारोग्यमोक्षदम्।
शेषभोगसमायुक्तः शिला स्निग्धा च वर्तुला॥

नानावर्णो ह्यनन्तः स्यात् नागभोगेन वेष्टितः॥

इति अनन्तमूर्तिलक्षणम्॥

अत त्रिमूर्तिलक्षणम्॥

बहुवर्णो द्वारचक्रः सौख्यदः पूजितोऽव्ययः।
ऊर्ध्वाधस्तात्त्रिवदनः षट्चक्रः श्यामलो विभुः॥

त्रिमूर्तिरिति विख्यातः सर्वसौभाग्यदायकः।
चक्रत्रयसमानो वा त्रिमूर्तिः स्याच्छुभप्रदः॥

अष्टोत्तरे यदि भवेद्द्वे द्वे चक्रे सुशोभने।
एतद्धरिहरं विद्यान्नृणां दारिद्मदं क्रमात्॥

चतुश्चक्रहरिहरो द्विमुखोर्ध्वं तथाप्यधः।
विनश्यति गृहस्थानां धनं क्षेत्रं कुलं क्रमात्॥

शिवनाभयुतो मूर्ध्नि पृष्ठे वाऽपि भवेद्यदि।
यस्तद्धरिहरं प्रोक्तं सर्वसौभाग्यदायकम्॥

शिवनाभयुतः पार्श्वे वामे वा दक्षिणेऽपि वा।
स च शंकरपूर्वः स्यान्नारायण इतीरितः॥

एकवक्त्रो द्विवक्त्रो वा शिवलिङ्गयुतो भवेत्।
चन्द्रगंङ्गासमायुक्तः वणद्वयसमन्वितः।
स च शंकरपूर्वः स्यान्नारयण इतीरितः।।

द्विलिङ्गो वा त्रिलिङ्गो वा चतुःपञ्चादिलिङ्गवान्।
ततः शंकरनामा स्याद्देवदेवत्वदायकः।।

लिङ्गैः पंचभिरावृत्तो षड्भिर्वा सप्तभिश्च वा।
तत्तन्मूर्तिफलं प्रोक्तं मया वक्तुं न शक्यते।।

इति हरिहरमूर्तिशिवनाभमूर्तिलक्षणे उच्येते।।

अथ स्वयंभुमूर्तिलक्षणम्।।

मूर्ध्नि वर्तुलरेखाभिरावृतो नीलवर्णवान्।
दीर्घास्यः पृथुचक्रस्तु स्वयंभूरिति विश्रुतः।।

केवलं मोक्षफलदः अर्चकस्य न संशयः।
परमेष्ठी तु शुक्लाभः चक्रपद्मसमन्वितः।।

द्विधा कृतस्तथा पृष्ठे सुषिरं वाऽपि वर्तुलः।
पीतवर्णयुतो वापि भुक्तिमुक्तिफलप्रदः।।

चतस्त्रो यस्य दृश्यन्ते रेखाः पार्श्वसमीपतः।
द्विचक्रो मध्यदेशे तु सा शिला स्याच्चतुर्मुखी।।

इति स्वयंभूमूर्तिलक्षणम्।।

अथ पितामहमूर्तिलक्षणम्।।

पितामहश्चतुर्वक्त्रो ह्यष्टचक्रसमन्वितः।
अमुखः स्वर्णबिन्दुश्च स्वर्णगर्भः प्रकीर्तितः।।

इति पितामहमूर्तिलक्षणम्।।

अथ हिरण्यगर्भमूर्तिलक्षणम्।।

हिरण्यगर्भं परमं पवित्रं भुवि दुर्लभम्।
अन्तर्ध्वनिसमायुक्तं कृष्णवर्णं सुवृत्तकम्।।

वर्तुलो ह्रस्ववदनश्चक्रमध्येऽतिकोमलः।
श्रीवत्सं कमलाकारलाञ्छनं चक्रपार्श्वके॥

हिरण्यगर्भो विख्यातः पृथुनाभिसमन्वितः।
हिरण्येन विमिश्रस्तु कीर्तिदः कुलवर्धनः॥

इति हिरण्यगर्भमूर्तिलक्षणम्॥


श्रीवेंकटेशाय नमः॥ प्रणम्य गोपिकाना
थं श्रीकृष्णं जगतां प्रभुं॥ ग्रंथान्बहून्वि
लोक्य [illegible]
[illegible] नारदाय च॥ साल[illegible]
[illegible] फलं तथा॥ [illegible]
[illegible] तथा क्षेत्रं मूर्तीनां लक्षणं तथा॥
इत्यादि सर्वम[illegible] वक्ष्यामि [illegible]
[illegible]



अथ सीरपाणिमूर्ति लक्षणम्।।

सर्वत्र रक्तवर्णः स्यात्पीतनीलाभवर्जितः।
सुचक्रो द्वारचक्रो वा सीरपाणिः शुभप्रदः।।

इति सीरपाणिमूर्तिलक्षणम्।।

अथ प्रलम्बघ्नमूर्त्तिलक्षणम्।।

एकचक्रस्तु वदने रक्तवर्णसमन्वितः।
प्रलम्बघ्न इति ख्यातो पूजितो मुत्युदायकः।।

इति प्रलम्बघ्नमूर्तिलक्षणम्।।

अथ नरमूर्तिलक्षणम्

नरमूर्त्तितुँ भगवानतसीकुसुमप्रभः।
एकनाभिसमोपेतः अक्षसूत्रं तु पार्श्वके।।

इति नरमूर्तिलक्षणम्।।



Śivanābha

अथ शिवनाभमूर्तिलक्षणम्।।

कूर्माकृतिरधोभागग लिंगभागे खुरान्वितः।
शिवनाभ इति ख्यातो भुक्तिमुक्तिफलप्रदः।।

गजकुम्भसमा दृश्यते मध्यभागतः।
शिवनभिरिति ख्यातः दुर्लभः सर्वकामदः।।

इति शिवनाभमूर्त्तिलक्षणम्।।

अथ अघोरमूर्तिलक्षणम्॥

सर्वतो लोहिताकारो मूर्ध्नि रक्तजटाशशी।
अघोरा सा परित्याज्या गृहिभिस्तस्य पूजने॥।

इति अघोरमूर्तिलक्षणम्॥

अथ सद्योजातमूर्तिलक्षणम्॥

हेमवर्णसमायुक्ता हेमवर्णसमुज्जवला।
मस्तके गोखुराभा सा चन्द्रगङ्गासमन्विता।
सद्योजाताभिधा श्रेष्ठा पुत्रपौत्रधनप्रदा॥

इति सद्योजातमूर्तिलक्षणम्॥

अथ वामदेवमूर्तिलक्षणम्॥

किञ्चित्कपिलसंयुक्ता श्वेतवर्णजटायुता।
वामदेवाभिधा श्रेष्ठा ऋषिभिः पूजिता सदा॥

इति वामदेवमूर्तिलक्षणम्॥

अथ महेशानमूर्तिलक्षणम्॥

नीलजटाकुला पूवार्ध पार्श्वे रेखासमोपेता महेशानाभिधा भवेत्।

इति महेशान मूर्त्तिलक्षणम्॥

तत्पुरुषमूर्तिलक्षणम्॥

पूर्वे विद्युज्जटायुक्ता ऊर्ध्वे पिंगजटा शशी।
तत्पुरुषाभिधाना स्याद्दुर्लभा सर्वकामदा॥

इतिह तत्पुरुषमूर्तिलक्षणम्॥

अथ सूर्यमूर्तिलक्षणम्॥

बाह्ये वाऽभ्यन्तरे वाऽपि चक्रद्वादशसंयुता।
सूर्यमूर्तिः खगेशान सर्वव्याधिविनाशनी॥

इति सूर्यमूर्तिलक्षणम्॥

अथ हैहयमूर्तिलक्षणम्॥

गर्भागारे चतुश्चक्रं पद्मे द्वे दक्षिणे बहिः।
हैहयाधिपतिर्नाम सर्वसिद्धिप्रदायकः॥

इति हैहयमूर्तिलक्षणम्॥

अथ दत्तात्रेयमूर्तिलक्षणम्॥

कृष्णवर्णयुतः सोऽपि दत्तात्रेयाभिधो भवेत्।

इति दत्तात्रेयमूर्तिलक्षणम्॥

विष्वक्सेनमूर्तिलक्षणम्॥

एकचक्रयुतो वक्त्रे बहुवर्णसमन्वितः।
विष्वक्सेन इति ख्यातो गमनैकफलप्रदः॥

इति विश्वक्सेनमूर्तिलक्षणम्॥

अथ क्षीराब्धिशयनमूर्तिलक्षणम्॥

एकचक्रस्तु वदने पंचायुधलसत्तनुः।
रेखाया वर्तुलः पृष्ठे क्षीरकान्तिसमन्वितः॥

चक्रस्योभयपार्श्वे तु फणिपङ्कजशोभितः॥
सुवर्तुल्लश्च सुस्निग्धः क्षीराब्धिशयनः शुभः॥

इति क्षीरब्धिशयनमूर्तिलक्षणम्॥

अथ सालग्रामपूजाफलश्लोकाः॥

एवं लक्षणसंपन्नाः शिलाश्चक्राद्यलंकृताः।
पूजयेद्यः त्रिसन्ध्यं च स मुक्त इति निर्णयः॥



Sudarshana

इष्टा यस्यच या मूर्त्तिः स तां यत्नेन पूजयेत्।
पूजयित्वा फलं सम्यक् प्राप्नोतीम्ह परत्र च॥

सालग्रामाः समाः पूज्याः विषमा न कदाचन।
विषमे त्वेक एव स्यात्समे द्वे न कदाचन॥

द्वादशैव शिला यो वै सालग्रामसमुद्भवाः।

अर्चयेद्वैष्णवो नित्यं तस्य पुण्यमनन्तकम्।
किं पुनर्बहुशायस्तु पूजयेद्वैष्णवो नरः॥

सालग्रामोद्भवशिलानिर्मितं यत्र नीयते।
तस्य दर्शनमात्रेण सर्वान् कामानवाप्नुयात्॥

खण्डितं मुण्डितं चैव पार्श्वभिन्नं द्विधा स्थितम्।
सालग्रामसमुद्भूतं शिलामात्रं न दोषभाक्॥

न प्रतिष्ठा न संस्करो न प्रायश्चित्तमेव च।
नोपचारापचाराश्च विद्यन्ते वै खगाधिप॥

मूर्त्यन्तरं तु बिंबेषु न यष्टव्यं तु देववत्।
सालग्रामशिलायां तु यष्टव्याः सर्वमूर्त्तयः।

चक्राङ्कितशिलासार्धं द्वारकायां समुद्भवम्
यः पूजयेदनुदिनं स याति परमां गतिम्॥

सालग्रामशिला यत्र यत्र द्वारवतीशिला।
शङ्खं तु तुलसीपत्रं तत्र सान्निहितो हरिः॥

सालग्रामोद्भवो देवो देवो द्वारवतीभवः।
उभयोः संगमो यत्र ब्रह्महत्या व्यपोहति॥

सालग्रामशिलां प्राप्य गयायां स्नानमाचरेत्।
नश्यन्ति सर्वपापानि ब्रह्महत्यायुतानि च॥

विष्णुपादोदकं नित्यं शिरसा धारयेत्पिबेत्।
नियमेनापि यो मर्त्यः स याति परमं पदम्॥

अग्निष्टोमसहस्त्रस्य वाजपेयशतस्य च।
तत्पुण्यं लभते नित्यं विष्णोर्नैवेद्यभक्षणात्॥

तप्तं हुतं तथा दत्तं अर्चनं च ततः क्रिया।
सालग्रामसमीपे तु सर्व कोटिगुणं भवेत्॥

सालग्रामशिलाचक्रं यो दद्याद्दानमुत्तमम्।
भूदानं तेन दत्तं स्यात्सशैलवनकाननम्॥

सालग्रामशिलास्तोत्रं यः पठेद्दिनमुत्तमम्।
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते॥

इति सालग्रामलक्षणं समाप्तम्॥





APPENDIX II

SĀLAGRĀMA-LAKSHAṆA

अथ सालग्रामलक्षणमुच्यते॥

करुणालहरीपूर्णं कर्णान्तायतलोचनम्।
राममिन्दीवरश्यामं ध्यायेदष्टार्थसिद्धये॥

श्रीकृष्णं गोपिकानाथं प्रणम्य जगतां प्रभुम्।
ग्रन्थान् बहु समालोक्य सारं संग्रह्य यत्नतः॥

गरुत्मते विष्णुनोऽक्तं ब्रह्मणा नारदाय च।
सालग्रामशिलातन्त्रं ग्राह्यं ग्राह्यफलं तथा॥

तारं चक्रं तथा क्षेत्रं मूर्त्तीनांलक्षणं तथा।
भेदं च सर्वमेवात्र वक्ष्येऽहं साधुसम्मतम्॥

श्रीभगवानुवाच॥

गण्डक्याश्चोत्तरे तीरे गिरिशालो हरिप्रियः।
तत्क्षेत्रं हरिसान्निध्यात् क्षेत्राणामुत्तमोत्तमम्॥

योजनद्वादशायामं बल्यतीर्थसमाकुलम्।
(ब्रह्मविनिर्मितम॥)

तस्योत्तरे गिरेः पादे हरिप्रीतिकराः शिलाः।
चक्राङ्किताः समभवन् निहिता वज्रकीटकाः॥

मच्चक्रचिह्नकास्तत्र तरवोऽपि खगेश्वर।
तस्य क्षेत्रस्य माहात्म्यं मया वक्तुं न शक्यते॥

जन्तवोऽपि च तत्रस्था मत्पदं सम्प्रयान्ति हि।
चक्रनद्यां गिरिवरादानीय च शिलाः सदा॥

गण्डक्यामपनुद्यन्ते सालग्रामशिलाः सदा।
ताः शिलाः पुनीताश्च चातुर्वर्ण्यफलप्रदाः॥

मूर्तयो विविधाः प्रोक्ता जलजाः स्थलजास्तथा।
जलजाः कोमलाः स्निग्धाः स्थलजाः परुषाः स्मृताः॥

मूर्तयः पुष्टिदाः स्निग्धाः परुषा मोक्षदाः स्मृताः।
ग्रामस्त्वाशिलरूपत्वात् तदाप्रभृति तन्नगः।
सालग्रामाभिधस्तत्र प्रथितो भुवनत्रये॥

तार्क्ष्यः॥

याः शिला न गता नाथ रथचक्रेण लाञ्छिताः।
तत्कारणं मम विभो कथयस्व दयानिधे॥

श्रीभगवानुवाच॥

शृणु ताक्ष्र्य महाभाग वक्ष्ये तत्साधु पृच्छ्यते।
गण्डकीरूपात् पातालगङ्गयामुत्थिता यदा॥

The river Gaṇḍaki is described here as having originated from Pātāla-gangā as a rivulet :

तस्मात् सलिले सेचनात्तं नगोद्भवाः।
तत्र तान्ययसा सिक्ता पाषाणाश्चक्रलाञ्छिताः॥

विष्णुस्वरूपाः केचित्तु केचिद्रुद्रोपलास्तथा।
गण्डूषान्तर्गतास्त्र बिन्दवः कीटतां ययुः॥

ते कीटा वज्रकीटा दीर्घाः सूक्ष्माः सुपेशलाः॥

तन्नदीजातपाषाणाद् बाधजान् मद्गर्भजांस्तथा।
षष्ठिवर्गश्चक्ररूपात् कुर्वन्त्यन्तस्ततोऽश्ममताम्॥

एककीटा द्विचक्रं स्याद्द्विकीटा च चतुष्टयम्।
त्रिकीटा यत्र षट्चक्रं चतुष्कीटाऽष्टचक्रकम्॥

The above verses, which are very corrupt, suggest that the water particles inside the crevices assume the form of vajra-kiṭas, subtle and thin, and that there are sixty varieties of chakra-formation that these creatures make, before they become stones in character. Each Kiṭa is said to be responsible for two chakras. The chakra may be inside the stone or outside. The chakra made by hiraṇyagarbha-kiṭa, the creature with gold inside it, is regarded as the best.



Ammonite

The differences with regard to colour are enumerated now. The possible colours are white, blue-black, black, blue, yellow, copper hue, red, tawny, honey-colour, and multi-colour. The stones may also be stained, ash-coloured, faded or discoloured; they may also be highly coloured.

बाह्यतश्चान्ततो चापि चक्राणां स्थितिरीदृशी।

जलचक्रं महापुण्यं यौवनं तु शुभावहम्॥

वृद्धचक्रं चाल्पपुण्यं चक्रहीनं तु निष्फलम्।
हिरण्यगर्भकीटेन निर्मितं चक्रमुत्तमम्॥

पीठपद्मादिभेदेन चक्रं बहुविधं भवेत्।
श्वेता श्यामा तथा कृष्णा नीला वाप्यतसीनिभा॥

हेमपीतं हरिद्राभं गौराभं कांस्यपाण्डरा।
रक्ताः नीलाः च कपिला लोहिता मधुपिङ्गला॥

कर्बुरा बहुवर्णा च कलङ्का धूम्रकर्णिका।
अतिवर्णा विवर्णा च तथा स्यान्निजवर्णिका॥

Now the varieties of deity specific śālagrāmas are mentioned with regard to their respective colours.

1.	White	Vāsudeva-mūrti
2.	Turmeric	Nārāyṇa-mūrti
3.	Golden yellow	Hiraṇya-garbha
4.	Bright yellow	Śridhara
5.	Blue-Black	Nārāyaṇa
6.	Jet black	Vishṇu, Kṛshṇa
7.	Bluish	Damodara and Aniruddha
8.	Honey colour	Mādhava
9.	Red	Samkarshaṇa
10.	Tawny	Narasimha
11.	Multi colour	Ananta
12.	Burnished gold	Vāmana

The white-coloured stones bestow on the worshipper emancipation,blue-coloured ones wealth, blue-black celebrity, yellowish wealth and red sovereignty.



इत्येवं वर्णभेदेन ज्ञेयाश्चक्राङ्किताश्शिलाः।
क्षेत्रं तु वासुदेवस्य श्वेतवर्णं प्रचक्षते॥

श्रीमन्नारायणक्षेत्रं हरिद्राभं सगौरवम्।
हेमं हिरण्यगर्भं स्यात् श्रीधरं पीतमुच्यते॥

श्यामं नारायणं ज्ञेयं कृष्णं विष्णुं तथैव च।
दामोदरं तु नीलाभं अनिरुद्धं तथैव च॥

मध्वाभं माधवं ज्ञेयं रक्तं संकर्षणं तथा।
वर्णतः कपिलं सर्वं नारसिंहं प्रचक्षते॥

बहुवर्णमनन्तं स्याद्वामनं रुक्मसन्निभम्।
क्षेत्रं कथितमित्येव वर्णतो विनतासुत॥

श्वेतं मोक्षप्रदं चैव नीलं लक्ष्मीप्रदायकम्।
पुष्टिदं विविधं चैव श्यामं कीर्तिप्रदं सदा॥

गौरवर्णं धनकरं हेमवर्णं तथैव च।
पाण्डरं कीर्तिदं कपिलाद्रक्तं राज्यप्रदायकम्॥

The acceptable śālagrāma stones must be blue-black or black, yellow or red; they must be smooth, subtle, cold to touch, round in shape, or elevated on top. The Chakras which are on the left kide, or at the openings, are to be preferred. The openings (or mouth) on the right side betokens well, as also a deep crevice. The stones with many chakras are good.

क्षेत्राणां निर्णयं वक्ष्ये वर्णभेदेन नारद।
स्निग्धं सूक्ष्मं शीतालाङ्गं वृत्तमुन्नतमस्तकम्॥

श्यामं कृष्णं तथा पीतं बहुचक्रं च लोहितम्।
वामचक्रं द्वारचक्रं दक्षिणं चात्र गह्वरम्॥

एते ग्राह्या विशेषेण साधकस्य धनप्रदाः।

The smooth śālagrāma secures accomplishment of spiritual pursuits; the small one provides material affluence, the sālagrāma cool to touch bestows happiness, the round one promises fulfilment; the blue-black stone bestows success in all enterprises, the dark-coloured one secures celebrity; the white stone bestows salvation, the yellow-hued stone gives wealth while a multi-coloured stone causes pleasures and the red stone brings forth soverignty. The Chakra on the left side or in the middle will increase progeny, the chakra at the opening will provided celebrity, and a deep crevice in the stone will bring about emancipation. The mark of vana-mālā will secure the happiness of the spouse, and the mark of lotus will bring about affluence in cattle, corn and money. Material prosperity and spiritual welfare are obtained by worshipping śālagrāma stones which are stout but not worn out, broken, stained or extermely black. The stones must be stable when placed on a plate. The best stones are those that (resemble jambū rose apple fruit) or āmalakī (emblica myrobalan), and have two small discus marks.



स्निग्धं सिद्धिप्रदं नित्यं सूक्ष्मं द्रव्यफलप्रदम्॥

सन्तोषदं शीतलाङ्गं वृत्तं सिद्धिप्रदायकम्।
कर्मसिद्धप्रदं श्यामं कृष्णं कीर्तिकरं सदा॥

श्वेतं मोक्षप्रदं चैव पीतं धनकरं सदा।
सुखदं बहुवर्णं च रक्तं राज्यप्रदं तथा॥

वामचक्रं मध्यचक्रं पुत्रपौत्राभिवृद्धिदम्।
कीर्तिप्रदं द्वारचक्रं मोक्षदं स्यात्सगह्वरम्॥

वनमालया युतं चापि दारसौभाग्यदायकम्।
पद्मादियुक्तं सौभाग्यधेनुधान्यधनप्रदम्॥

स्थूलं नातिकृशं भिन्नं नातिकृष्णं न कल्मषम्।
स्थिरासनयुतं चापि राज्यभोगापवर्गदम्॥

चक्रैः सकेसरैर्युक्तं पञ्चभिः समलंकृतम्।
वनमालालाञ्छितं च यत्रास्ते श्रीसहायवान्॥

तस्मिन् गृहे न दारिद्र्यं न चोरादिभयं तथा।
अग्निपीडा दुर्ग्रहादिपीडनं न भविष्यति॥

जम्ब्वामलकतुल्या या सूक्ष्मचक्रद्वयान्विता।
तस्यामेव सदाकालं हरिरास्ते श्रिया सह॥

The size of the aperture must be in due proportion to the size of the stone. A small aperture in a large stone or a large aperture in a small stone is not meritorious.

यथा यथा शिलाधिक्यं बिलाधिक्यं तथा तथा।।

इति ग्राह्यवर्गः।।

The sālagrāmas that are not suitable for worship are :







Varjya-śilā

1. The fierce-looking
2. the ugly and ungainly in shape
3. having a chakra at the bottom
4. having chakra at the corner (or chakra which is triangular in shape)
5. having overlapping chakras
6. having no chakras at all
7. having a crooked chakra
8. having the chakra which is broken
9. having the chakra which is damaged by fire.
10. having an aperture at the bottom with no chakras inside it.
11. ash coloured, stained, very red or tawny-coloured like honey.
12. split stones or with damaged 'lips' (at the entrance)
13. the damaged ones

अथाग्राह्यानि वक्ष्यामि सालग्रामस्य लक्षणम्।
करालं विकरालं च तिर्यक्चक्रं विदिङ्मुखम्॥

कोणचक्रं बद्धचक्रमचक्रं वक्रचक्रकम्।
भिन्नचक्रं भुग्नचक्रमधोबिलमचक्रकम्॥



धूम्रं तथाऽतिरक्तं च कलङ्कं मधुपिङ्गलम्।
स्निग्धवर्णं स्फुटितं भग्नोष्ठं व्यथितं तथा॥

अनेकमूर्तयः सन्ति तत्र लक्षणलक्षिताः।
वैलक्षण्यं विशेषेण ज्ञातुं शक्यं न वै कलौ॥

वर्णरूपाद्यवयवैः प्रमाणबललाञ्छनैः।
द्वारदेशविभागैश्च भेदः केषाञ्चिदुच्यते॥

मत्स्याद्याः केशवाद्याश्च हयाद्याः कपिलस्तथा।
यज्ञभक्तः शिलाभेदो मुकुन्दो हंस एव च॥



Bahu-chhidra

लक्ष्मीपतिर्देवो वटपत्रशयस्तथा॥

विश्वम्भरो विश्वरूपो गरुडध्वज एव च।
पीताम्बरधरश्चैव सत्यो वीरश्रवास्तथा॥

अमृतांशुश्चक्रपाणिः मायानारायणस्तथा।
इत्येता हरिमूर्तयः त्रिमूर्तिर्हरिपूर्वश्च हरिशङ्करपूर्वकाः॥

नारायणः स्वयंभूश्च परमेष्ठी चतुर्मुखः।
पितामहः स्वर्णगर्भो गरुडध्वज एव च॥

बलरामः सीरपाणिः प्रलम्बघ्नो नरस्तथा।
शिवनाभिरघोरश्च सद्योजातस्तथैव च॥

वामदेवस्तथेशानः पुरुषः सूर्य एव च।
हैहयश्च तथा दत्तात्रेयश्चेत् चर एव च॥

क्षीराब्धिशयनश्चैव अनेका मूर्तयः स्मृताः।
मूर्त्यन्तरलक्षणं तासां दर्शयिष्ये पृथक् पृथक्॥

वक्त्रचक्रशिलाशुद्धिसंयुक्ताः उक्तलक्षणैः।
कैश्चिन्न्यूनापि सा मूर्तिरुत्तमा सिद्धिदायिनी॥



अथ मत्स्यमूर्तिलक्षणं वक्ष्ये॥

दीर्घाकारयुता स्निग्धा द्वारमध्ये द्विचक्रयुक्।
चक्रमेकं तथा पुच्छे दक्षिणे शफराकृतिः॥

वामे प्रदृश्यते वापि मत्स्यमूर्तिरुदाहृता।
मत्स्याकृतिमुखा यत्र दृश्यते चक्राश्रवत्॥

सबिन्दुमालांढ्या मत्स्यमूर्तिः शुभप्रदा।
मत्स्याकारं महास्निग्धं कांस्यवर्णयुतं तु वा।
शिलायां द्विचक्रः पुच्छश्चैकं मत्स्यमूर्त्तिः शुभप्रदा॥

आस्ये मध्ये द्विचक्रं च पृष्ठे वा सुषिरं भवेत्।
पृष्ठभागे चैकचक्रं मत्स्यमूर्तिः शुभप्रदा॥



अथ कूर्ममूर्तिलक्षणम्॥

कूर्मः समुन्नतः पृष्ठे श्वेताभश्चः खुरान्वितः।
आस्ये द्विचक्रयुक्तश्च कूर्माभोऽति शुभप्रदः॥

बिन्दुत्रययुता पृष्ठे शङ्खचक्रयुताऽपि वा।
दीर्घा दक्षिणवामे स्यात्तत्र चक्रद्वयान्विता॥

कुण्डलत्रययुक्ता च दुर्लभा सर्वकामदा।
वृत्तायता कूर्ममूर्तिः कनकच्छविसंयुता॥

आस्ये चक्रद्वयोपेता चक्रस्योऽभयपार्श्वतः।
स्नुहिपुष्पाकृतिर्वापि खगेशान शुभप्रदा॥

वर्तुलाक दीर्घद्वारा द्विचक्रयुक्।
नाभिचक्रयुता वापि कूर्माकारस्तु पार्श्वतः॥

स्थिरासनोऽन्नतः पृष्ठे नीलोहितवर्णका।
कूर्ममूर्तिरिति ख्याता पुत्रपौत्राभिवृद्धिदा॥

कूर्मस्तथोऽन्नतः पृष्ठे वर्तुलश्चक्रशोभितः।
हरितं वर्णमाधत्ते दद्यात्फलमनुत्तमम्॥

स्थूलं तु निबिडाकारं श्यामवर्णं सचक्रकम्।
कर्बुरं वाथ कपिलं श्यामं वा कूर्ममुच्यते॥

तुरङ्गमसमाकारा चक्राब्जवनमालिका।

श्यामला हेमबिन्दुश्रीः महाकूर्मः सुदुर्लभः।
वर्तुलं मकराकारं दीर्घद्वारं तु पार्श्वके॥

अण्डद्वयसमायुक्तं रेखाशङ्खादिसंयुतम्।
दीर्घदक्षिणवामा स्यादास्या चक्रं समीपतः॥

कूर्ममूर्तौ वराहं स्याद् दुर्लभं सर्वकामदः।
चक्रं नाभौ तु संलग्नं नीललोहितवर्णकम्॥

स्थिरासनं नमत्पृष्ठं कूर्मं पुत्राभिवृद्धिदम्।
सुवृत्तं सूक्ष्मवदनं द्वारं चक्रद्वयान्वितम्॥

नीलोत्पलदलश्यामं पृष्ठमध्ये समन्वितम्।
स्वर्णरेखायुतं वापि कूर्मं भुवि सुदुर्लभम्॥

अथ वराहमूर्तिलक्षणम्॥

अतसीकुसुमप्रख्यं नीलोत्पलनिभं तु वा।
दीर्घाकारं तु तद्दीर्घद्वारयुक्तं सदाब्जकम्॥

पृष्ठोऽन्नतं च दीर्घास्यं वामतश्चक्रमुन्नतम्।
स्वर्णरेखासमायुक्तं वराहाकृतिरेव वा॥

वराहमूर्तिरित्युक्तं राज्यलक्ष्मीप्रदं नृणाम्।
वनमालायुता लक्ष्मीवराहः परिकीर्तितः॥

पुत्रपौत्रप्रदा नित्यं भूधनज्ञानवर्धिनी।
अरचक्रान्वितं समुच्छ्रितम्॥

अङ्कुशाकारवदनभूवराहं शुभप्रदम्।
सुखासनं सुभूताभं सूक्ष्मरन्ध्रं सुचक्रकम्।।

सुदंष्ट्राभ्यां समेतं च वराहं धरणिप्रदम्।
दीर्घघोणसमायुक्तमेकदंष्ट्रं सुनिर्मलम्।।

वनमालायुतं लक्ष्मीवराहः परिकीर्तितः।
लक्ष्मीवराहो विज्ञेयो रक्तबिन्दुसमन्वितः।।

मध्यदंष्ट्रादिसंयुक्तः सर्वकामफलप्रदः।
दीर्घास्यं श्यामलाकारं पृथ्वीवलयवेष्टितम्।।

द्वारदेशे लसच्चक्रं वराहं पुष्टिदं नृणाम्।
दीर्घदक्षिणावामास्यं द्वारचक्रं समीपगम्।।

बिन्दुद्वयसमायुक्तं शङ्खरेखारिलाञ्छितम्।
श्यामवर्णसमायुक्तं वामे वलयवेष्टितम्।।

पञ्चकूर्मं भूर्वराहः सर्वभाग्यप्रदो नृणाम्।
इन्द्रनीलानिभा ज्ञेया स्थूलरेखात्रयान्विता।।

वराहमूर्तिर्विज्ञेया दुर्लभा सर्वकामदा।
अधोवक्त्रमतिस्निग्धं पृष्ठोन्नतमपीतकम्।
वराहं धान्यफलदं सर्वैराराधनीयकम्।।

सुमुखं सूक्ष्मवक्त्रं यदुन्नतं मस्तकोपरि।
त्रिबिन्दुना समायुक्तं वराहं तु धनप्रदम्।।

घोणरूपा वराहास्या चतुश्चक्र चक्रेण संयुता।
दद्यात्सा मोक्षसंसिद्धिं ब्रह्मचर्येण पूजिता।।

मत्स्यादिसर्वमूर्तीनां वराहः श्रेष्ठ उच्यते।।



अथ नारसिंहमूर्तिलक्षणम्

तत्र द्विविधौ लक्ष्मीनृसिंहाख्यौ तदुच्यते।
वामपार्श्वे स्थिरे चक्रे कृष्णवर्णः सबिन्दुकः॥

लक्ष्मीनृसिंहो विख्यातः सर्वभाग्यप्रदो नृणाम्।
नारसिंहं बृहद्वक्त्रं कपिलं कनकप्रदम्॥

लक्ष्मीनृसिंहं तन्नाम वामे चक्रद्वयान्वितम्।
स्थिरासनं नमत्पृष्ठं यजतामिष्टसिद्धिदम्॥

स्थूलचक्रद्वयं मध्ये गुञ्जालाक्षासवर्णकम्।
स्फुटितं विषमश्चक्रं नारसिंहं तु कापिलम्॥

सम्पूज्य सिद्धिमाप्नोति सभायां विजयी भवेत्।
अन्तश्चक्रं बृहद्द्वारं बहुवर्णं बहूदरम्॥

पातालनारसिंहाख्यं भिक्षूणामभयप्रदम्।
अस्पष्टचक्रमल्पास्यमल्पद्वारमिहोच्यते॥

तत्कुक्षिनरसिंहाख्यं वनवासिभिरर्चितम्।
बहुच्छिद्रं भिन्नवक्त्रं वदने कनकान्वितम्॥

सच्छिद्रं राक्षसं ज्ञेयं नृसिंहं पापनाशनम्।
ब्रह्मचर्यविहीनेने नारसिंहोऽर्चितो यदि।
व्याधिपीडा भवेत्तस्य वह्निना दह्यते गृहम्॥

विस्तृतास्यं मध्यचक्रं वर्तुलं कनकप्रदम्।
नारसिंहं गृहस्थानां भीतिदं यतिपुजितम्॥

द्विचक्रं द्विमुखं स्थूलं दूर्वाभं चोन्नतं शिरः।
दारिद्र्यफलदं पुंसां विद्युज्जिह्वं नृसिंहकम्॥

स्थूलं च विवृतास्यं च नीलं वा कपिलं पृथु।
महाज्वालानृसिंहं तु यतिभिः पूजनीयकम्॥

सप्तचक्रं बहुमुखं समन्तात् स्वर्णभूषितम्।
सर्वतोमुखमाख्यातं बहुवर्णन्तु मोक्षदम्॥

पुरः पार्श्वे च पृष्ठे च चक्रैरप्युपशोभितम्।
अधोमुखमिति ख्यातं यतीनां मोक्षदं सदा।।

सूक्ष्मरन्ध्रं द्विचक्राढ्यं वनमालाविभूषणम्।
तद्बालनारसिंहाख्यं नृणां संसारनाशकृत्।।

दीर्घाकारं दीर्घचक्रं चषकास्यं बृहत्तनु।
विभीषणमिति ख्यातं महादुःखफलप्रदम्।।

नारसिंहस्त्रिबिन्दुः स्यात् कपिलं पञ्चबिन्दुकम्।
योगानन्दनृसिंहस्तद् बहुबिन्दुसमन्वितः।
बहुवर्णयुतश्चापि भोगमोक्षप्रदो नृणाम्।।



अथ वामनमूर्तिलक्षणमृ।।

अतिह्रस्वो वर्तुलश्च वामनः परिकीर्तितः।
अतसीपुष्पसङ्काशो वनमालोपशोभितः।।

आस्यचक्रद्वयोपेतः सर्वभाग्यप्रदो नृणाम्।
या वामनाभिधा मूर्त्तिः श्वेतबिन्दुयुता मुखे।।

दधिवामनसंज्ञः स्याद्गोभूधान्यधनप्रदः।
अतश्चक्राग्रविलसद्दधिबिन्दुसमन्वितम्।
श्यामं वा कृष्णवर्णं वापि आस्ये चक्रं समीपगम्।।

महावामनमित्युक्तं दुर्लभं सर्वकामदम्।
कृष्णवर्णमतिस्निग्धं बिन्दुनोपरिभूषितम्।।

बिन्दुद्वययुतं वापि वनमालायुतं तु वा।
ह्रस्वं च वर्तुलाकारं वामनं भुवि दुर्लभम्।
कृष्णवर्णमतिस्निग्धं स्पष्टचक्रसमन्वितम्।।

ह्रस्वमुन्नतपृष्ठं च दीर्घास्यमतिगह्वरम्।
स्फुरद्द्विरेखावलयं नाभिचक्रसमन्वितम्।।

एतल्लक्षणसंयुक्तं वामनं भाग्यदायकम्।
अन्नवृद्धिं प्रजावृद्धिं भूवृद्धिं च ददाति वै।।

मध्यचक्रमतिह्रस्वमतिस्निग्धं च कार्ष्णिकम्।
स्पष्टास्यं वामनं तत्स्यादर्चतामिष्टसिद्धिदम्।।

वर्तुलं नीलमेघाभं वनमालासमन्वितम्।
सूक्ष्मरन्ध्रं बृहत्कुक्षि वामनं भुवि दुर्लभम्।।

अतसीपुष्पसङ्काशं बिन्दुनोपरिभूषितम्।
कुण्डलद्वयसंयुक्तं वक्त्रे वा बिन्दुसंयुतम्।।

ह्रस्वं च वर्तुलं चैव वामनं त्वर्थसिद्धिदम्।
इन्द्रनीलनिभाकारं वनमालाम्बुजोऽज्ज्वलम्।
स्पष्टचक्रद्वयोपेतं वामनं त्विष्टदायकम्।।



Paraśu-rāma

अथ परशुराममूर्तिलक्षणम्॥

जामदग्न्यस्तु भगवान् द्विविधं परिकीर्तितः।
सितकण्ठखुरोपेतं दीर्घाकारं बृहद्बिलम्॥

भित्तिभागे गते चक्रे वामे वा दक्षिणेऽपि वा।
पृष्ठे वा पार्श्वतो वापि रेखादंष्ट्राकृतिर्भवेत्॥

स रामो जामदग्न्यः स्यादर्चनीयो महात्मभिः।
केवलं लाञ्छितं पृष्ठे परश्वाकृतिरेखया।
भित्तिश्चक्रद्वयोपेतः पूजनीयः प्रयत्नतः॥

अथ राममूर्तिलक्षणम्॥

आदौ तु सीतारामस्तु द्विविधः परिकीर्तितः।
बाणतूणीरचापाढ्यः कुण्डलश्चक्रसमाहितः॥

सूक्ष्मकेसरचक्राढ्यो वीररामः श्रिया सह।
दीर्घाकारः श्यामवर्णश्चक्रद्वयमुखान्वितः॥

वामभागेः त्वकेचक्रस्सीतारामस्त्रिचक्रकः।
दीर्घाकारः कृष्णवर्ण आस्यद्वयसमायुतः॥

चतुश्चक्रैरुपेतो यस्सीतारामो धनप्रदः।
दिव्यबाणसुसंयुक्तश्चपतूणीरसंयुतः॥

करालवदनो रक्तो बिन्दुयुक्तश्चक्रशोभितः।
स स्याद्विजयरामाख्यः केसरोपेतचक्रकः॥

मूर्ध्नि मालाधनुर्बाणो पार्श्वे पुरयगस्तथा।
हृष्टराम इति ख्यातो भुक्तिमुक्तिफलप्रदः॥

धनुषा तु सुसंयुक्तो द्विचक्रः किञ्चिदायतः।
कोदण्डरामो विज्ञेयः शुद्धनीलाम्बुदप्रभः॥

कोदण्डी कुक्कुटाण्डाभः श्यामलः पृष्ठतोऽन्नतः।
सव्यापसव्यतूणीरौ पृष्ठे नाभ्यां विराजितौ॥

कल्पद्रुमसमायुक्तः पृष्ठे हेमसमन्वितः।
श्यामो दाशरथिर्ज्ञेयो दुर्लभो भुवनत्रये॥

रेखाकारधनुर्बाणं स्थूलदीर्घसबिन्दुकम्।
नाभिचक्रं बहुच्छिद्रं रामं दाशरथिं विदुः॥

एकचक्रा तु वदने कृष्णवर्णातिशोभना।
सा राममूर्तिर्विज्ञया पूजतामिष्टदायिनी॥

कोदण्डी कूक्कटाण्डाभः श्यामलः पृष्ठतोन्नतः।
रेखाद्वयसमायुक्तो द्वारदेशे खगेश्वर॥

धनुराकृतिका रेखा दृश्यते पार्श्वतोऽथवा।
पृष्ठतो वा भवेद्रामो भीष्मको राक्षसान्तकः॥

जम्बूफलसमाकारं कृष्णवर्णसबिन्दुकम्।
ललाटे हेमरेखा च बिन्दुना धनुषा युत्तम्॥

गोपालक्षेत्रमुत्पत्या तद्रामस्य च लक्षणम्।
अपुत्रो लभते पुत्रं धनकामो लभेद्धनम्॥

कृष्णवर्णो धनुः पार्श्वे वनमालोपशोभितः।
भासत्रयसमायुक्तः स्वर्णबिन्दुश्च मस्तके॥

जानकीवल्लभो रामो सर्वसिद्धिप्रदोऽर्चताम्॥



Gopāla-Rāma





अथ केवलसीतारामलक्षणम्॥

चापबाणाङ्कुशच्छत्रध्वजचामरसंयुतः।
वनमालायुतो वापि सीतारामः प्रकीर्तितः॥

दीर्घाकारसमायुक्तो ह्यधोवक्त्रः सकुण्डलः।
द्वारदेशो चक्रयुक्तः कल्पवृक्षादिसंयुतः॥

सीतारामः स विज्ञेयो भुक्तिमुक्तिफलप्रदः।
दीर्घाकारः कृष्णवर्णो ह्यधोवक्त्रः सकुण्डलः॥

चापतूणीरबाणाढ्यो बहिश्चक्रसमन्वितः।
सीताराम इति ख्यातो युक्तिभुक्तिफलप्रदः॥

वदने त्वेकवदनश्चतुश्चक्रसमन्वितः।
चापबाणाङ्कुशच्छत्रध्वजचामरसंयुतः॥

वनमालासमायुक्तः सीताराम इति स्मृतः॥

वलयाकारधनुर्बाणं शिरश्चक्रसमुन्नतम्।
कल्पद्रुमसमायुक्तं द्वे द्वे चक्रे तु पार्श्वयोः।
पट्टाभिराम इत्युक्तं दुर्लभं भुवनत्रये॥

पूर्वभागे त्रिवदनं पार्श्वे चक्रसमन्वितम्।
चपयपतूणीरबाणाढ्यं दुर्लभं भुवनत्रये॥

पूर्वभागे त्रिवदनं पार्श्वे चूक्रसमन्वितम्।
चापतूणीरबाणाढ्यं कल्पवृक्षण चिह्नितम्॥

पट्टाभिराम इत्युक्तं राज्यलक्ष्मीप्रदं नृणाम्।
मध्यास्ये रामचक्रं स्यात् सीताचक्रं तु वामगम्॥

भागे लक्ष्मणचक्रं तद्दक्षिणे पार्श्वचक्रयोः।
शत्रुघ्नभरतोपेतमासनोपरि चाग्रतः॥

जम्बूफलसमाकारं तूणीरद्वयमण्डितम्।
ध्वजचामरसंयुक्तं बाणबाणासनोज्ज्वलम्॥

सुवर्णबिन्दुखचितं कृष्णमुन्नतमस्तकम्।
पट्टाभिषिक्तं श्रीरामं परिवारसमन्वितम्॥

आयुरारोग्यफलदं पुत्रपौत्राभिवृद्धिदम्।
सर्वभाग्यप्रदं तस्माद् राममूर्त्ति तमर्चयेत्॥

तूणीराकृतिमत्स्याभं चापद्वयशरान्वितम्।
नानायुधध्वजोपेतं रेखाचामरसंयुतम्॥

श्रीरामपञ्जरं ज्ञेयं सर्वत्र विजयप्रदम्।
कृष्णवर्णं सुवर्णं च बहिर्युक्तसरन्ध्रकम्॥

चक्रहीनं च पूजार्हं पृथग्भित्तिं स वर्तुलम्।
कृष्णवर्णं चरं पीतास्यमचक्रकम्॥

रामतूणीरमित्युक्तं पूजानर्हं पृथग्जनैः॥

अथ सङ्कर्षणमूर्तिलक्षणम्॥

हलरेखामुसलवान् शुद्धस्फटिकवर्णवान्।
मधुबिन्दुधरः श्रीमान् नाम सङ्कर्षणः स्मृतः॥

अग्रभागे द्विचक्रं स्यात् पूर्वभागे तु पुष्करम्।
सङ्कर्षणः स विज्ञेयो रक्ताभः सर्वसिद्धिदः॥



स्थूलचक्रो भवेद्यत्र हरिलौहितवर्णभाक्।
सुलभं स्याद्भवेद्देवः पुत्रपौत्राभिवृद्धिदः॥

धनधान्यप्रदश्चैव गोत्रकीर्तिविवर्धनः।
दीर्घाकारं बृहद्द्वारं पृथुचक्रं च यद्भवेत्॥

श्वेताभं फलमिश्रं तु मुसलाकृतिरेव वा।
नीलोत्पलप्रसूनाभं पृष्ठे वा वदनेऽपि वा॥

बलशाली भवेद् रामो वंशकोशविवर्धनः॥

अथ कृष्णमूर्तिलक्षणम्॥

कृष्णोऽतिकृष्णो न स्थूलो न कृशो नातिशोभनः।
वनमालापरिवृतः पृष्ठे श्रीवत्सलाञ्छनः॥

स कृष्णमूर्तिर्विज्ञेयः पूजकाय शुभप्रदः।
कृष्णः तीर्थयुतेन भित्तिपार्श्वे द्विचक्रयुक्।
द्वारतुल्यं भवेन्नाभिर्गवाकारन्तु पृष्ठतः॥

दण्डशृङ्गयुते पार्श्वे वेणुना शोभितो मुखे।
गोपालकृष्ण इत्युक्तो गोभूधान्यधनप्रदः॥

अथ गोपालमूर्तिलक्षणम्॥

श्यामवर्णं महास्निग्धं चक्राकारं तथैव च।
सूक्ष्मद्वारं बिन्दुमल्परक्तरेखासमन्वितम्॥

गोपालमूर्तिर्विज्ञेयो सर्वभाग्यप्रदो नृणाम्।
यो गोपालः पार्श्वभागे रेखायुक्तश्च कार्ष्ण्यभाक्॥

स स्यान् मदनगोपालो मालाकुण्डलशोभितः।
पुत्रपौत्रधनैश्वर्याण्यतुलं संप्रयच्छति॥

अर्धश्यामोऽर्धरक्तश्च शंखचक्रधरः खग।
दीर्घाकारः सुपीतो यो पटलो मदनाह्वयः॥

दीर्घाकारः कृष्णवर्णश्चार्धचन्द्रनिभनानः।
स स्यात्सन्तानगोपालः पुत्रपौत्राभिवृद्धिदः॥

उन्नतो मूर्ध्नि कृष्णाभो निम्नोऽधस्तात् त्रिबिन्दुयुक्।
स बालकृष्णो विज्ञेयो दीर्घास्यः पुत्रभाग्यदः॥

वर्तुला मस्तके निम्नः पार्श्वे रजतबिन्दुयुक्।
गोवर्धनाख्यो गोपालो दीर्घरेखस्तु दक्षिणे॥

सर्वापद्विनिवृत्तिः स्याद् गोधान्यधनवर्धनः।
वर्तुला कृष्णवर्णश्च मध्यास्ये च द्विचक्रयुक्॥

दक्षिणादिवामपार्श्वे रेखा यत्र प्रदृश्यते।
ऊर्ध्वाधस्तच्चरणे रेखा बिन्दुद्वयसमन्वितः॥

कालियमर्दनः साक्षात्सर्वदारिद्र्यनाशनः।
सव्यापसव्यरेखाभ्यां भूषितः सूक्ष्मचक्रयुक्॥

पार्श्वे खुरयुतो देवो धनञ्जयविभुः शुभः।
अतसीवर्णवान् स्थूलचक्रभागोऽतिशोभनः॥

वनमालापरिवृतः पृष्ठे श्रीवत्सलाञ्छनः।
स्यमन्तहारी विज्ञेयः पुष्टिश्रीकीर्तिदो नृणाम्॥

रक्तबिन्दुयुतः श्यामो स्निग्धो दन्तिभुजोपमः।
रेखाऽस्य दक्षिणे वामे मुखेऽपि बिन्दुयुक्॥

स्निग्धश्चाणूरमर्दनाख्यः यात् सर्वशत्रुविनाशनः।
पूर्वे भागे त्रिवदनः चक्रद्वययुतस्तथा॥

पार्श्वे च सूक्ष्मवदनो वर्तुलः सूक्ष्मचक्रवान्।
कंसमर्दी भवेत् कृष्णो नीलाम्बुदनिभः शुभः॥

अधस्ताद्भगवान् वृत्तः पार्श्वे वस्त्रेण चिह्नितम्।
प्रच्छन्नसूक्ष्मचक्रस्तु वामे वा दक्षिणेऽपि वा॥

गोपीवस्त्रापहारी स्यात् कृष्णः सर्वार्थसिद्धिदः।
कुक्कुटाण्डसमाकारः श्रीकरो वनमालया॥

लाङ्गूलवेणचिह्नश्च कुण्डलाभ्याश्च वेष्टितः।
ज्ञेयः स लक्ष्मीगोपालो दुर्लभो भुवनत्रये॥

पुत्रलाभं तथा मोक्षं गोधान्यधनदं नृणाम्।
रेखापञ्चयुधं चापि वनमालाभिभूषितम्।
अब्जचिह्नः सूक्ष्मचक्रं कृष्णमेनं प्रचक्षते॥



अथ कृष्णराममूर्तिलक्षणम्॥

मूर्ध्नि मालाधनुर्बाणः पार्श्वे वेत्रयुतस्तथा।
कृष्णराम इति प्रोक्तो भुक्तिमुक्तिफलप्रदः॥

एतल्लक्षणसंयुक्तं दीर्घाकारं बहूदरम्।
श्रीगोपालमिति प्राहुः सरेखावंशनालकम्॥

अथ कल्किमूर्तिलक्षणम्॥

इन्द्रनीनिभो दीर्घो वनमालाविभूषितः।
अङ्कुशाकारवदनो भीष्मदः कल्किविग्रहः॥

अतिरिक्तं सूदेमबिलं स्पष्टचक्रं स्थिरासनम्।
कृपाणाकृतिरेखा स्याद्द्वारस्योपरि पृष्ठके॥

म्लेच्छनाशी भवेत्कल्की कलिकल्मषनाशनः॥

अथ केशवमूर्तिलक्षणम्॥

राजतैः बिन्दुभिर्हेमैरसितं सूक्ष्मचक्रकम्।
वनमालान्वितं श्यामं केश्वाख्यं द्विचक्रकम्॥

यो भाग्यं केशवो दद्यात् चतुष्कोणैस्सदा।
द्वाभागे द्विचक्रं च कृष्णवर्णः फलप्रदः॥

अथ नारायणमूर्तिलक्षणम्।।

श्यामो नारायणो देवो नाभिचक्रयुतस्तथा।
दीर्घरेखात्रयोपेतो दक्षिणे सुषिरं पृथु।।

उन्नतश्चाङ्कुशोपेतः एकचक्रः सुवर्तुलः।
सर्वाभीष्टप्रदो नृणां विशेषात्पुत्रभाग्यदः।।

यत्र शङ्खं गदा पद्मं रेखाकृति विराजते।
चतश्चक्रयुतो वापि त्रिचक्रश्चैकचक्रवान्।।

लक्ष्मीनारायणो नृणां सर्वभीष्टफलप्रदः।
लक्ष्मीनारायणस्ताक्ष्र्य चतुश्चक्र युतोऽपरः।।

त्रिचक्रश्च द्विचक्रश्च एकचक्रश्च शोभनः।
द्विचक्रलक्ष्मीनारायणं।
वर्तुलं दक्षिणे पार्श्वे चक्रद्वययुतं बृहत्।।

ध्वजरेखासमायुक्तं नीलं गोखुरसंयुतम्।
द्विचक्रलक्ष्मीसंयुक्तो नारयण इतीरितः।।

तद्दर्शनमात्रेण सर्वाभीष्टः प्रजायते।
एकवक्त्रे चतुर्वक्त्रो वर्तुलः श्यामवर्णकः।।

नातिस्थूलो नातिह्रस्वो लक्ष्मीनारायणः स्मृतः।
तस्य दशर्नमात्रेण चिन्तितं लभते ध्रुवम्।।

चतुश्चक्रं त्रिगम्भीरं दक्षिणे सुषिरं पृथु।
वनमालाद्वयोपेतं गोखुरेण च चिह्नितम्।।

लक्ष्मीनारायणाऽख्यातं द्विचक्रं विततााननम्।
जम्बूफलसमाकारं चित्रं कनकबिन्दुभिः।।

चतुश्चक्रयुतं देवं लक्ष्मीनारायणं विदुः।
अर्चतां सर्वदा पुंसां सर्वकामफलप्रदम्।
रेखात्रययुतं पार्श्वे पृष्ठे पद्मेन लाञ्छितम्।।

ध्वजवज्रगदोपेतं चतुश्चक्रसमन्वितम्।
लक्ष्मीनारायणं प्राहुः सर्वाभीष्टफलप्रदम्।।



Lakshmī Nārāyaṇa

नवदूर्वादलश्यामं वनमालाविभूषितम्।
श्रीवत्सशङ्खचक्रादिपञ्चायुधसमन्वितम्।।

लसद्वृत्तद्वयोपेतं पङ्कजद्वयशोभितं।

लक्ष्मीनारायणं प्राहुः दुर्लभं श्रीप्रसिद्धिदम्।।

एतल्लक्षणसंयुक्तो गजभोगेन वेष्टितः।
पृष्ठरेखाद्वयोपेतः लतारेखासमन्वितः।।

विचित्राङ्कि वक्त्रस्तु चतुश्चक्राङ्कितोऽपि वा।
लक्ष्मीनारयणो देवः सर्वाभीष्टफलप्रदः।।

अधश्चोर्ध्व पार्श्वयोश्च चक्रैरप्युपशोभितः।
चतुर्भिः मध्यसुषिरो लक्ष्मीनारायणः स्मृतः।।

सर्वसम्पत्प्रदश्चैव पूजकस्याशुसिद्धिदः।
द्वारद्वये चतुश्चक्रं वामे वा दक्षिणेऽपि वा।।

श्रीवत्सं शङ्खचक्राद्यं पार्श्वे च तृणपुष्पवत्।
लक्ष्मीनारायणं प्राहुः भुक्तिमुक्तिफलप्रदम्।।

शृङ्गाकृतिस्तथा रेखा दृश्यते मध्यदेशतः।
द्वे चक्रे पार्श्वयुगले द्वारचक्रचतुष्टयम्॥

लक्ष्मीनारायणं देवं प्राहुरिष्टप्रदं नृणाम्।
अधश्चोर्ध्वं पार्श्वयोश्च द्विद्विचक्रं भवेद्यदि॥

लक्ष्मीनारयणो देवः सर्वाभीष्टफलप्रदः।
मुसलासिधनुर्मालाशङ्खचक्रसमन्वितम्॥

मुखे वा नाभिदेशे वा चक्रद्वयसमन्वितम्।
लक्ष्मीनारायणं देवमभीष्टफलदं विदुः॥

लक्ष्मीनारायणो देवः चतुर्भिर्वदनैर्युतः।
यत्र तिष्ठति तत्क्षेत्रं सर्वभाग्ययुतं भवेत्॥

मूर्ध्नि मध्यस्तनुमुखो द्वारमध्ये द्विचक्रवान्।
ताटङ्कनासाभरणो रेखाकेयूरलाञ्छितः॥

मायानारायणो देवस्सर्वसिद्धिप्रदायकः।
द्वे द्वे चक्रेऽप्यधश्चोर्ध्व लक्ष्मीनारायणो भवेत्॥

द्वे द्वे चक्रे पार्श्वयोश्च श्रीमन्नारायणो भवेत्।
तमालदलसङ्काशः स्वर्णपङ्कविलेपवान्॥

वीरनारयणश्चैव ऽकचक्रसमन्वितः॥

अथ माधवमूर्तिलक्षणम्॥

मधुवर्णो मध्यचक्रः स्निग्धसूक्ष्ममुखस्तथा।
माधवश्चेति विज्ञेयो यतीनां मोक्षदायकः॥

अथ गोविन्दमूर्तिलक्षणम्॥

नातिस्थूलः कृष्णवर्णो गोविन्दः पञ्चचक्रकः।
द्विचक्रयुक्तः सर्वत्र सर्वाभीष्टप्रदोऽर्चताम्॥

अथ विष्णुमूर्तिलक्षणम्॥

वामचक्रो बृहद्द्वार उन्नतो निम्नमस्तकः।
स कपिलस्निग्धवर्णो विष्णुर्विजयभोगकृत्॥





विष्णुक्रान्तिनिभाकारो वनमालास्यलाञ्छितम्।
पञ्चायुधसमायुक्तो विष्णुरित्युच्यते बुधैः॥

विष्णुस्तथा रेखा च लक्ष्यते मध्यदेशतः॥

चक्रद्वययुतो नृणां बहुभाग्यप्रदोऽर्चताम्॥



अथ मधुसूदनमूर्तिलक्षणम्॥

मधुसूदनस्तथा देव एकचक्रो महाद्युतिः।
सर्ववर्णसमायुक्तो महाभाग्यप्रदोऽर्चताम्॥

अथ त्रिविक्रममूर्तिलक्षणम्॥

त्रिविक्रमस्त्रिकोणः स्याच्चक्रद्वयविभूषितः।
शिष्टैः द्विजैस्तु सम्पूज्यो चेतरैस्तु न पूज्यते॥

त्रिविक्रमस्तथा देवः श्यामवर्णः प्रकीर्तितः।
वामभागे गते चक्रे रेखा चैव तु दक्षिणे॥

त्रिकोणाद्व्यस्त्रिचक्रश्च धनं पूर्णं प्रयच्छति।
कुक्कुटाण्डनिभाकारः ऊर्ध्वचक्रं सुदर्शनम्॥

द्वे चक्रेऽप्येकभागे तु पूर्वभागे तु पुष्करम्।
त्रिविक्रम इति ज्ञेयं धनधान्यप्रदायकम्॥

वामनो नरसिंहश्च कृष्णश्चैते तथा त्रयः।
प्रोक्तत्वादत्र नोच्यन्ते पूर्वोक्तैश्चैव लक्षणैः॥

अथ श्रीधरमूर्तिलक्षणम्॥

श्रीधरस्तु तथा देवः चिह्नितो वनमालया।
कदम्बकुसुमाकारो सदा पञ्चायुधान्वितः॥

सूक्ष्माननश्यामलश्च स तु वै श्रीधरः स्मृतः।
नवशाद्वलसङ्काशो वनमालाविभूषितः॥

आस्यद्वये द्विचक्राद्यः श्रीधरः परिकीर्तितः।
पुरश्चक्रद्वयं यस्य पश्चाच्चक्रद्वयं तथा॥

पार्श्वे चक्रद्वयं चैव श्रीधरः परिकीर्तितः।
पुरश्चक्रद्वयं यस्य श्रीधरो वर्तुलोऽपि हि॥

आस्यत्रयसमन्वितः चक्रद्वयसमायुक्तः सर्वभाग्योप्रदोऽर्चताम्।

अथ हृषीकेशमूर्तिलक्षणम्॥

कदम्बकुसुमाकारो रेखापञ्चकसंयुतः।
अर्धचक्राकृतिर्देवः पञ्चचक्रसमन्वितः॥

त्रिचक्रश्चैका रेखा च हृषीकेश इतीरितः।
कृशं विषमचक्राद्यमिन्द्रनीलसमप्रभम्॥

हृषीकेशमिमं प्राहुः शुद्धज्ञानप्रदायकम्।
पश्चवक्त्रसमायुक्तं दशचक्रसमन्वितम्॥

श्यामलं कोमलाकारं हृषीकेशं प्रचक्षते।
निष्केसरोर्ध्वचक्रश्च अधश्चक्रस्सकेसरः।
पद्मनाभ इति ख्यातो विपरीतो हलायुधः।

अथ दामोदरमूर्तिलक्षणम्॥

नाभिचक्रलसन्मूर्तिः जम्बूफलसमाकृतिः।
दामोदर इति ख्यातो भुक्तिमुक्तिफलप्रदः॥

दामोदरस्तथा स्थूलो मध्ये चक्रं प्रतिष्ठितम्।
दूर्वाभो द्वारसङ्कीर्णो दीर्घरेखायुतः शुभः॥

वनमालालसत्कण्ठो दामोदर इतीरितः।
स्थूलं दामोदरं ज्ञेयं सूक्ष्मरन्ध्रसुचक्रकम्॥



Dāmodara

स कपिलं वा कार्श्यं वा नृणां शुभफलप्रदम्।

स्थूलो दामोदरो ज्ञेयः सूक्ष्मरन्ध्रो भवेत्तु यः।
चक्रद्वयसमायुक्तो मध्यदामः सुखप्रदः॥

अथ वासुदेवमूर्तिलक्षणम्॥

द्वारदेशे समे चक्रे दृश्येते नान्तरीयके।
वासुदेवः स विज्ञेयो शुक्लाभश्चातिशोभनः॥

रेखापञ्चायुधधरो हिमांशुसदृशप्रदः (भः)।
नाभिचक्रधरः शान्तो वासुदेव इतीरितः॥

जम्बूफलसमाकारं ह्रस्वं च परिवर्तुलम्।
द्वारदेशे समे चक्रे दृश्येते नान्तरीयके।
ललाटे श्वेतरेखाश्च वासुदेवस्य लक्षणम्॥

अथ प्रद्युम्नमूर्तिलक्षणम्॥

प्रद्युम्नः सूक्ष्मचक्रस्तु पीतवर्णस्तथैव च।
मकराभा भवेद्रेखा पार्श्वतः पृष्टतोऽपि वा॥

सूक्ष्मद्वारेण संयुक्तः पूजतामिष्टसिद्धिदः।
प्रद्युम्नः सूक्ष्मचक्रश्च श्वेतवर्णस्तथैव च॥

सुषिरं बहुलं चैव दीर्घाकारं तु तद्भवेत्।
पद्युम्न इति विख्यातः सर्वकामफलप्रदः॥

अथानिरुद्धमूर्तिलक्षणम्॥

अनिरुद्धस्तु नीलाभो वर्तुलश्चातिशोभनः।
रेखात्रयोऽपि द्वारे च कृष्णपद्मेन लाञ्छितः॥

कृष्णवर्णं समद्वारं चक्रं भित्तिसमीपगम्।
अनिरुद्ध इति ख्यातः सर्वाभीष्टफलप्रदः॥

अथ पुरुषोत्तममूर्तिलक्षणम्॥

मध्यचक्रस्सुवर्णस्तु मस्तके पृथुचक्रवान्।
पुरुषोत्तमः स विज्ञेयस्सर्वभाग्यप्रदोऽर्चताम्॥

कृष्णवर्णं सूक्ष्मरन्ध्रं द्वारे चक्रद्वयान्वितम्।
शिरस्येकं ब्रह्मचक्रं ज्ञेयं तत्पुरुषोत्तमम्॥

आस्यान्तराले मूत्तिस्तु चक्रे चक्रं बृहद्भवेत्।
ललाटे दण्डरेखा च द्वारचक्रे तु कल्पकम्॥

समद्वन्द्वञ्च विज्ञेयमिष्टदं पुरुषोत्तमम्।
आस्यान्तराले मूर्तिस्त्वनन्तचक्राढ्यो ह्यनन्तपुरुषोत्तमः॥

यस्या मूर्तेरुत्तमाङ्गे शिरश्चक्रं प्रदृश्यते।
तां तां मूर्तिं खगश्रेष्ठ विज्ञेयं पुरुषोत्तमम्॥

अथाधोक्षजमूर्तिलक्षणम्॥

अतिकृष्णो रक्तरेखा वृत्तदेहेषु चक्रवान्।
किञ्चत्कापिलसंयुक्तः स्थूलो वा सूक्ष्म एव वा॥

अधोक्षज इति ख्यातः पूजकस्य शुभप्रदः।

अथाच्युतमूर्तिलक्षणम्॥

चतुर्भिर्वाऽष्टचक्रैर्वा वामदक्षिणपार्श्वगैः।
अधिष्ठितो मुखे (प्येकं) च शोभितम्॥

शङ्खचक्रगदाशार्ङ्गयुतं कपिलमेव वा।
तदच्युतमिति ज्ञेयं दुर्लभं भाग्यदं नृणाम्॥

अथ जनार्दनमूर्तिलक्षणम्॥

पूर्वभागैकवदनः पार्श्वादेकास्यसंयुतः।
सचतुश्चक्ररूपवान् शत्रुनाशनः॥

एतल्लक्ष्यचुतश्चक्रं वर्तुलं फलप्रदम्।
द्वारषट्कसमायुक्तं चक्रद्वादशसंयुतम्॥

पूजतामिष्टफलदं कृष्णमाहुर्जनार्दनम्॥

अथ इन्द्रमूर्तिलक्षणम्॥

बृहद्द्वारसमायुक्तः श्यामवर्णो विचक्रवान्।
वर्तुलो मृदुलश्चैव पूजितोऽभीष्टसौख्यदः॥



Hayagrīva

अथ हयग्रीवमूर्तिलक्षणम्॥

हयग्रीवोऽपि भगवान् रक्तपीत इति श्रुतः।
अङ्कुशाकाररूपस्तु चक्रद्वयसमन्वितः॥

पद्माकृतिस्तथा पार्श्वे कुण्डलाकृतिरेव वा।
भाग्यदो ज्ञानदो नृणां मोक्षदो विनतासुत॥

पार्श्वचक्रो बृहद्द्वारश्चोन्नतो निम्नमध्यगः।
स कपिलः कृष्णवर्णो हयग्रीवः सुखप्रदः॥

स कपिलो वर्तुलान्तः स्पष्टचक्रसमन्वितः।
पञ्चबिन्दुसमायुक्तो धनविद्याप्रदो नृणाम्॥

अश्वाकृतिर्मुखमुद्रा साङ्कमाला सपुस्तका।
पादाङ्किता भवेन्मुद्रा हयग्रीवः प्रकीर्तितः॥

हयग्रीवोऽङ्कुशाकारो द्वारचक्रसमन्वितः।
पञ्चबिन्दुसमायुक्तो महासारःसुखप्रदः॥

अथ यज्ञमूर्तिलक्षणम्॥

यज्ञमूर्तिस्तु भगवान् रक्तपीतइति श्रुतः।
द्वारस्य वामे चक्रश्च सचक्रं दक्षिणेऽपि च।
चक्रद्वयसमायुक्तमर्चतामिष्टसिद्धिदम्॥

अथ दत्तात्रेयमूर्तिलक्षणम्॥

पीता सितारुणाभश्च ह्रस्वः पृष्ठेन्नतो भवेत्।
अक्षमालाकृतिर्मध्ये दत्तात्रेयः प्रकीर्तितः॥

अथ शिंशुमारमूर्तिलक्षणम्॥

शिंशुमारो दीर्घकायो बलशाल्यतिगह्वरः।
उन्नतः पृष्ठभागे च चक्रेणैकेन संयुतः॥

अथ मुकुन्दमूर्तिलक्षणम्॥

मुकुन्दस्य चक्राद्वादशसंयुतः।
कृष्णश्चेद्भाग्यदः प्रोक्तः शुक्लश्चेन्मुक्तिदायकः॥



Hamsa

अथ हंसमूर्तिलक्षणम्॥

हंसस्तु धनुराकारा नीलश्वेतप्रदस्सदा।
चक्रद्वयसमायुक्तः केवलं मोक्षदो भवेत्॥

अथ परमहंसमूर्तिलक्षणम्॥

परमहंसः खगेशान शिखण्डिगलसन्निभः।
स्निग्ध आयतवृत्तस्तु वर्तुलद्वारसंयुतः॥

बिलमध्ये तथा चक्रद्वयं चात्यन्तशोभनः।
वर्तुलाकृतिवद्भागे दृश्यते पद्मसन्निभः॥

मूर्तिः परमहंसाख्यः चतुर्वर्गफलप्रदः॥

अथ वैकुण्ठमूर्तिलक्षणम्॥

वैकुण्ठो मणिवर्णाभो वामपार्श्वैकचक्रकः।
द्वारोपरि तथा रेखा पद्माकारा तु शोभना।
वैकुण्ठदेवोऽर्चतां प्रोक्तो वैकुण्ठो विनतासुत॥

अथ पुण्डरीकमूर्तिलक्षणम्॥

पार्श्वे वा मूर्ध्नि वा पृष्ठे चक्रद्वययुतः शुभः।
पुण्डरीकाख्यमूर्तिः स्यात्सर्वभागयप्रदायकः॥

अथ लक्ष्मीपतिमूर्तिलक्षणम्॥

मुखे वा पार्श्वतो वाऽपि मयूरगलसन्निभः।
कृष्णवर्णः सूक्ष्मचक्रपृथुलास्यस्त्रगन्वितः॥

लक्ष्मीपतिरिति ख्यातो लक्ष्मीसन्निधिदायकः॥

अथ देवदेवमूर्तिलक्षणम्॥

अर्वाक्सूक्ष्मचक्रस्तु पीतरेखाश्च सूक्ष्मकाः।
द्वारे च दिक्षु सर्वत्र प्रदृश्यन्ते निरन्तरम्॥

स देवदेवो विज्ञेयः पूजतामिष्टसिद्धिदः॥

अथ वटपत्रशायिमूर्तिलक्षणम्॥

वटपत्रशायी भगवान् वर्तुलश्च द्विचक्रवान्।
क्षीरबुद्बुदवत्ताक्ष्र्य नीलश्वेतावुभौ तथा॥

अथ विश्वरूपमूर्तिलक्षणम्॥

विश्वरूपोऽथ भगवान् द्विविधः परिकीर्तितः।
विश्वरूपो बृहत्साक्षात्पारावतविधूपममः॥

बहुचक्रान्वितोऽनेकमूर्तिरूपसमन्वितः।
बहुवक्त्रः स्थूलतरः परुषो बहुचक्रवान्॥

अनन्तो विश्वरूपो वा पुत्रपौत्रभिवृद्धिदः॥

अथ गरुडध्वजमूर्तिलक्षणम्॥

स्वर्णशृङ्गयुतो वामे वर्तुलस्निग्धकेसरः।
चक्रमध्ये गते कृष्णे रेखाविभूषिते॥

लक्ष्मीकरो वैनतेय गरुडध्वजसंश्रितः॥

अथ पीताम्बरमूर्तिलक्षणम्॥

पीताम्बरस्तु भगवान् विविधोऽत्र प्रकीर्तितः।
स्निग्धो गोरोचनाकारो वर्तुलश्च सुचक्रकः॥

रेखापीताम्बरधरस्साम्राज्यफलदायकः।
द्वारदेशे लसच्चक्रे बहुवर्णसमन्वितः॥

पीताम्बरधरश्चैव सौभाग्यफलदोऽर्चताम्।

अथ सत्यवीरश्रवमूर्तिलक्षणम्॥

सुवर्तुलो ह्रस्वचक्रः सर्वाङ्गे हेमबिन्दुकः।
सत्यवीरश्रवाः प्रोक्तः सर्वभाग्यविवर्धनः॥



Satyavīra-Śravā

अथामृताहरणमूर्तिलक्षणम्॥

अमृताहरणो देवो नीलोत्पलसमप्रभः।
वर्तुलो ह्रस्ववदनो मध्यचक्रोऽतिकोमलः॥

अर्चतां च ददात्येष पुत्रपौत्रधनानि च॥

अथ चक्रपाणिमूर्तिलक्षणम्॥

पूर्वभागे त्रिवदनः पश्चादेकेन संयुतः।
अष्टचक्रेण संयुक्तश्चक्रपणिरितीरितः।

अभ्यन्तरे पृथुश्चक्रो बहुलास्यसमन्वितः।
चक्रपाणिरिति ख्यातः पूजतां मोक्षदो नृणाम्॥

अथ पारिजातहरमूर्तिलक्षणम॥

पञ्चवक्त्रं स्थूलतरं परुषं बहुचक्रकम्।
विश्वरूपमनन्तं वा पुत्रपौत्रभिवृद्धिदम्॥

चतुर्दशप्रभृतिभिः विंशया चक्रलांछितः।
नानावर्णं ह्यनन्तात्मा नागभोगेन चिन्हितम्॥

अनेकमूर्त्तिसंयुक्तं सर्वकामफलप्रदम्।
प्रदक्षिणावर्तयुतं वनमालाविभूषितम्॥

अथाव्ययमूर्त्तलक्षणम्॥

पूजनीयः प्रयत्नेन स्थिरःस्निग्धः सुवर्तुलः।
बहुवर्णो द्वारचक्रः पूजतां सर्वदोऽव्ययः॥

अथ त्रिमूर्तिलक्षणम्॥

चक्रत्रयसमेतो वा वदनेषु त्रिचक्रवान्।
त्रिमूर्तिरिति विख्यातः सर्वसम्पत्प्रदोऽर्चतामृ॥

अथ हरिहरमूर्तिलक्षणम्॥

चतुश्चक्रो हरिहरो द्विमुखो ह्याशु नश्यति।
गृहस्थश्चेत्धनं क्षेत्रं गृहं कुलम्॥

अधश्चोर्ध्वं यदि भवेद् द्वे द्वे चक्रे सुशोभने।
एतद्धि हरिहरं विद्यान्नृणां दारिद्र्यदः क्रमात्॥

शिवनाभियुतो मूर्ध्नि पृष्ठे वाऽपि भवेद्यदि।
एतद्धरिहरः प्रोक्तः ससौभाग्यसुखप्रदः॥

शिवनाभियुतः पार्श्वे वामे वा दक्षिणेऽपि वा।
स तु शङ्करपूर्वाख्यो नारायण इतीरितः॥

अथ स्वयमम्भुमूर्तिलक्षणम्॥

दीर्घास्यः पृथुचक्रस्तु मूर्ध्नि वर्तुलरेखवान्।
नीलवर्णसमायुक्तः स्वयम्भूः परिकीर्तितः।
केवलो मोक्षफलदो ह्यर्चतां च न संशयः॥

अथ परमेष्ठिमूर्तिलक्षणम्॥

परमेष्ठी तु शुक्लाभः चक्रपञ्चसमन्वितः।
द्विधाकृतिस्तथा पृष्ठे सुषिरश्चापि वर्तुलः।
पीतवर्णयुतो वापि भुक्तिमुक्तिफलप्रदः॥

अथ चतुर्मुखमूर्तिलक्षणम्॥

चतस्रो यत्र दृश्यन्ते रेखाः पार्श्वसमीपगाः।
द्विचक्रं मध्यदेशे तु सा शिला स्याच्चतुर्मुखः॥

अथ पितामहमूर्तिलक्षणम्॥

पितमहश्चतुर्वक्त्रो ह्यष्टचक्रसमन्वितः।
वर्तुलः कृष्णवर्णश्च पूजतां सर्वसिद्धदः॥

अथ हिरण्यगर्भमूर्तिलक्षणम्॥

चतुर्मुखः स्वर्णबिन्दुः स्वर्णगर्भः प्रकीर्तितः।
हिरण्यगर्भं परमं पवित्रं भुवि दुर्लभम्॥

अन्तर्ध्वनिसमायुक्तः कृष्णवर्णः सबिन्दुकः।
वर्तुलो ह्रस्ववदनो मध्यचक्रोऽतिकोमलः॥

श्रीवत्सकमलाकारलाञ्छनश्चक्रपार्श्वयोः।
हिरण्यगर्भो विख्यातो हेमगर्भनिधिप्रदः॥

अथ गरुडमूर्तिलक्षणम्॥

द्विपक्षाभ्यामुपेतञ्च द्वारं तद्विषमोचनम्।
दुर्लभं समचक्रं तत् कलौ कल्मषनाशनम्॥

अथ शेषमूर्तिलक्षणम्॥

पृष्ठादिमूर्धपर्यन्तं वलितक्षररेखाया।
वेष्टितः शुभचक्राद्यः श्यामो नीलः सितोऽपि वा॥

अथवा कुण्डलीभूतनागभोगसमप्रभः।
शेषमूर्तिः स भगवान् अष्टैश्वर्यप्रदायकः॥

अछ बलराममूर्तिलक्षणम्॥

दीर्घाकारं बृहाद्वक्त्रं पृथुचक्रं च तद्भवेत्।
श्वेताभं बिलचिह्नं तु मुसलाकृतिरेव वा॥

नीलोत्पलप्रसूनाभः पृष्ठे वा वदनेऽपि वा।
बलशाली भवेद्रामो वंशकोशविवर्धनः।

द्वितीयोपमचक्रस्तु रेखा चैव तु दक्षिणे।
वनमाली भवेद्रामो वंशकोशविवर्धनः॥

अथ सीरपाणिमूर्तिलक्षणम्॥

सर्वत्र रक्तवर्णः स्यात् सितनीलाभवर्जितः।
सुचक्रो वक्त्रचक्रो वा सीरपाणिः शुभप्रदः॥

अथ प्रलम्बघ्नमूर्तिलक्षणम्॥

एकचक्रयुतो वक्त्रे रक्तवर्णसमन्वितः।
प्रलम्बघ्नस्तु विख्यातः पूजतां मुक्तिदायकः॥

अथ नरमूर्तिलक्षणम्॥

नरमूर्तिस्तु भगवान् अतसीकुसुमप्रभः।
एकनामसमायुक्तो षष्टिसूत्रं तु पार्श्वके।
अर्चतां पुरुषाणां तु नरमूर्तिः शुभप्रदः॥

अथ शिवनाभिलक्षणम्॥

कूर्माकृतिरधोभागे पृष्ठे चैव खुरान्वितः।
सुवर्तुलश्चक्रहीनः कृष्णवर्णस्तथाऽर्चताम्॥

शिवनाभ इति ख्यातो भुक्तिमुक्तिफलप्रदः।
खगकुम्भसमा रेखा दृश्यते मध्यभागतः॥

शिवनाभः सदा लोके दुर्लभः सर्वकामदः।
ऊर्ध्वभागे शिवः साक्षादधोभोगे हरिः स्थितः।
शिवनाभस्य पूजायामुभयोः पूजितं फलम्॥

अथ गौरीनाभलक्षणम्॥

गौरीनाभस्य शिरसि निम्नवृत्तं भवेद्यदि।
गौरीनाभमिति प्रोक्तमर्चतां सर्वसिद्धिदम्॥

अथाघोरमूर्तिलक्षणम्॥

सर्वत्र लोहिताकारो मूर्ध्नि रक्तजटा शशी।
अघोरः स परित्याज्यो गृही खिद्यति पूजितः॥

अथ सद्योजातमूर्तिलक्षणम्॥

हेमवर्णं जटायुक्तं हेमबिन्दुसमन्वितम्।
मस्तके गोखुराभं स्याच्चक्रगङ्गसमविन्तम्।
सद्योजाताभिधानं तु पुत्रपौत्राभिवृद्धिदम्॥

अथ वामदेवमूर्तिलक्षणम्॥

लिङ्गन्तः सितवर्णा स्यात् श्वेतवर्णजटायुता।
वामदेवाभिधा श्रेष्ठा गृहिभिः पूज्यते सदा॥

अथेशानमूर्तिलाक्षणम्॥

किञ्चित्कपिलसंयुक्ता कृष्णवर्णा जटेऽन्दुका।
पार्श्वे रेखासमायुक्ता मूर्तिः सेशानसंज्ञिता॥

तत्पुरुषमूर्तिलक्षणम्॥

पूर्वभागे तडिद्भासा ऊर्ध्वभागे जटाशशी।
तत्पुरुषाभिधानः स्याद् दुर्लभा सर्वकामदा॥

अथ शङ्करमूर्तिलक्षणम्॥

द्विलिङ्गे वा त्रिलिङ्गे वा चतुष्पञ्चादिलिङ्गवान्।
यः शङ्करनामा स्याद्देवो देवत्वदायकः॥

लिङ्गैः पञ्चभिरादीप्तषड्भीष्मा पञ्चभिस्तु वा।
तत्तन्मूर्तिफलं पुण्यं मया वक्तुं न शक्यते॥

अथ सूर्यममूर्तिलक्षणम्॥

बाह्ये वाऽभ्यन्तरे वापि चक्रद्वादशसंयुतः।
सूर्यमूर्तिः स विज्ञेयः सर्वव्याधिविनाशनः॥

अथ हैहयमूर्तिलक्षणम्॥

गर्भाकारे चतश्चक्रं पद्मं चेद्दक्षिणे बहिः।
पद्मचक्राकृतिर्वापि हेमवर्णसमाकुलः।
हैहयः स तु विज्ञेयः सर्ववृद्धिप्रदायकः॥

अथ दत्तात्रेयमूर्तिलक्षणम्॥

एकचक्रयुतो वक्त्रे कृष्णवर्णयुतः।
सोऽपि वा भोगे विचित्रयुक्।
रेखाक्तमालासंयुक्तो दत्तात्रेयः सुखप्रदः॥

अथ विष्वक्सेनमूर्तिलक्षणम्॥

एकचक्रसमायुक्तो वक्त्रे बहुवर्णसमन्वितः।
चक्रस्योऽभयपार्श्वे तु शोभितः सुवर्तुलश्च।
सुस्निग्धः सर्वभाग्यप्रदो नृणाम्॥

अथ उपसंहारः॥

एतासामेव मूर्तीनां चक्रसंख्या उदाहृताः।
अनुक्तानां तु मूर्तीनां चक्रससंख्या निगद्यते॥

वासुदेवो जगद्योनिः कृष्णः पीताम्बरोऽव्ययः।
शिरः पार्श्वे समेताष्टद्वारचक्राः प्रकीर्तिताः॥

अनिरुद्धो हरिः कृष्णो जामदग्यस्तथैव च।
वामे वा दक्षिणे वापि पार्श्वचक्रसमन्विताः॥

लक्ष्मीनृसिंहो विष्णुश्च नारसिंहो ह्यभीतिदः।
बलरामो भूवराहः सयज्ञा वामचक्रिणः॥

सीता रामस्त्रिमूर्तिश्च श्रीधरः पूरुषोत्तमः।
मत्स्यमूर्तिस्तथा ह्येते त्रिचक्राः परिकीर्तिताः॥

चतुश्चक्रो हरिहरः सीतारामो जनार्दनः।
विश्वम्भरः कंसमर्दी लक्ष्मीनारायणस्तथा॥

पट्टाभिरामो दत्तश्चपञ्च चक्राः प्रकीर्तिताः।
सीतारामस्त्रिमूत्तिश्च लक्ष्मीनारायणस्तथा॥

षट्चक्रलाञ्छिताश्चैते अतीव शुभदाः स्मृताः।
सप्तचक्रः समाख्यातो नृसिंहः सर्वतोमुखः॥

पट्टाभिरामश्च तथा सर्वाभीष्टफलप्रदाः।
अष्टचक्रावुभौ ज्ञेयौ चक्रपाणिपितामहौ॥

नवचक्रोऽच्युतो ज्ञेयः सर्वपापहरः स्मृतः।
दशचक्रस्तु गोविन्दो ह्यनन्तो विश्वरूपकः।
एकादशश्च प्रद्युम्नो ह्यनन्तो द्वादशस्तथा॥

जनार्दनमुकुन्दौ च चक्रद्वादशसंयुतौ।
त्रयोदशश्चक्रधरः चतुर्दशसुचक्रकः॥

पूर्वोक्तचक्रहीनाश्च बहुवक्त्रसमन्विताः।
पातालनारसिंहो वा बहुरूपोऽथवा भवेत्॥

विश्वम्भरश्चापि तथा विंशत्च्चक्रसमन्वितः।
ततः परमनन्ताख्यं सर्वकामफलप्रदम्॥



Ananta

एवंलक्षणसम्पन्नाशिशलाश्चक्राद्यलंकृताः।
पूजयेद्यः प्रतिदिनं मुक्तो भवति निश्चयः॥

अथ द्वारकाशिलाचक्रलक्षणम्॥

द्वारवत्याः शिलायां तदेकचक्रं निदर्शनम्।
लक्ष्मीनारायणो ज्ञेयश्चक्रद्वयसमन्वितः॥

त्रिचक्रमच्युतं विद्याच्चतुश्चक्रो जनार्दनः।
पञ्चचक्रो वासुदेवः षट्चक्रः प्रद्युम्न एव च॥

सङ्कर्षणस्सप्तचक्रोऽष्टौ चेत्पुरुषोत्तमः।
नवकः श्रीधरो ज्ञेयो दशैकादश जाम्बवान्॥

एकादश्चानिरुद्धो द्वादशो वामनात्मवान्।
त्रयोदशादिभिश्चक्रैर्नरकः परिकीर्तितम्॥

द्वारकायाः शिलाभेदः प्रोक्तः संक्षेपतः खग॥



Nāga-bhoga-śilā

अथ संकीर्णविषयनिरूपणम्।।

रामर्मूर्तिस्सतां यत्नेन पूजयेत्।

पूजयित्वा फलं सम्यक् प्राप्नोतीति न संशयः।
सालग्रामशिलाचक्रनिर्मिता कृत्रिमा भवेत्।।

अर्पितं पूजयेत् भक्त्या सर्वान् कामानवाप्नुयात्।
सालग्रामाः समा पूज्याः विषमा न कदाचन।।

विषमेऽप्येकमेव स्यात् समे द्वे न कदाचन।
न प्रतिष्ठा न संस्कारो न प्रायश्चित्तमेव च।।

नापरधश्च पूजायां विद्यते वै खगेश्वर।
सालग्रामशिलायां तु द्रष्टव्याः सर्वमूर्तयः।।

मूर्तिबिम्बेन यष्टव्यान्यबिम्बे तथैव च।
चक्राञ्चितशिला वापि द्वारकायाः समुद्भवाः।।

सः पूजयेदनुदिनं स याति परमां गतिम्।
स्फुटितं कृत्रिमं वापि चक्राङ्कितशिलासु वै।।

सालग्रामशिलायां च पूजयेन्नात्र संशयः।
सालग्रामशिला यत्र यत्र द्वारवती शिला।।

तुलसी यत्र शङ्खश्च तत्र सन्निहितो हरिः।
विष्णुपादोदकं नित्यं शिरसा धारयेत् पिबेत्।
नियमेन तु यो मर्त्यः स याति परमां गतिम्॥



Nāga-bhoga-śilā
(rare stone from Subrahmaṇya)

अथ ग्राह्यमूर्तीनां दोषं दर्शयति॥

करालं कुलनाशं स्याद्विकरालमनिष्टदम्।
कर्मविघ्नकरं तिर्यक् विनिवक्त्रं तु शेकदम्॥

अतुष्टिदं स्थूलवक्त्रं मूर्धन्युच्चाटनं भवेत्।
अधोवक्त्रं पार्श्ववक्त्रं क्षयरोगविधायकम्॥

शिरोवक्त्रं पुत्रहानिः मित्रघ्नं पश्चचक्राम्।
अचक्रं सर्वशून्यं स्याद्वक्रचक्रं भयप्रदम्॥

पापदं भिन्नचक्रं च स्तेयदं भग्नचक्रकम्।
विषं विषमचक्रं च बहुचक्रं कुलक्षयम्।
पङ्क्तिचक्रं वित्तनाशं विवर्णं कुलनाशनम्॥

अन्तर्जरं धूम्रवर्णं अतिरक्तं च शोकदम्।
कपिलं पतिनाशं स्याच्चतुर्वर्णन्तु मध्यमम्॥

स्फुटितं पुत्रहानिः स्याद्भग्नोष्ठं मुक्तिनाशनम्।
आस्थानभङ्गदं भुग्नं दन्तुरं क्लेशकारणम्॥

भयावहं भिन्नशीर्षमतिस्थूलं धनापहम्।
अतिह्रस्वमपूजार्हं त्रिकोणं बन्धुनाशनम्॥

बहुरेखाङ्कितं दद्याद् असत्यं राजसंसदि।
सुकृतघ्नमचिह्नञ्च स्थाननाशं चलासनम्॥

धनवृद्धिविनाशं स्यादर्धमुन्नतमेव चेत्।
चित्तदाहदमुष्णं चेत् दग्धपदं भवेत्॥

उद्वेगकारकं रूक्षं छिद्रपृष्ठं तु रोगदम्।
पैशुन्यदं बहुच्छिद्रं स्फोटमायुष्यनाशनम्॥

एतत् त्याज्यगणं हित्वा ग्राह्यमेव सुपूजयेत्।
क्षीरे वा तण्डुले वापि सालग्रामं निवेशयेत्॥

दृष्ट्वाधिक्यं पयः किञ्चिद् गृह्णीयाद् बुद्धिमान्नरः

इति सालग्रामलक्षणम् समाप्तम्॥



Chakra (on the Dhvaja-stambha at the Tirumala-Tirupati Temples)

Dadhi-vamana

APPENDIX III

EXCERPT FROM PĀÑCHARĀTRĀGAMA

श्री रामचन्द्राय नमः।।

अथ पाञ्चरात्रागमे वराहपृथ्वीसंवादे।।

द्वारवत्याः शिला देवी चक्रमुद्रा प्रदर्शिता।
यत्रापि नीयते तत्स्यात्तीर्थं द्वादशयोजनम्।।1।।

सालग्रामशिला यत्र तत्र सन्निहितो हरिः।
तत्सन्निधौ त्यजेत्प्राणान्विष्णुलोके महीयते।।2।।

सालग्रामसमीपे तु क्रोशमात्रं समन्ततः।
कीटकोऽपि मृतो याति वैकुण्ठभवनं पदम्॥3॥

सालग्रामभवो देवो देवो द्वारवतीभवः।
उभयोस्संगमो यत्र मुक्तिस्तत्र न संशयः॥4॥

स्नानोदकं पिबेत्तोयं चन्दनं धारयेत्सदा।
प्रक्षाल्य तत्पिबेत्तोयं चक्राङ्कितशिला हरेः॥5॥

सालग्रामशिलातोयमपीत्वा यस्तु मस्तके।
प्रक्षेपणं प्रकुर्वीत ब्रह्महा स निगद्यते॥6॥







APPENDIX IV

तुलस्युपनिषत्।।

अथ तुलस्युपनिषदं व्याख्यास्यामः।।

नारदो ऋषिः। अथर्वाङ्गिरश्छन्दः। अमृता तुलसी देवता।।

सुधा बीजम्। वसुधा शक्तिः। नारायणः कीलकम्।।

श्यामां श्यामवपुर्धरां ऋक्स्वरूपां यजुर्मनसं ब्रह्माथर्वप्राणां कल्पहस्तां पुराणपठिताम् अमृतोद्भवां अमृतरसमञ्जरीत अनन्म्मनन्तरसभोगदां वैष्णवीं विष्णुवल्लभां, मृत्युजन्मनिबर्हणीं, दर्शनात् पापनाशिनीं, स्पर्शनात् पावनीं, अभिवन्दनात् रोगनाशिनीं, सेवनान्मृत्युनाशिनीं, वैकुण्ठार्चनात् विपद्धन्त्रीं, भक्षणात् वयुनप्रदां, प्रादक्षिण्याद् दारिद्र्य-नाशिनीं, मूलमृल्लेपना-न्महापापभञ्जनीं, घ्राणतर्पणाद् अन्तर्मलिननाशिनीं। य एवं वेद स वैष्णवो भवति।।

वृथा न छिन्द्यात्। दृष्ट्वा प्रदक्षिणं कुर्यात्। यां न स्पृशेत्। पर्वाणि न विचिन्वेत्। यदि विचिन्वति स विष्णुहा भवति॥

श्रीतुलस्यै स्वाहा। विष्णुप्रियायै स्वाहा। अमृतायै स्वाहा॥

श्रीतुलस्यै विद्महे। विष्णुप्रियायै धीमहि। तन्नो अमृता प्रचोदयात्॥

अमृतेऽमृतरूपासि अमृतत्वप्रदायिनि।
त्वं मामुद्धर संसारात्क्षीरसागरकन्यके॥1॥

श्रीसखि त्वं सदानन्दे मुकुन्दस्य सदा प्रिये।
वरदाभयहस्ताभ्यां मां विलोकय दुर्लभे॥2॥

अवृक्षवृक्षरूपासि वृक्षत्वं मे विनाशय।
तुलस्यतुलरूपासि तुलाकोटिनिभेऽजरे॥3॥

अतुले त्वतुलायां हि हरिरेकोऽस्ति नान्यथा।
त्वमेव जगतां धात्री त्वमेव विष्णुवल्लभा॥4॥

त्वमेव सुरसंसेव्या त्वमेव मोक्षदायिनी।
त्वच्छायायां वसेल्लक्ष्मीः त्वन्मूले विष्णुरव्ययः॥5॥

समन्ताद्देवताः सर्वाः सिद्धचारणपन्नगाः।
यन्मूले सर्वतीर्थानि यन्मध्ये ब्रह्मदेवताः॥6॥

यदग्रे वेदशास्त्रणि तुलसीं त्वां नमाम्यहम्।
तुलसि श्रीसखि शुभे पापहारिणि पुण्यदे॥8॥

नमस्ते नारदनुते नारायणमनःप्रिये।
ब्रह्मानन्दाश्रुसञ्जाते बृन्दावननिवासिनि॥9॥

सर्वावयवसम्पूर्णे अमृतोपनिषद्रसे।
त्वं मामुद्धर कल्याणि महापापाब्धिदुस्तरात्॥9॥

सर्वेषामपि पापानां प्रायश्चित्तं त्वमेव हि।
देवानां च ऋषीणां च पितृणां त्चं सदा प्रिये॥10॥

(यज्ञं दानं जपं तीर्थं श्राद्धं वै देवतार्चनम्।
तर्पणं मार्जनं चान्यत्र कुर्यात्तुलसीं विना।
तुलसीदारुमणिभिः जपः सर्वार्थसाधकः॥)



APPENDIX V

ON RUDRĀKSHA

Regarded as sacred to Śiva are the rudrāksha berries, which are worn on the body by the Śaiva-devotees, used as rosaries, and which adorn the lingas and images of Śiva. They are drupes or berries from the tree known as Elacarpus ganitrus. The trees are grown extensively in Nepal, Śri-lankā, Malasia, North Australia, Indonesia, sumātra, Java and the pacific Islands. The tree occurs in twenty-five species.

The drupes from the trees in Nepal are regarded as superior in quality. The differences in the trees are due to the weather conditions, maintenance and methods of cultivation.

The berries (drupes) are considered as having come out of the eyes of Śiva; hence called 'rudrāksha' ('rudrasya nayanād utpannā rudrākshāh'). There is a legend that Śiva, when he set out to battle with the demon

Tripura, closed his eyes for a long stretch of time. From his closed eyes, tears trickled down and fell on the ground. At once the trees sprouted from the tears as they touched the earth. Thus the trees came to be called 'Rudra's eyes'. Another account narrates that Sadāśiva destroyed the world at the time of dissolution (pralaya) with his eye of destruction (viz, the third eye, or the eye on the forehead), and closed that eye. The rudrāksha berries emanated from that eye ('sadāśivah samhārakāle samhāram kṛtvā samhārāksham mukulī-karoti; tan nayanāj jātāh rudrākshāh; tasmād rudrākshatvam').

The rudrāksha-berries are round in shape, oval or flat. They may also be semi-round and long. The good berries are glabose or abovoid, having inside each of them a nut which is hard and longitudinally grooved. These are referred to as 'faces' (mukha), which differ in number and in formation. Small-sized rudrākshas, which are hard, thorny, and well-grooved are considered especially sacred. They will also have a natural hole in the centre.

Like the Śālagrāmas, the rudrākshas are also tested for their acceptability. The rudrāksha is placed in a bowl of milk and watched; even if kept for a very long time the milk will not get spoilt if the rudrāksha is a genuine or a good one. Or when it is placed in water, the water will, within a short time, change its colour, and will be warmer to touch than before, if the rudrāksha is good one. Good rudrāksha will sink in water, unless it is old or worn out. (when it floats).

The rudrākshas are also purified before use. The usual method is to wash the rudrāksha first wth coconut-water, and then with milk, ghee and curds, one after another; finally the rudrāksha is washed in pure water. Before wearing them or stringing them together, specific mantras are recited, and the berries are consecrated.

Garlands of rudrākshas are made, with 18, 36, 54 or 108 beads for wearing on the head, a round the neck, on the wrists and as a cross-belt (upavīta). The rudrākshas are distinguished by the number of faces (mukha) they have. The faces may be from one to fourteen. Rarely, however, rudrākshas with faces upto twenty-one are available. The purāṇas speak of rudrākshas which have thirty-eight faces.

There are several texts dealing with the problem of indentifying good rudrākshas and the methods of using them : *Rudrāksha-kalpa, rudrāksha-parīkshā,* and *Rudrāksha-dhāraṇā.* There is an Upanishat called *Rudrākshopanishat* (or *Rudrāksha-jābālopanishat*), which provides details about the rudrākshas. The text is given below with explanations.



रुद्राक्षोपनिषत्॥

हरिः ओं॥

अथ हैनं कालाग्निरुद्रं भुसुण्डः पप्रच्छ। कथं रुद्राक्षोत्पत्तिः। तद्धारणात् किं फलमिति॥

तं होवाच भगवान् कालग्निरुद्रः। त्रिपुरवधार्थमहं निमीलिताक्षोऽभवम्। तेभ्यो जलबिन्दवो भूमौ पतिताः। ते रुद्राक्षा जाताः। सर्वानुग्रहार्थाय तेषां नामोच्चारमात्रेण दशगोदानफलं दर्शनस्पर्शनाभ्यां द्विगुणं फलम्॥

अत ऊर्ध्वं वक्तुं न शन्कोमि॥

तत्रैते श्लोका भवन्ति॥

कस्मिंस्थितं तु किं नाम कथं वा धार्यते नरैः।
कति भेदमुखान्यत्र कैर्मन्त्रैर्धार्यते कथम्॥1॥

दिव्यवर्षसहस्राणि चक्षुरुन्मीलितं मया।
भूमावक्षिपुटाभ्यां तु पतिता जलबिन्दवः॥2॥

तत्राश्रुबिन्दवो जाता महारुद्राक्षवृक्षकाः।
स्थावरत्वमनुप्राप्य भक्तानुग्रहकारणात्॥3॥

भक्तानां धारणात्पापं दिवारात्रिकृतं हरेत्।
लक्षं तु दर्शनात्पुण्यं कोटिस्तद्धारणात् भवेत्॥4॥

तस्य कोटिशतं पुण्यं लभते धारणान्नरः।
लक्षकोटिसहस्राणि लक्षकोटिशतानि च॥5॥

तज्जपाल्लभते पुण्यं नरो रुद्राक्षधारणात्।

This text is in the nature of a dialogue between Bhusuṇḍi and Kālāgni-rudra, the former questioning and the latter answering. This portion of the text is an introduction. It narrates that Śiva, as he set out to destroy the demon Tripura, closed his eyes for a thousand celestial years.

From his closed eyes, tears fell on the earth, and the drops were transformed into the Rudrāksha-trees, for the sake of securing the welfare of the devotees. There is also in this section an eulogy of the merits acquired by seeing, touching and wearing the rudrāksha-drupeș.

धात्रीफलप्रमाणं यच्छ्रेष्ठमेतदुदाहृतम्॥6॥

बदरीफलमात्रं तु मध्यमं प्रोच्यते बुधैः।
अधमं चणमात्रं स्यात्प्रक्रियैषा मयोच्यते॥7॥

The rudrāksha that is of the size of dhātri (āmalakī) (Emblica officinalis) is regarded as the best, while the one that is of the size of the badari fruit (jujube berry, Zizyphus jujuba) is of middling merit, and the one which is of the size of chaṇaka (chick-pea) is inferior.

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चेति शिवाज्ञया।
वृथा जाताः पृथिव्यां तु तज्जातीयाः शुभाक्षकाः॥8॥

श्वेतास्तु ब्राह्मणा ज्ञेयाः क्षत्रिया रक्तवर्णकाः।
पीतास्तु वैश्या विज्ञेयाः कृष्णाः शूद्रा उदाहृताः॥9॥

ब्राह्मणो बिभृयाच्छ्वेतान् रक्तान् राजा तु धारयेत्।
पीतान् वैश्यस्तु बिभृयात् कृष्णान् शूद्रस्तु धारयेत्॥10॥

The rudrākshas are classified into four groups corresponding to the four social groupings : brāhmaṇas, kshattriyas, vaiśyas and śūdras. They are white in colour, red, yellow and black respectively. The persons belonging to the different social organisations are required to wear the rudrāksha indicated for that particular group.

समाः स्निग्धा दृढाः स्थूलाः कण्टकैः संयुताः शुभाः।
कृमिदष्टं भिन्नभिन्नं कण्टकैर्हीनमेव च॥11॥

व्रणयुक्तमयुक्तं च षड् रुद्राक्षा विवर्जयेत्।
स्वयमेव कृतं द्वारं रुद्राक्षं स्यादिहोत्तमम्॥12॥

यत्तु पौरुषयुक्तेन कृतं तन्मध्यमं भवेत्।
समान् स्निग्धान् दृढान् स्थूलान् क्षौमसूत्रेण धारयेत्॥13॥

सर्वगात्रेण सौम्येन सामान्यानि विचक्षणः।
निकषे हेमरेखाभा यस्य रेखा प्रदृश्यते॥14॥

तदक्षमुत्तमं विद्यात्तद्धार्यं शिवपूजकैः।

The rudrāksha-drupes that are even in shape, lustrous, compact in structure, large, and having thorns on them are meritorious. The drupes that are worm-eaten, split, damaged, devoid of thorns, wounded or otherwise defective must be avoided. The rudrākshas which have natural openings (holes) are most desirable, while the ones which have man-made openings (holes) are of middling merit. The beads which are acceptable must be strung in silken thread. The rudrāksha on which can be seen a golden streak is superior in quality.

शिखायामेकरुद्राक्षं त्रिशतं शिरसा वहेत्॥15॥

षट्त्रिंशतं गले दध्याद् बाह्वोः षोडश षोडश।
मणिबन्धे द्वादशैव स्कन्धे पञ्चशतं वहेत्॥16॥

अष्टोत्तरशतैर्मालामुपवीतं प्रकल्पयेत्।
द्विसरं त्रिसरं वापि सराणां पञ्चकं तथा॥17॥

सराणां सप्तकं वापि बिभृयात् कण्ठदेशतः।
मुकुटे कुण्डले चैव कर्णिकाहारकोपि वा॥18॥

केयूरकटके सूत्रं कुक्षिबन्धे विशेषतः।
सुप्ते पीते सदाकालं रुद्राक्षं धारयेन्नरः॥19॥

त्रिशतं त्वधमं पञ्चशतं मध्यममुच्यते।
सहस्रमुत्तमं प्रोक्तं एवंभेदेन धारयेत्॥20॥

The rudrākshas are worn on different parts of the body. The numbers of rudrākshas specific to the parts of the body are enumerated in these verses. A single rudrāksha must be tied to the tuft of hair (śikhā), while to be wound round the head the string must have three hundred of them. A necklace of thirty-six is suitable; the arm-bands must have sixteen; the wrists must be covered with strings of twelve beads. Shoulders must have strings of five hundred beads; garlands and sacred-chords (upavīta) are strung with one hundred and eight rudrākshas. One may wear necklaces of rudrāksha-beads, with two, three, five or seven strands. The rudrākshas may also be worn on the crest, or as ear-pieces; they may be used as bracelets, arm-bands or as belly-belts (udara-bandha). The beads must be worn all the time, even while sleeping. The employment of a thousand rudrāksha-drupes (on the body) is most meritorious, while five-hundred is of middling merit and three hundred is inferior.

शिरसीशानमन्त्रेण कण्ठे तत्पुरुषेण तु।
अघोरेण गले धार्यं तेनैव हृदयेऽपि च॥21॥

अघोरबीजमन्त्रेण करयोर्धारयेत् सुधीः।
पञ्चाशदक्षग्रथितान् व्योमव्याप्यपि चोदरे॥22॥

पञ्चब्रह्मभिरङ्गैश्च त्रिमाला पञ्च सप्त च।
ग्रथित्वा मूलमन्त्रेण सर्वाण्यक्षाणि धारयेत्॥23॥

The procedure for wearing the rudrāksha-drupes on the head, neck, chest, hands and belly involve the recitation of specific mantras; iśāna mantra for wearing the rudrāksha on the head, tatpurusha-mantra around the neck and so on. Even while stringing the rudrākshas into strands, the mūla-mantra needs to be recited.

अथ हैनं भगवन्तं कालाग्निरुद्रं भुसुण्डः पप्रच्छ रुद्राक्षाणां भेदेन यदक्षं यत्स्वरूपं यत्फलमिति।

तत्स्वरूपं मुखयुक्तमरिष्टनिरसनं कामाभीष्टफलं ब्रूहीति॥

तत्रैते श्लोका भवन्ति।

एकवक्त्रं तु रुद्राक्षं परतत्त्वस्वरूपकम्।
तद्धारणात् परे तत्त्वे लीयते विजितेन्द्रियः॥1॥

द्विवक्त्रं तु मुनिश्रेष्ठ चार्धनारीश्वरात्मकम्।
धारणादर्धनारीशः प्रीयते तस्य नित्यशः॥2॥

त्रिमुखं चैव रुद्राक्षं अग्नित्रयस्वरूपकम्।
तद्धारणाच्च हुतभुक्तस्य तुष्यति नित्यदा॥3॥

चतुर्मुखं च रुद्राक्षं चतुर्वक्त्रं स्वरूपकम्।
तद्धारणाच्चतुर्वक्त्रः प्रीयते तस्य नित्यदः॥4॥

पञ्चवक्त्रं तु रुद्राक्षं पञ्चब्रह्मस्वरूपकम्।
पञ्चवक्त्रः स्वयं ब्रह्मा पुंहत्या च व्यपोहति॥5॥

षड्वक्त्रमपि रुद्राक्षं कार्तिकेयाधिदैवतम्।
तद्धारणान्महाश्रीः स्यान्महदारोग्यमुत्तमम्॥6॥

मतिविज्ञानसम्पत्तिशुद्धये धारयेत्सुधीः।
विनायकाधिदैवः च प्रवदन्ति मनीषिणः॥7

सप्तवक्त्रं तु रुद्राक्षं सप्तमालाधिदैवतम्।
तद्धारणान्महाश्रीः स्यान्महदारोग्यमुत्तमम्॥8॥

महती ज्ञानसम्पत्तिः शुचिर्धारणतः सदा
अष्टवक्त्रं तु रुद्राक्षमष्टमात्राधिदैवतम्॥9॥

वस्वष्टकप्रियं चैव गंगाप्रीतिकरं तथा।
तद्धारणादिमे प्रीता भवेयुः सत्यवादिनः॥10॥

नववक्त्रं तु रुद्राक्षं नवशक्त्यधिदैवतम्।
तस्य धारणमात्रेण प्रीयन्ते नवशक्तयः॥11॥

दशवक्त्रं तु रुद्राक्षं यमदैवत्यमीरितम्।
दशप्रशान्तिनकं धारणान्नात्र संशयः॥12॥

एकादशमुखं त्वक्षं रुद्रैकादशदैवतम्।
तदिदं दैवतं प्राहुः सदा सौभाग्यवर्द्धनम्॥13॥

रुद्राक्षं द्वादशमुखं महाविष्णुस्वरूपकम्।
द्वादशादित्यरूपं च बिक्भर्त्येव हि तत्परम्॥14॥

त्रयोदशमुखं त्वक्षं कामदं सिद्धिदं शुभम्।
तस्या धारणमात्रेण कामदेवः प्रसीदति॥15॥

चतुर्दशमुखं चाक्षं रुद्रेनत्रसमुद्भवम्।
सर्वव्याधिहरं चैव सर्वदारोग्यमाप्नुयात्॥16॥

The rudrāksha berries have several faces (mukha or vaktra), marked by longitudinal grooves, one to fourteen in number. The berries are thus known by different names, and wearing them is supposed to bestow different benefits. The names indicate the deities the berries represent.

1. ***One faced berry :***

   The supreme reality (para-tattva), which is unitary.

2. ***Two-faced berry :***

   Ardha-nariśvare forms of Śiva; also called Hara-Gauri.

3. ***Three-faced berry :***

   The three forms of agni (Āhavanīya, Dakshiṇa and Gārhapatya); or in some other accounts, the three deities (tri-mūrti) Brahma, Vishṇu and Śiva.

4. ***Four-faced berry :***

   The four faced Brahmā

5. ***Five-faced berry :***

   The five brahmās (representing the five primary elements, bhūta); or kālāgni.

6. ***Six-faced berry :***

   The six-headed god, Kārtikeya (Shaṇmukha)

7. ***Seven-faced berry*** :

   The seven strands (standing for the seven realms, sapta-loka); or Ananta the dragon with seven hoods.

8. ***Eight-faced berry :***

   The eight mother- goddesses (mātṛkās), the usual seven alongside Mahālakshmi as the eighth; or Gaṇeśa in some accounts.

9. ***Nine-faced berry :***

   The nine Śakti-goddesses or Durgās

10. ***Ten-faced berry :***

    Yama; or in some accounts Janārdana.

11. ***Eleven-faced berry :***

    The eleven forms of Rudra (ekādaśa-rudras):

12. ***Twelve-faced berry :***

    The twelve forms of Vishṇu (or the twelve forms of Āditya (dvādaśāditya)

13. ***Thirteen-faced berry :***

    Kāma-deva (Indian Eros)

14. ***Fourteen-Śiva,*** or that which emerged directly from Rudra's eyes.

मद्यं मासं च लशुनं पलाण्डुं शिग्रुमेव च।
श्लेष्मातकं विड् वराहमभक्ष्यं वर्जयेन्नरः॥17॥

ग्रहणे विषुवं चैवमयने संक्रमेऽपि च।
दर्शेषु पूर्णमासे च पूर्णेषु दिवसेषु च।
रुद्राक्षधारणात्सद्यः सर्वपापैः प्रमुच्यते॥18॥

रुद्राक्षमूलं तद् ब्रह्मा तन्नालं विष्णुरेव च।
तन्मुखं रुद्र इत्याहुस्तद् बिन्दुः सर्वदेवता:॥19॥

The text proceeds with mentioning certain articles of food (like liquor, meat, garlic and onion) which must be avoided by one who wears the rudrāksha. The special periods (like grahaṇa, vishuva, ayana, sankramaṇa etc.) when the wearing of rudrāksha will at once remove all sins. The portion of the text ends by describing the bottom of the berry as Brahmā, the central canal as Vishṇu, and the faces as Rudra; the hole represents all the gods.



Varjya-śila
(small dvāra in large stones and large dvāra in small ones)

APPENDIX VI

EXCERPT FROM ŚRĪ-VIDYĀRṆAVA-TANTRA

(Uttara-bhāga, śvāsa 29, Prāchya-prakāśana, Vāraṇāsi, 1987, pp.14-19)

अथ शालग्रामलक्षणानि स्कान्दे॥

स्निग्धा कृष्णा पाण्डुरा च पीता नीला तथैव च।
रक्ता रूक्षा च वक्त्रा च महास्थूलाप्यलाञ्छिता॥1॥

कपिला कर्बुरा भग्ना बहुचक्रैकचक्रिका।
बृहन्मुखी बृहच्चक्रा लग्नचक्राथवा पुनः॥2॥

भुग्नचक्राथ वा काचिद्भग्नचक्राप्येधोमुखी।

इति।

अथैतासां वर्णादिभेदेन गुणदोषौ तत्रैव॥

स्निग्धा सिद्धिकरी मन्त्रे कृष्णा कीर्तिं ददाति च।
पाण्डुरा पापदमनी पीता पुत्रफलप्रदा॥1॥

नीला संदिशते लक्ष्मीं रक्ता राज्यप्रदायिनी।
रूचा चोद्वेगदा नित्यं वक्रा दारिद्र्यदायिनी॥2॥

स्थूला निहन्ति चैवायुर्निष्फला तु अलाञ्छिता।
कपिला कर्बुरा भग्ना बहुचक्रैकचक्रिका॥3॥

बृहन्मुखी बृहच्चक्रा लग्नचक्राथ वा पुनः।
भुग्नचक्राथ वा या स्याद्भग्नचक्राप्यधोमुखी॥4॥

पूजयेद्वा प्रमादेन दुःखमेव लभेत सः।

इति।

अग्निपुराणे॥

तथा व्यालमुखी भग्ना विषमा बद्धचक्रिका।
विकारावर्तनाभिश्च नारसिंही तथैव च॥1॥



Varjya-bhramāvarta

कपिला च भ्रमावर्ता रेखावर्ता च या शिला।
दुःखदा सा तु विज्ञेया सुखदा न कदाचन॥2॥

स्निग्धा श्यामा तथा शुक्ला पीता वा समचक्रिका।
घोणीमूर्तिरनन्ताख्या गम्भीरा सम्पुटा तथा॥3॥

सूक्ष्मा मूर्तिश्च सुमुखी पूजिता सिद्धिदायिका।
धात्रीफलप्रमाणा या करेणोभयसम्पुटा॥4॥

पूजनीया प्रयत्नेन भक्त्या तां तु प्रपूजयेत्।
पूजिते फलमाप्नोति इह लोके परत्र वै॥5॥

इति।

दोषाश्चैते सकामार्चनविषयाः॥

अत उक्तं श्रीभगवता स्कान्दे॥

खण्डितं स्फुटितं भग्नं सालग्रामे न दोषभाक्।
इष्टा तु यस्य या मूर्तिः स तां यत्नेन पूजयेत्॥1॥

चक्रं वा केवलं तत्र पद्मेन सह संयुतम्।
केवला वनमाला वा हरिर्लक्ष्म्या सह स्थितः॥2॥

इति।



Khaṇḍita

अथैतासामेव लक्षणविशेषेण संज्ञाविशेषो ब्राह्मे श्रीभगवद्ब्रह्मसम्वादे॥

निवसामि सदा ब्रह्मन् सालग्रामाख्यवेशमनि।
तत्र च मुख्यचक्राङ्कभेदे नामानि मे शृणु॥1॥

द्वारदेशे समे चक्रे दृश्येते नान्तरायके।
वासुदेवः स विज्ञेयः शुक्लाभश्चातिशोभनः॥2॥

प्रद्युम्नः सूक्ष्मचक्रस्तु पीतदीप्तिस्तथैव च।
सुषिरं छिद्रबहुलं दीर्घाकारं तु तद्भवेत्॥3॥

अनिरुद्धस्तु नीलाभो वर्तुलश्चातिशोभनः।
रेखाद्वयं तु तद्द्वारि पृष्ठं पद्मेन लाञ्छितम्॥4॥

सौभाग्यं केशवो दद्यात् चतुष्कोणे भवेत्तु यः।
श्यामं नारायणं विद्यान्नाभिचक्रं तथोपरि॥5॥

दीर्धरेखासमोपेतं दक्षिणे सुषिरं पृथु।
ऊर्ध्वे मुखं विजानीयाद्द्वारे च हरिरूपिणीम्॥6॥

कामदं मोक्षदं चैव ह्यर्थदं च विशेषतः।
परमेष्ठी च शुक्लाभः पद्मचक्रसमन्वितः॥7॥

बिल्वाकृतिस्तथा पृष्ठे सुषिरं वापि पुष्कल0म्।
कृष्णवर्णस्तथा विष्णुः स्थूले चक्रे सुशोभने॥8॥

द्वारोपरि तथा रेखा दृश्यते मध्यदेशतः।
कपिलो नारसिंहस्तु पृथुचक्रः सुशोभनः॥9॥

ब्रह्मचार्यधिकारी स्यात् पूजनं नान्यथा भवेत्।
ब्रह्मचर्येण पूज्योऽसावन्यथा विघ्नदो भवेत्॥10॥

इति

Nārasimha

क्वचिच्च॥

कपिलोऽधस्त्रिबिन्दुः स्यात् कपिलः पञ्चबिन्दुकः।
ब्रह्मचर्येण पूज्यः स्यादन्यथा सर्वविघ्नदः॥1॥

स्थूलं चक्रद्वारं मध्ये गुडलाक्षासवर्णकम्।
द्वारोपरि तथा रेखा पूजा कार्या सुशोभना॥2॥

स्फुटितं विषमं चक्रं नारसिंहं तु कापिलम्।
सम्पूज्य मुक्तिमाप्नोति संग्रामे विजयी भवेत्॥3॥

इति।

पद्मपुराणे, कार्तिकमाहात्म्ये॥

यस्य दीर्घं मुखं पूर्वं कथितैर्लक्षणैर्युतम्।
केसराकारिका रेखा नारसिंहो मतः स तु॥3॥

इति।



ब्राह्मे॥

वराहं शक्तिलिङ्गे च चक्रे च विषमे स्मृते।
इन्द्रनीलनिभं स्थूलं विरेखालाञ्छितस्थलम्॥1॥

इति।

पाद्मे च॥

वाराहाकृतिराभुग्नश्चक्ररेखास्वलंकृतः।
वाराह इति सम्प्रोक्तः॥

इति ।

ब्राह्मे॥

दीर्घा काञ्चनवर्णाभा बिन्दुत्रयविभूषिता।
मत्स्याख्या सा शिला ज्ञेया भुक्तिमुक्तिफलप्रदा॥1॥

कूर्मस्तथोन्नतः पृष्ठे वर्तुलः परिपूरितः।
हरितं वर्णमाधत्ते कौस्तुभेन च चिह्नितः॥2॥

कूर्माकारा च चक्राङ्कः शिला कूर्मः प्रकीर्तितः।

इति



ब्राह्मे॥

हयग्रीवांऽकुशाकारो रेखाःपञ्च भवन्ति हि।
बहुबिन्दुसमाकीर्णो दृश्यते नीलरूपकः॥1॥

इति पाद्मे॥



हयग्रीवा यथा लम्बरेखा वा या शिला भवेत्।
तथा सौम्यो हयग्रीवः पूजितो ज्ञानदो भवेत्॥1॥

अश्वाकृति मुखं यस्य साक्षमालशिरस्तथा।
पद्माकृतिर्भवेद्वापि हयशीर्षस्त्वसौ मतः॥2॥

वैकुण्ठं नीलवर्णाभं चक्रमेकं तथा ध्वजा।
द्वारोपरि तथा रेखा पूजा कार्या सुशोभना॥3॥

श्रीधरस्तु तथा देवश्चिह्नितो वनमालया।
कदम्बकुसुमाकारो रेखापञ्चकभूषितः॥4॥

वर्तुलश्चातिचिह्नश्च वामनः परिकीर्तितः।
अतसीकुसुमप्रख्यो बिन्दुना परिशोभितः॥5॥

इति ।

अन्यत्र च॥

वामनरूपो भवेद्देवो ह्रस्वो यः स्यान्महाद्युतिः।
वामपार्श्वे गदाचक्रे रेखे चैव तु दक्षिणे॥1॥

इति ।

पाद्मे॥

चक्राकारेण पङ्क्तिः सा यत्र रेखामयी भवेत्।
स सुदर्शन इत्येवं ख्यातः पूजाफलप्रदः॥1॥

दामोदरस्तथा स्थूलो मध्ये चक्रं प्रतिष्ठितम्।
दूर्वाभं द्वारि सङ्कीर्णं पीता रेखा तथैव च॥2॥

उपर्यधश्च चक्रे द्वे नातिदीर्घं मुखे बिलम्।
मध्ये च रेखा लम्बैका सा च दामोदरः स्मृतः॥3॥

इति।

अन्यत्र च॥

स्थूलो दामोदरो ज्ञेयः सूक्ष्मरन्ध्रो भवेत्तु यः।
चक्रे च मध्यदेशस्थे पूजितः सुमुखः सदा॥1॥



नानावर्णो ह्यनन्ताख्यो नागभोगेन चिह्नितः।
अनेकचक्रसम्भिन्नः सर्वकामफलप्रदः॥2॥

अनेकचक्रो बहुभिश्चिह्नैरप्युपलक्षितः।
अनन्तः स तु विज्ञेयः सर्वपूजाफलप्रदः॥3॥

विदिक्षु दिक्षु सर्वासु यस्योर्ध्वं दृश्यते मुखम्।
पुरुषोत्तमः स विज्ञयो भुक्तिमुक्तिफलप्रदजः॥4।

दृश्यते शिखरे लिङ्गं शालग्रामसमुद्भवम्।
तस्य योगीश्वरो नाम ब्रह्महत्यां व्यपोहति॥5॥

आराध्यं पद्मनाभाख्यं पङ्कजच्छत्रसंयुतम्।
तुलस्या पूजयेन्नित्यं दरिद्रस्त्वीश्वरो भवेत्॥6॥

चन्द्राकृतिं हिरण्याख्यं रश्मिजालं विनिर्दिशेत्।
सुवर्णरेखाबहुलं स्फटिकद्युतिशोभितम्॥7॥

इति।



पाद्मे॥

वज्रकीटोद्भवा रेखाः पङ्क्तिभूताश्च यत्र वै।
शालग्रामशिला या सा विष्णुपञ्जरसंज्ञिता॥1॥

नागवत्कुण्डलीभूतरेखापंक्तिः स शेषकः।
पद्माकारे तु पङ्क्ती द्वे मध्ये लम्बा च रेखिका॥2॥

गरुडः स तु विज्ञेयश्चतुश्चक्रे जनार्दन।
चतुश्चक्रः सूक्ष्मद्वारि वनमालाङ्कितोदरः॥3॥

लक्ष्मीनारायणः श्रीमान् भुक्तिमुक्तिफलप्रदः।
अर्धचन्द्राकृतिर्देवो हृषीकेश उदाहृतः॥4॥

तमभ्यर्च्य लभेत्स्वर्गं विषयांश्च समीरितम्।
वामपार्श्वे समे चक्रे कृष्णवर्णः सबिन्दुकः॥5॥

लक्ष्मीनृसिंहो विख्यातो भुक्तिमुक्तिफलप्रदः।
त्रिविक्रमस्तथा देवः श्यामवर्णो महाद्युतिः॥6॥

वामपार्श्वे तथा चक्रे रेखा चैव तु दक्षिणे।
प्रदक्षिणावर्तकृतवनमालाविभूषितः॥7॥

या शिला कृष्णसंज्ञा सा धनधान्यसमृद्धिदा।
चतस्त्रो यस्य दृश्यन्ते रेखाः पार्श्वे समीपगाः॥8॥

चतुचक्रे मध्यदेशे सा शिला तु चतुर्मुखा।

इति।

तथा॥

अतल्लक्षणयुक्तास्तु सालग्रामशिलाः शुभाः।
याश्च तास्वापि सूक्ष्माः स्युस्ताः प्रशस्ततराः स्मृताः॥1॥

इति।

तथा च श्रीभगवद्ब्रह्मसंवादे तत्रैव॥

यथा यथा शिला सूक्ष्मा महत्पुण्यं तथा तथा।
तस्मात्तां पूजयेन्नित्यं धर्मकामार्थसिद्धये॥1॥

तत्राप्यामलकीतुल्या सूक्ष्मा चातीव या भवेत्।
तस्यामेव सदा ब्रह्मन् श्रिया सह वसाम्यहम्॥2॥

इति।

अथ शालग्रामशिलायां हरिपूजामाहात्म्यं पाद्मे माघमाहात्म्ये॥

यः पूजयेद्धरिं चक्रे शालग्रामशिलोद्भवे।
राजसूयसहस्रेण तेनेष्टं प्रतिवासरम्॥1॥

यदामनन्ति वेदान्ता ब्रह्म निर्गुणमच्युतम्।
तत्प्रसादो भवेन्नृणां शालग्रामशिलार्चनात्॥2॥

महाकाष्ठस्थितो वह्निर्मथ्यमानः प्रकाशते।
अतिपापसमाचाराः कर्मण्यनधिकारिणः॥3॥

शालग्रामर्चका वैश्या नैव यान्ति यमालयम्।
न तथा रमते लक्ष्म्या न तथा स्वपुरे हरिः॥4॥



शालग्रामशिलाचक्रे यथा स रमते सदा।
अग्निहोत्रं हुतं तने दत्ता पृथ्वी ससागरा॥5॥

येनार्चितो हरिश्चक्रे शालग्रामशिलोद्भवे।
कामक्रोधमदलोभैर्व्याप्तो योऽत्र नराधमः॥6॥

सोऽपि याति हरेर्लोकं शालग्रामशिलार्चनात्।
यः पूजयति गोविन्दं शालग्रामे सदा नरः॥7॥

आभूतसम्प्लवं यावन्न स प्रच्यवते दिवः।
विना तीर्थैर्विना दानैर्विना यज्ञैर्विना मखैः॥8॥

मुक्तिं यान्ति नरा वैश्य शालग्रामशिलार्चनात्।
नारकं गर्भवासं च न तिर्यक्क्रृमियोनिकम्॥9॥

न याति वैश्यः पापोऽपि शालग्रामेऽच्युतार्चकः।
दीक्षाविधानमन्त्रज्ञश्चक्रे यो बलिमाहरेत्॥10॥

स याति वैष्णवं धाम सत्यं सत्यं मयोदितम्।
नैवेद्यैर्विविधैः पुष्पैर्धूपदीपविलेपनैः॥11॥

गीतवादित्रस्तोत्राद्यैः शालग्रामशिलार्चनम्।
कुरुते मानवो यस्तु कलौ भक्तिपरायणः॥12॥

कल्पकोटिसहस्राणि रमते सन्निधौ हरेः।
लिङ्गैस्तु कोटिभिहष्टैर्यत्फलं पूजितैश्च तैः॥13॥

शालग्रामशिलायास्तु एकेनापीह तत्फलम्।
शालग्रामशिलारूपी यत्र तिष्ठति केशवः॥14॥

तत्र देवासुरा यक्षा भुवनानि चतुर्दश।
शालग्रामशिलायां तु यः श्राद्धं कुरुते नरः॥

पितरस्तत्र तिष्ठन्ति तृप्ताः कल्पशतं दिवि।
सालग्रामसमीपे तु क्रोशमात्रं समन्ततः॥16॥

कीटकोपि मृतो याति वैकुण्ठं किमु मानुषः।
सालग्रामशिलाचक्रं यो दद्याद्दानमुत्तमम्॥17॥

भूचक्रं तेन दत्तं स्यात् सशैलवनकाननम्।

इति।

स्कान्दे शिवस्कन्दसंवादे॥

शालग्रामशिलयां तु त्रैलोक्यं सचराचरम्।
मया सह महासेन लीनं तिष्ठति सर्वदा।।1।।

दृष्ट्वा प्रणामिता येन स्नापिता पूजिता तथा।
पुण्यकोटिसमं पुण्यं गवां कोटिफलं लभेत्।।2।।

कामासक्तोऽपि यो नित्यं भक्तिभावविवर्जितः।
सालगामशिलां पुत्र सम्पूज्यैवाच्युतो भवेत्।।3।।

सालग्रामशिलाबिम्बे हत्याकोटिविनाशनम्।
Leràl कीर्तितं ध्यातं पूजितं च नमस्कृतम्।।4।।

सालग्रामशिलां दृष्ट्वा यान्ति पापान्यनेकशः।
सिंहं दृष्ट्वा यथा यान्ति वने मृगगणा भयात्।।5।।

मनः करोति मनुजः शालग्रामशिलार्चने।
पापानि विलयं यान्ति तमः सूर्येदये यथा।।6।।

कामासक्तोऽथवा क्रुद्धः शालग्रामशिलार्चनम्।
भक्त्या वा यदि वाऽभक्त्या कृत्वा मुक्तिमवाप्नुयात्।।7।।



वैवस्वतभयं नास्ति तथा मरणजन्मनोः।
यः कथां कुरुते विष्णोः सालग्रामशिलाग्रतः।।8।।

गीतैर्वाद्यैस्तथा स्तोत्रैः सालग्रामशिलार्चनम्।
कुरुते मानवो यस्तु कलौ भक्तिपरायणः॥9॥

कल्पकोटिसहस्राणि रमते विष्णुसद्मनि।
सालग्रामे नमस्कारो भवितापि नरैः कृतः॥

भयं नैव करिष्यन्ति मद्भक्ताः ये नरा भुवि।
मद्भक्तिबलदर्पिष्ठा मत्प्रभुं न नमन्ति ये॥11॥





वासुदेवं न ते ज्ञेया मद्भक्ता पापिनो हि ते।
सालग्रामशिलायां तु सदा पुत्र वसाम्यहम्॥12॥

दत्तं देवेन तुष्टेन स्वस्थानं नाम भक्तितः।
पद्मकोटिसहस्त्रैस्तु पूजिते मयि यत्फलम्॥13॥

तत्फलं कोटिगुणितं सालग्रामशिलार्चने।
पूजितोऽहं न तैर्मन्त्रैर्नमितोहं न तैर्नरैः।।14।।

न कृतं मर्त्यलोके यैः सालग्रामशिलाचर्नम्।
सालग्रामशिलाग्रे तु यः करोति ममार्चनम्।।15।।

तेनार्चितोऽहं सततं युगानामेकसप्ततिः।
fd efp r8y ङ्गशतैर्विष्णुभक्तिविवर्जितैः।।16।।

सालग्रामशिलाबिम्बं नर्चितं यदि पुत्रक।

अनर्हं मम नैवेद्यं पत्रं पुष्पं फलं जलम्।।17।।

सालग्रामशिलालग्नं सर्वं याति पवित्रताम्।
यो हि माहेश्वरो भूत्वा वैष्णवं लिङ्गमुत्तमम्।।18।।

द्वेष्टि वै याति नरकं यावदिन्द्राश्चतुर्दश।
सकृदभ्यर्चिते विष्णौ सालग्रामसमुद्भवे।।19।।

मुक्तिं प्रयान्ति मनुजा नूनं सांख्येन वर्जिताः।
मल्लिंगैः कोटिभिर्दृष्टैर्यत्फलं पूजितैस्तु तैः।।20।।

सालग्रामशिलायां तु एकेनापीह तद्भवेत्।
तस्माद्भक्त्या च मद्भक्तैः प्रीत्यर्थं मम पुत्रक।।21।।

कर्तव्यं सततं भक्त्या सालग्रामशिलार्चनम्।
सालग्रामशिलारूपी यत्र तिष्ठति केशवः।।22।।

तत्र देवासुरा यक्षा भुवनानि चतुर्दश।
सालग्रामशिलाग्रे तु सकृत्पिण्डेन तर्पिताः।।23।।





वसन्ति पितरस्तस्य न संख्या तत्र विद्यते।
प्रमाणमस्ति सर्वस्य सुकृतस्य हि पुत्रक॥24॥

फलं प्रमाणहीनं तु सालग्रामशिलार्चने।
यो ददाति शिलां विष्णोः सालग्रमसमुद्भवाम्॥25॥

विप्राय विष्णुभक्ताय तेनेष्टं बहुभिर्मखैः।
मानुष्ये दुर्लभे लोके सालग्रामशिला नरैः॥26॥

प्राप्यते न विना पुण्यैः कलिकाले विशेषतः।
स धन्यः पुरुषो लोके सफलं तस्य जीवितम्॥27॥

सालग्रामशिला शुद्धा गृहे यस्य च पूजिता।
सन्नियम्येन्द्रियग्रामं सालग्रामशिलार्चनम्॥28॥

यः कुर्यान्मानवो भक्त्या स याति परमं पदम्।
भक्त्या वा यदि वाऽभक्त्या यः करोति स पुण्यभाक्॥29॥

द्वेषेणापि च लोभेन दम्भेन कपटेन वा।
सालग्रामोद्भवं देवं दृष्ट्वा पापात् प्रमुच्यते॥30॥

अशुचिर्वा दुराचारः सत्यशौचविवर्जितः।
शालग्रामशिलां स्पृष्ट्वा सद्य एव शुचिर्भवेत्॥31॥

तिलप्रस्थशतं भक्त्या यो ददाति दिने दिने।
तत्फलं स समाप्नोति सालग्रामशिलार्चने॥32॥

पत्रं पुष्पं फलं मूलं तोयं दूर्वाक्षताः सुत।
जायते मेरुणा तुल्यं सालग्रामशिलार्पितम्॥33॥

विधिहीनोपि यः कुर्यात् क्रियामन्त्रविवर्जितः।
चक्रपूजामवाप्नोति सम्यक् शास्त्रोदितं फलम्॥34॥

इति।

तत्रैवान्यत्र॥





स्कन्धे कृत्वा तु योऽध्वानं वहते शैलनायकम्।
तेनोढं तु भवेत् सर्वं त्रैलोक्यं सचराचरम्॥1॥

ब्रह्महत्यादिकं पापं यत्किञ्चित् कुरुते नरः।
तत्सर्वं निर्दहत्याशु सालग्रामशिलार्चनम्॥2॥

न पूजनं न मन्त्राश्च न जपो न च भावना।
न स्तुतिर्नोपस्कारश्च सालग्रामशिलार्चने॥3॥

सालग्रामशिला यत्र तत्तीर्थं योजनत्रयम।
तत्र दानं च होमश्च सर्व कोटिगुणं भवेत्।।4।।

सालग्रामशिलायां तु यः श्राद्धं कुरुते नरः।
पितरस्तस्य तिष्ठन्ति तृप्ताः कल्पशतं दिवि।।5।।

सालग्रामसमीपे तु क्रोशमात्रं समन्ततः।
कीटकोऽपि मृतो याति वैकुण्ठभवनं नरः।।6।।

शालग्रामशिलाचक्रं यो दद्याद्दानमुत्तमम्।
भूचक्रं तेन दत्तं स्यात् सशैलवनकाननम्।।7।।

इति।

गरुडपुराणे।।

तिष्ठन्ति नित्यं पितरो मनुष्यास्तीर्थाग्गिङ्गागयपुष्कराणि।
यज्ञाश्वमेधाद्यपि पुण्यशैलाश्चक्राङ्किता यस्य वसन्ति गेहे।।1।।

इति।

पाद्मे।।

सालग्रामशिलायां तु यैर्नरैः पूजितो हरिः।
संशोध्य तेषां पापानि मुक्तये बुद्धिदा भवेत्।।1।।

कार्तिके मथुरायां तु सारूप्यं दृश्यते हरिः।
सालग्रामशिलयां वै पितृनुद्दिश्य पूजितः।।2।।

कृष्णः समुद्धरेत्तस्य पितृनेतान् सलोकताम्।।

इति।



सालग्रामशिलारूपी यत्र तिष्ठति केशवः।
न बाधन्तेऽसुरास्तत्र भूतवेतालकादयः॥1॥

सालग्रामशिला यत्र तत्तीर्थं तत्तपोवनम्।
शतं वा पूजितं भक्त्या तदा स्यादधिकं फलम्॥2॥

इति।

अथ तासां बाहु ल्ये फलविशेषः पद्मे॥

सालग्रामा युगाः पूज्या युगेषु द्वितयं नहि।
अयुग्मा नैव पूज्यन्ते अयुग्मेष्वेक एव हि॥3॥

शिला द्वादश भो वैश्य सालग्रामसमुद्भवाः।
विधिवत्पूजिता येन तस्य पुण्यं वदामि ते॥4॥

कोटिद्वादशलिंगैस्तु पूजितैः स्वर्णपङ्कजैः।
यत् स्याद् द्वादशकल्पैस्तु दिनेनैकेन तद्भवेत्॥5॥

यः पुनः पूजयेद्भक्त्या सालग्रामशिलाशतम्।
तत्फलं नैव शक्तोऽहं वक्तुं कल्पशतैरपि॥6॥

इत्याद्यास्तां विस्तरः अत्र केचित् सालग्रामे विष्णोर्नावाहनं कार्यमिति वदन्ति, तत्र प्रमाणं चिन्तयम् वस्तुतस्तु स्कन्दपुराणादिदर्शना दावाहनमवश्यं कार्यमिति प्रतीयते। यथा स्कन्दपुराणे-

विप्रः पूर्वं निजे देहे स्मृत्युक्तेनन्यसेद्बुधः।
ततस्तु प्रतिमायां च सालग्रामे विशेषतः॥1॥

क्रमेण च ततः पश्चात्कुर्यादावाहनादिकम्।
आवाहयेच्च पुरतो ध्यानसेव्यं द्विजोत्तमः॥2॥

इति।

अत्र एवावाहनाद्युद्वासनान्तमभिधायोक्तं बोधायनेन-"सालग्रामे प्रतिमास्वग्ना-वप्यावाहनादिविसर्जन" मिति॥ त्रैलोक्यसम्मोहनतन्त्रे-'सालग्राम' इत्युपक्रम्य विर्सनान्ता पूजोक्ता। अत्र 'सालग्रामशिलायाहं तु प्रतिष्ठां नैव कारयेत्' इति प्रतिष्ठामात्रनिषेधादावाहनमावाश्यकं विष्णोरन्यदेवतानां चाविरुद्धमिति।

"आवाह्यार्चादिषु स्थाप्य न्यस्ताङ्गं मां प्रपूजयेत्"॥ इति भागवतेऽपि भगवता स्वयमभिधानात्। आदिपदेन मन्त्रादयो गृह्यन्ते।

तथा मेरुतन्त्रेऽपि सालग्रामशिलालक्षणे॥

विष्णोर्भेदा इमे प्रोक्ता अत्रैवावाहयेद्धरिम्।
विसर्जयेत् तु पूजान्ते प्रतिष्ठां नात्र कारयेत्॥1॥

इति॥